नं० १५-६२-घ
व्युत्पत्तिवाद:
पत्राणि ८२
(न्याय शास्त्र विषयक)

नुशासनसत्त्वात् विधेयत्वादेरप्यर्जत्वात् अत एव रजतत्वेन शुक्तिं जानामीत्यादौ ज्ञाने रजतत्वादिप्रका
रकत्वस्य घटत्वेन वह्निर्नास्तीत्यादौ सोऽस्मन्मतेऽभावे घटत्वावच्छिन्नप्रतियोगिताकत्वस्य तत्तीर्थानां ताद्बोधः
त्तीर्थानां तार्थरजतत्वादिप्रकारकत्ववत्तीर्थानां तार्थशुक्त्यादिविशेष्यकत्वयोर्विशिष्टवैशिष्ट्यबोधमर्यादयाऽव
च्छेद्यावच्छेदकभावमात्रं रजतत्वेन शुक्तिं जानामीत्यादौ नियतं केवलमेकत्र यद्वयमिति रीत्या तदुभयबोधस्य
तत्रानुत्पन्नत्वात् अत इमे रङ्गरजते इति प्रमापरस्य तादृशवाक्यस्य न प्रमाणं घटत्वाद्यवच्छिन्नवह्न्या
द्यभाववन्निष्ठेन वह्न्यादिनिरूपितानुयोगिताविशेषरूपवह्न्यादिभावत्वेन तदभाववन्निष्ठघटत्वाद्यव
च्छिन्नप्रतियोगिताकत्वस्यावच्छेद्यावच्छेदकभावः स्वीक्रियते घटत्वेन वह्निर्नास्तीत्यादौ च तद्बोधस्या

कु·त्रि
१

क्रीत्यावश्यकत्वमिति घटत्वाद्यवच्छिन्नवह्न्याद्यभावस्य वह्नित्वावच्छिन्नघटाद्यभावसमनियतत्वेन तदभिन्नतया तत्र घ
टत्वावच्छिन्नप्रतियोगिताकत्वघटाद्यभावत्वसत्वेपि नाहृशाभावपरस्य घटत्वेन घटो नास्ति वह्नित्वेन वह्निर्नास्तीत्या
दिवाक्यस्य न प्रामाण्यं उक्तस्थले श्रुततृतीयान्तार्थस्य द्वितीयान्तार्थेऽवच्छेद्यावच्छेदकभावसंबंधेनान्वयस्त्वपि
केचित् तत्र विभक्त्यर्थे तदर्थान्वयस्याव्युत्पन्नत्वात् न च रजतत्वेनेदं जानातीत्यादौ प्रख्यातार्थविषयताया
तृतीयार्थप्रकारतायां निरूपितत्वसंबंधेनान्वयोपगमाद्व्युत्पत्तिः तत्रापि रजतत्वप्रकारत्वविशिष्टस्यान्वये ज्ञा
ननिरूपितत्वस्याख्यातार्थभानस्वीकारेणैवादोषात् न च तस्योत्पचति तस्माच्चैत्रस्येत्यादौ विभक्त्यर्थेक
तिसंबंधादौ हेतुविभक्त्यर्थान्वय दर्शनान्नाव्युत्पन्निरिति वाच्यं हेतुविभक्त्यतिरिक्तार्थस्य विभक्त्यर्थान·

न्वयमात् नचरजतत्वेनेदंजानातीत्यादौतृतीयायाःकारकविभक्तित्वाभावान्नतदर्थस्यक्रियान्वयसंभवतिग्र
गत्याद्वितीयार्थैतदन्वयः उपगंतव्यइतिवाच्यं मणिमतेतस्माज्जानातीत्यादौज्ञानादिरूपधात्वर्थएवद्वेतत्वावि
भक्त्यर्थस्यतस्यात्स्थीयतत्रत्यादौचसर्वमतएवधात्वर्थस्यत्यादौतस्यान्वयेनवृष्ठ्यर्थस्यापिगुरुविप्रतपस्विदुर्गतानांप्रति
ऊर्वीतभिषक्त्सवभेषज्जैरित्यादौधात्वर्थैन्वयेनकर्मात्समभिव्याहृतैरजतत्वेनजानातीत्यादौचधात्वर्थैतृतीयार्थान्वयस्याव
श्यकत्वेनकारकविभक्तिभिन्नविभक्त्यर्थस्यक्रियायामनन्वयस्यनियमात् एवंघटत्वेनवह्निर्नास्तीत्यादौप्रथ·
मार्थेनानुयोगित्वं प्रथमायाःसंख्यातिरिक्तार्थावोधकत्वनियमात् अतोनप्रथमार्थाभावेसंबंधएवतत् तत्रच
नतृतीयार्थान्वयसंभवः ममत्वनुयोगितासंबंधेनवह्न्यादिविशिष्टाभावेतृतीयार्थघटत्वावच्छिन्नप्रतियो

बु॰ त्रि गिताकत्ववैशिष्ट्यभानाद्विशिष्टवैशिष्ट्यबुद्धिमर्यादया घटाद्यनुयोगित्वस्थलीयस्यानुयोगितया संबंधिघटा
२ देस्तादृशप्रतियोगिताकत्वेनावच्छेद्यावच्छेदकभावभानोपगमेन सामंजस्यात् अनुयोगितायाननुगततावच्छे
2 दकत्वेन तत्तद्घटादेः प्रतियोगिनोऽन्वयः तत्र तृतीयार्थघटत्वावच्छिन्नप्रतियोगितायाः निरूपकत्वेना
न्वयं स्वीकृत्यातिप्रसंगवारणस्योचितत्वादिति प्रतिभाति रंगे अभेदेन रजतारोपस्थले रंगं रजतत्वेन जानातीत्य
प्रयोगात्तादात्म्यभिन्नसंबंधावच्छिन्नप्रकारतैव तृतीयार्थः तत्र च रंगं रजतं जानातीति प्रयोगात्तादात्म्यसंबंधावच्छि
न्नप्रकारकर्मत्वानुशिष्टद्वितीयादेरेवार्थः तस्याश्च तादृशप्रकारवाचिपदसमानविभक्तिकपदोपस्था
प्यविशेष्यताविशिष्टायामेव ज्ञाननिरूपक्रियायामन्वयः तेन भेदारोपस्थले रंगे रजतत्वं जानातीतिवत् अभेदा १

रोपस्थले रंगे रजतं जानातीति न प्रयोगः उक्तस्थले च रंग रजतयोः समानविभक्तिकपदोपस्थाप्ययोरभेदान्वये सा
काङ्क्षत्वेपि नायोग्यतया तादृशान्वयः न त्वेवं सति रंगरजतपदयोः सामानाधिकरण्यानुपपत्तिरिति चेत्कांतत्तिः
नचैवं रंगरजते कत्ववक्तृत्वविवक्षायां रंगानि रजतं जानातीति प्रयोगस्यत्त्वियं पास्तु लं जानातीति प्रयोगस्य च-
प्रसंगः सामानाधिकरण्यस्यैव समानवचनलिंगत्वनियतत्वादिति वाच्यं समानाधिकरण्योरिव यत्पदा
र्थविशेष्यकत्वविशिष्टेऽभेदसंबंधावच्छिन्नयत्पदार्थप्रकारकत्वस्यान्वयः तयोरपि समानलिंगवचनत्वनियमात्
यत्तु पतिनतानुसापापिनस्तु रंगं रजतं जानातीत्यादौ समानाधिकरण्यानुरोधात् रजतादिपद-
स्य रजताभेदज्ञानविषये लक्षणाग्रतपवभ्रांतिस्तु विशेषदर्शिप्रयुक्तस्थलोद्दितवद्धिं जानातीत्यादि

कु.ति. वाक्यस्यापिप्रामाण्यनिर्वाहः नह्यसमासस्थलइवलोहितवह्न्याद्योरभेदावच्छेदाज्ञानांशेलोहितादेस्वातंत्र्येणान्वयो
वासंभवतिः कर्मधारयस्यसाधुतानुपपत्तेः लोहितपदोत्तरंप्रकारतावोधकविभक्तेरभावात् धात्वर्थेसा
३ 3 दान्नामार्थस्यभेदान्वयस्याव्युत्पत्तेः द्वंद्वस्थलवत्कर्मधारयोत्तरविभक्तेःपूर्वपदप्रकृतिकत्वाभावात्तस्याःपूर्व
पदार्थान्वितप्रकारतावोधकत्वायोगात् नचद्वंद्वसमासएवास्तोस्वल्पाचोवह्निपदस्यपूर्वनिपातप्रसंगा-
त् समाहारपक्षेपुंलिंगतायाइतरेतरपक्षेएकवचनस्यानुपपत्तेश्च एतन्मतेचशुक्लोवह्निरित्यादिभ्रमा
यालोहिताभेदारोपविषयवह्निविषयकत्वेपिशुक्लोवह्निर्लोहिताजपेतिसमूहालंबनप्रमायालोहिताभेदाव
गाहित्वविषयवह्निविषयकत्वेपिचतादृशायांलोहितंवह्निंलोहितवह्निंवाजानातीतिनप्रयोगः ईदृशपदोपस्थापवि

षयतायां धर्मिपारतन्त्र्येण द्वितीयार्थविषयतायामभेदसंबंधेन विशेषणतायां नियमेनोपगमात् अथवा लोहिता
भेदविषयतानिरूपितविषयतायंत्रवह्न्यादेः ज्ञानान्वयि विषयितानिरूपकत्वं भासते समूहालंबनादेश्च
तादृशविषयतानाश्रयत्वस्यैव विषयितानिरूपकत्वमिति नातिप्रसंगः विषयतापन्नस्य निरूपकत्वमित्यस्य च वि-
षयतावच्छिन्ननिरूपकत्वमित्यर्थः एतच्च विलक्षण विषयितानिरूपकतावच्छेदकत्वं विषयस्यापि विषयत्वस्यो
पेयते रक्तदंडवानित्यादौ दण्डादिरूपप्रकारांशेऽप्रकारेणापि रक्तत्वादिनिरूपितविषयत्वेन दण्डादिप्रका
रतायाऽवच्छेद्यावच्छेदकभाववदित्याहुः तन्न शोभनं उक्तरीत्या विनैव लक्षणामुपपत्तौ तस्याऽप्रामाण्या
त् वस्तुतो लोहितवह्निं जानातीत्यादिवाक्यमयोग्यमेवेति हृदयं अथोक्तस्थले आरोप्यारोपविषयबोधकपद

कु·ति·
५

योर्ज्ञानान्वितार्थकत्वेकर्मप्रत्ययस्थलेवह्निर्लोहितोज्ञातव्यइत्यादौविशेष्यभेदाद्वाक्यभेदापत्तिः नचलोहिताभेदज्ञानवि
षयोवह्निरित्यवशाद्व्यधीरूपगम्यतेनतुज्ञानेप्रकारोलोहितोविशेष्यश्चवह्निरितिसमूहालंबनंतथासति
युक्तोवह्निर्जवालोहितेत्यादावपितथाप्रयोगप्रसंगात् दर्शितविशिष्टवैशिष्ट्यधीस्वीकारेलोहितादिप्रकारक
त्वविशिष्टनिरूपितविशेष्यतायाश्चज्ञवह्न्यादौबाधितत्वेनतादृशप्रयोगापत्तिविरहादितिवाच्यम् तत्रलो
हितार्थकपदोत्तरप्रकारतार्थकद्वितीयादिविभक्तिविरहेणलोहितादिप्रकारकत्वेनज्ञानभानासंभवात् नामार्थयो
रर्थयोः साक्षादन्वयस्याव्युत्पन्नतयाप्रकारितायाः संसर्गतयाभानासंभवादितिचेन्न यथाहिघटोनीलोभ-
वतिदृष्टोनीलोकाभवतिकाष्ठंभस्मभवतीत्यादौधात्वर्थेऽसाधारणधर्मरूपेभावेकृत्यप्रत्ययवैचित्र्येणनी- ५

लनौकाभस्मादेः साक्षादेवान्वयः प्रथमायाश्चंतरा भासमानार्थकत्वाभावान्नौकादिपदस्यस्वारंभकावयवारभ्यनौ
कादिसपार्थत्वात्तात्विकतया प्रकृतिविकृत्योर्भेदमतेपि द्वैनौकाभवतीत्यादौ योग्यताया उपपत्तिस्तथा
यात्वर्थप्रकारितासंबंधेन लोहितादेः साक्षादन्वयस्यागत्यापगमात् यथा प्रकृतिविकृतिभावस्य लेष्ट
दः पंचनौकाभवतीत्यादौ प्रकृतिभूतष्टलादेर्विशेष्यतयाभावनान्वयित्वात् तद्गतसंख्याबोधकतया-
प्रकृतिवाचकपदसमानवचनत्वमाख्यातपदस्य तथापकोद्दोज्ञाय तत्रत्याद्युभयाभेदारोपस्थलीयवा
क्येपकादिपदार्थस्यारोपविशेष्यस्याख्यातार्थविशेष्यतान्वयविशेष्यतया तत्पदसमानवचनत्वमाख्या
तस्य नवैवसमानितन्नेननिजायशोयुगं द्विफालवद्वाश्विकृता: शिरस्थितमित्यत्र कथमारोप्यमवि-

मु.त्रि. शेष्यवाचकपदविरुद्धवचनत्वमसमानाभिक्रियापदस्येति वाच्यम् तत्राद्यशेषाद्वयस्य वास्तवत्वेन चिकुरभा
५ गद्वयस्य राज्ञाश्रशेष्यत्वेन कर्तृत्वे विवक्षितत्वादाख्यातार्थविशेष्यतान्वयविशेष्यत्वेनाद्यशेषाभागस्यैव विवक्षितत्वात्
५ इच्छार्थकधातुस्थले मुख्यविशेष्यत्वं तद्रूपकर्मत्वं द्वितीयार्थः अतो दृष्टिसाध्यं सुखं भवत्वितीच्छास्थले सुखमिच्छती
त्यादयो न प्रयोगाः अहं सुखी स्यामित्यादीच्छायाः सुखादिविशेषणकतया तत्र सुखमिच्छतीति प्रयोगानुपपत्ति
रिति चेत् न मम सुखं भवत्वित्यादिसुखविशेष्यकेच्छाया एव कदाचित्सुखादिविशिष्टात्मबोधकशब्दे-
न विषयाभिलापात् स्वकृत्यधीनसिद्धिकत्वरूपस्वकृतिसाध्यत्वप्रकारकपाकविशेष्यकेच्छायाश्च
पाकं कृत्या साधयामीति पाककृत्यनुकूलकृत्यभिन्नव्यापारविशिष्टार्थबोधकशब्देन विषयाभिलापवत् यदि ५
चोद्देश्यसु

स्वादेर्विशेषणतयापि काचिज्ज्ञानमानुभविकं तदोद्देश्यादिव्यवहारनियामकः क्वचित्कविशेषणासाधा
रणेऽविशेषणतयाविशेषोवश्याभ्युपेयः अनुमितौ विशेष्यतयाकाचित्कभानविषयस्याप्यनिष्टविधेयताख्य
विषयतावत्त्वस्यैवचसत्त्वमिच्छतीत्यादौद्वितीयार्थः ग्राममिच्छतीत्यादौग्रामादिपदंग्रामत्वत्वादिपरं अतःसिद्धस्य
ग्रामादेर्मुख्याविशेष्यतायाउपदर्शितविलक्षणविषयतावाविरहेपिनक्षतिः ग्रामादेरसिद्धत्वेपिस्वत्वाद्यसिद्धोप
रक्तस्येच्छायांप्राथम्येनकाचिज्ज्ञानेविशिष्टार्थासिद्धत्वात् तत्रैवचग्राममिच्छतीत्यादिप्रयोगश्चसपिवदंति। पा
कंचिकीर्षतीत्यादौद्वितीयायाविशेष्यताद्रूपकर्मत्वार्थकतयाकृतिप्रकारकपाकविशेष्यकेच्छाप्रतीयते माच
पाकंकृत्वासाधयामीतीच्छा अथवासनोयात्वर्थविशेष्यकेच्छावाचित्वात्कृतिविशेष्यकेच्छाचिकीर्षाप

कु॰ ति॰
९

दार्थः साच पाककृतिभवत्वितीच्छैवेप्रवृत्तिकाच साभवतुमावेत्यम्पदेतत् पाकादिस्वकृतिकर्मत्वमेवप्रसाध्यते
द्वितीययानत्वच्छाविषयत्वरूपंकर्मत्वंगृहस्थस्यसादीच्छामादायगृहंतिष्ठासतीत्यादिप्रयोगापत्तेः युक्तंचैतत् स
नोयात्वर्थप्रकारकेच्छावाचित्वेओदनभोजनेच्छादशायांओदनंबुभुक्षतइतिप्रयोगोनस्यात् तत्रभोजनस्याप्र
कारत्वात् नचभोजनकर्मतोपरागेणयदौदनविशेष्यकेच्छातदैवतादृशप्रयोगः सावेच्छाभोजनधर्मिकेष्टसाधन
ताज्ञानात् भोजनविशिष्टौदनधर्मिकेष्टसाधनताज्ञानाद्वा ओदनस्यसिद्धतादशायामपिविशिष्टधर्मिकेष्ट
साधनताज्ञानाद्विशिष्टधर्मिकासिद्धत्वज्ञानसहितात् विशिष्टेच्छासंभवात् यत्रभोजनसिद्धतादशायांभोजनो
त्तरकालीनगमनत्वादिप्रकारिकाभुक्तौदनजन्यपुष्टित्वादिप्रकारिकाचेच्छातत्रबुभुक्षतइत्यस्यनप्रसंगः सुख ९

विशेष्यविशेषणतापन्नकर्मत्वांशेच्छाप्रकारताया एव सन्प्रत्ययप्रकृत्यर्थेभानोपगमात् २ अत एव च स्थित्यादिगोचरेच्छाया

गृहादिविशेष्यकत्वस्याङ्गीकारीत्यासंभवेपि गृहं तिष्ठासतीत्यादेर्यानप्रयोगा भोजनं भवत्वित्यादिभोजनविशेष्यकेच्छा

दशायामपि बुभुक्षत इति प्रयोगस्य सर्वसिद्धत्वात् धात्वर्थविशेष्यकेच्छाबोधकतायाः सन्प्रत्ययस्यावश्यमुपेय

त्वात् २ न च द्वयी क्लृप्तन्निरेवोपेयते एकक्लृप्तस्यैव निर्वाहे क्लृप्तद्वयकल्पने गौरवात् न च धात्वर्थविशेष्यकेच्छा

याः सन्प्रत्ययार्थत्वे पाकं चिकीर्षतीत्यादौ पाकादेर्द्वितीयार्थकृत्यादिकर्मत्वप्रत्यायनसंभवेपि पाकश्चिकीर्ष्यत इ

त्यादौ कर्माख्यातेन तत्प्रत्यायनासंभवः तत्प्रकृतिभूतसन्नन्तधात्वर्थकृतौ इच्छाकर्मत्वस्यैव तत्प्रत्यायनयोग्यता

त् प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वात् इच्छाविषयत्वविशेषितकृत्यादेश्च प्रकृत्याऽप्रतिपादना

ग्रु.ति.

७

दितिवाच्यम् कर्मप्रत्ययस्थले सन्प्रत्ययार्थेच्छायाधात्वर्थेविशेषणतयाभानेपिकर्मप्रत्ययस्थलेतस्याधात्वर्थविशेषण
तयाभानोपगमात् चिकीर्षितेपाकइत्यादाविच्छाविशेषितकृत्यादेरेवसन्नन्तेनप्रतिपादनात् तादृशकृत्यादिकर्मता
याश्चात्मनेपदादिनाप्रत्यायनसंभवात् आख्यातादुपस्थितवर्तमानत्वादेः कृत्यादिविषयकेच्छायत्रप्रकृत्यर्थोयत्रवा
इच्छाविषयकृतिस्तत्रोभयत्रैवेच्छायामन्वयः प्रकृत्यर्थैकदेशेपिनीलतरोघटइत्यादिस्थलेनीलरूपादौतरबाद्यर्थाति
शयान्वयात् नचैवंकर्मप्रत्ययस्थलेपिकृतिविशेषितेवेच्छामनाप्रत्याय्यतांविशेषणीभवंतीकृतिरेवकर्मत्वे
नान्वीयतां भवन्मतेविशेषणीभवंत्यामिच्छायांवर्तमानत्वाद्यपराख्यातार्थान्वयवदितिवाच्यम् एकत्रविशेष
णतयान्वितस्यापरत्रविशेषणतयान्वयोऽव्युत्पन्नइतिप्रथमातार्थविशेषणकर्मत्वेइच्छाविशेषणतयोपस्थितस्य

धात्वर्थस्यविशेषणतयान्वयायोगात् विशेष्यतयाचान्वयस्याप्रसक्तत्वात् धात्वर्थविशेषणतयेच्छाभानेपित
स्यवर्त्तमानत्वादिविशेषणतयैवभानेनोक्तव्युत्पत्तिविरोधविरहात् एवंधात्वर्थस्येतराविशेषणतयोपस्थितस्य
स्वातंत्र्येणकर्मतानिविशेषणत्वमयुक्तं नममेवप्रकृतार्थस्यैकदेशेपिप्रकृतार्थांतर्गतत्तयाभासमानएवप्रत्य
याद्यान्वयदर्शनात् ननुस्वातंत्र्येणभासमानेइच्छारूपविशेष्यपारतंत्र्येणकर्मत्वान्वयोपिइच्छायाःकर्मत्वानन्व
येऽदृष्टः विशेष्यान्वयित्वेनविशेषणस्यपारतंत्र्येणान्वयस्यविशिष्टान्वयस्यलेव्युत्पत्तिसिद्धत्वात् अथास्तुविष
यतारूपकर्मत्वेचिकीर्ष्यतेपाकइत्यादौइच्छायास्तत्पारतंत्र्यंतत्रकृतेष्यान्वयः उभयत्रैवपाकादेर्विषयत्वात् स्थिमा
दिकर्मत्वाप्रसिध्याचगृहंतिष्ठास्येत्यत्रइत्यादेरप्रसंगादितिचेत् ओदनोवुभुक्षतइत्यादौकागतिः नत्रैवाकृ

मु·नि·
८
90

र्मतायाविषयतारूपत्वात् भोजनादिकर्मतायाश्च तदन्यत्वात् विशेष्याभावदिच्छान्वयिनि कर्मत्वे भोजनाद्यन्वयायो
ग्यत्वेन विशिष्टान्वयासंभवात् वस्तुतः पाकञ्चिकीर्षत इत्यत्राप्यगतिरेव कृतिविशेषणतया पाकनिष्ठेच्छावि
षयतायाः कृत्यविशेषणतया तन्निष्ठकृतिविषयताया भिन्नतया इच्छान्वयिनो विषयत्वरूपकर्मत्वस्य कृत्य
न्वयायोग्यत्वात् अपि च विशेष्यान्वयिव्यक्तावेव तत्पारतंत्र्येण विशेषणान्वय इति न नियमः अपि तु तदन्वयि
तावच्छेदकावच्छिन्न एवेति तथा च विषयतात्वावच्छिन्नस्योभयान्वययोग्यतया न प्रकृतेनुपपत्तिः अत एवारु
णयेत्यादौ आरुण्यनिरूपितसाध्यताया गोनिरूपितसाध्यताभिन्नत्वेपि न तृतीयार्थे विशिष्टान्वयानुपप
त्तिः तत्र परंपरया विशेष्यान्वयि सोमक्रयव्यक्तेः परंपरया विशेषणान्वयिव्यक्तिभेद इति चेत् प्रकृतेपि परंपर ८

योभयान्वयिकर्मव्यक्त्यभेदोऽतत एवमुच्यते तदा भोजनकृतिर्भवतु पाकस्तु भवत्विति समूहालंबनेच्छामादाय पाक
श्चिकीर्षित इति प्रयोगस्य कालांतरीणकृतिविषयतामादायदुर्वारत्नैव विषयतासंबंधेनेच्छाविशेषणीभवत्
कृतिव्यक्तिकर्मत्वस्यैव तदिच्छान्वयिनिकर्मण्यन्वयान्नातिप्रसंग इति चेत् तथापि तदिच्छाकाले पाकइदानीं
न चिकीर्षित इति प्रयोगानुपपत्तिः अन्वयितावच्छेदककृतिविषयतयतात्वकृतिगोचरवर्त्तमानेच्छाविष
यतात्वावच्छिन्नाभावयोस्तदापाकेऽसत्वात् न च वर्त्तमानकालावच्छिन्नकृतिविषयतात्वावच्छिन्नाभाव एव तत्र प्रती
यते स पाको बाधित इति वाच्यं यद्यतीतेच्छाधीना पाककृतिरपि तत्र वर्तते न तदा तादृशाभावस्यापि तत्र बाधात् पाक
कृतीच्छायामसत्यामुक्तेच्छासत्वेपि तथा प्रयोगात् कृत्यसत्वेपि पाककृतीच्छासत्वेपि तथाऽप्रयोगात् कृति

मु॰त्रि॰ विषयत्वाभावमात्रबोधस्य तत्राभ्युपगमासंभवाच्चेति कर्मप्रत्ययस्थले इच्छायाधात्वर्थविशेषणमेव इदं तु तत्त्वम् क
८ र्मप्रत्ययस्थलेऽपि धात्वर्थविशेष्यितैवेच्छायास्तत्तायेन प्रत्याय्यते तत्कर्मत्वमेवाख्यातार्थः तच्च धात्वर्थकर्मतया तद्विषय
९ त्वं ओदनकर्मभोजनं भवतु पाकविषयकृतिर्भवत्वित्यादाविच्छायां च पाकौदनादीनां तथेच्छाविषयतया तत्कर्मत्वम
क्षतम् गृहं स्यामित्यादीच्छायां च गृहादेः स्थित्याधारत्वेनैव विषयत्वमिति न गृहादेस्थिशासादिकर्मत्वं अत एव
यदोदनादिव्यक्तिकर्मकभोजनमप्रसिद्धम् अथ च भोजनकर्मतया तदिष्टं तत्रायमोदनो भुज्यतामित्यादेर्द
र्शनादिगोचरत्वेन गगनादिगोचरेच्छास्थले च गगनं दृश्यतामित्यादेः प्रयोगस्य नानुपपत्तिः नवौदनादिरूप
कर्ममात्रोपरागेण यत्र भोजनादीच्छा दैववशेन च तद्भोजनादिकं विषादिकर्मकमपि तत्र विषं भुज्यतामित्यादयः प्रयोगाः ८

कर्तृत्वमयस्य स्थलेऽपि तादृशविषयतानिरूपककर्मत्वमेवेच्छाविशेषणतयाभ्युपगमनेन तु धात्वर्थकर्मत्वं धात्वर्थविशेष
णतया तज्जन्यतदर्थकर्मत्वविशिष्टभोजनादिनिरूपितविषयितायां नियमत इच्छायामभानोपगमेनोक्तस्थले
विषं भुङ्क्ष्वेत्यादिप्रयोगवारणेऽपि गगनं दिदृक्षते इत्यादिप्रयोगस्य दुरुपपादत्वात् इदं तु बोध्यं सम्प्रति
पादेच्छायां धात्वर्थकृतिभोजनादेः केवलविशेषितासम्बन्धेन विशेषणत्वं तथा सति परकर्तृककृतिभोजनादि
गोचरेच्छावति स्वयं चिकीर्षति भुङ्क्ते इति प्रयोगप्रसंगात् किन्तु विशेषितासमानकर्तृकत्वोभयसम्बन्धेनैव
उक्तातिप्रसंगवारणाय इच्छासमानकर्तृकत्वेऽपि सम्बन्धमयवाच्यतास्वीकृतक्रियायां तदन्वयोपगमो न सा
धीयान् इच्छान्तरसमानकर्तृकत्वमादाय दर्शितस्थलेऽतिप्रसंगतादवस्थ्यात् स्वसमानकर्तृकत्वस

कु॰ति त्वेनत्वदिच्छारूपस्वपदार्थानवगमेऽप्युत्पत्त्यनुपपत्तिः नचसमानकर्तृकस्यसंबंधतोपगमेतत्रशक्तिग्राहकका
कानुशासनविरोधः ततोधातोः समानकर्तृकादिच्छायांयेतिसूत्रसनः समानकर्तृकत्वार्थकतांनप्रतिपा
१० दयति ः तस्यद्गीच्छाकमत्वेनसमानकर्तृकत्वेनचस्वार्थपराद्धातोरिच्छारूपार्थेसनभवतीत्येवार्थः इच्छा
10 धात्वर्थयोः संसर्गतयासमानकर्तृकत्वविवक्षायामपिचसमानकर्तृकत्वापरक्तार्थपरत्वंधातोर्निर्वहतीति
इच्छामात्रशक्तिग्राहकंतत्सूत्रमिति एवंतोत्तरेच्छार्थविहितपत्रकाम्यजंतेधातोरिच्छार्थकतयासमन्वयाविशे
षेपिसन्नंतधातुवत्सकर्मकतातदंतर्गतप्रातिपदिकस्येच्छाकर्मबोधकतयातदाकांक्षाविरहात् नचपुत्रीयती
त्यादौक्यजादिप्रकृत्यर्थस्यपुत्रादेः क्रियात्वाभावेनाकर्मकत्वेपिआत्मनः पाकमिच्छतिपाकीयतीत्यादौप्र १०

कृत्यर्थपाकादेः सकर्मकतया सन्नंतसमुदायवत् वघञाद्यंतपाकादिसमुदायस्य सकर्मकतायाउर्वीरनयातेतुलेपा
कीयतीत्यादिप्रयोगापत्तिरितिवाच्यं कृधातुसमानार्थकतयेरिवसन्नंतसमानार्थकवयजंतादेरपिकर्मतावोधक
सुप्साकांक्षत्वानुपगमेनतथाप्रयोगप्रसंगात् कृदंतकर्मत्वविवक्षायांतुषष्ठ्यावाधात् द्वितीयायाअप्रसक्तिः न
चधात्वर्थयवक्रुयोगेकर्तृकर्मणोः कृतीत्यस्यद्वितीयावाधकत्वेकं सकर्मकवधमाचष्टेकंसंघातयतीत्यत्रद्विती
यानस्यात् कंसस्याख्यानकर्मत्वायोगेनवधकर्मतयैवतदुत्तरंद्वितीयासमर्थनादितिवाच्यं कृदंतोत्तरंयत्राख्या
नार्थेणिचतत्रप्रकृतिवच्चकारकमित्यनेनकृदंतकारकस्यरायंतत्प्रकृतिप्रतिपाद्यक्रियाकारकत्वस्यातिदे
शात् राजानंगमयतिसूर्यमुद्गमयतीत्यादौ ण्यंतधात्वर्थयोगेयथाप्रकृतेः कर्मणोद्वितीयांतथाणिप्रत्ययांतकृदंत

कु.ति.
११

कर्मणापीतिलाभात्तत्कृदंतकर्मणः कंसादेर्द्वितीयोपपत्तेः तथाविवक्षायांतु तंडुलस्य पाकीयतीति प्रयोगश्च
तदेवकारकविभक्त्यर्थस्य वृत्त्येकदेशेनाप्यन्वयव्युत्पन्नत्वात् संवंधविवक्षाया अप्रयोगः अभेदविवक्षयापं
डितं पुत्रीयतीतिवत् परपुत्रादिगोचरेच्छावति पुंसि पुत्रीयतीत्यादयो न प्रयोगाः स्वपश्चात्मनस्त्वेनेन
पक्षितसंवंधियदिच्छाकर्मतद्बोधकसत्वे तात्क्यचकाम्यचोर्विधानात् संवंधित्वं च तत्संवंधित्वेन भानं तेन अस्म
दीयस्य पितुः पुत्रो प्रसिद्धस्तस्यापि स्वीयत्वेन पुत्रीयत्यमयमिति प्रयोगस्य सर्वसिद्धस्यानुपपत्तेः उक्तस्य लीय
पुत्रीयतीत्यादिवाक्यस्य प्रामाण्यवारणाय क्यजर्थेच्छायां पुत्रादेर्विषयित्वमात्रेण संवंधः किंतु स्वाभेभा
समानसंवंधप्रतियोगितया यो विषयस्तादृशपुरुषवृत्तित्वसहितमित्युपेयं स्वसंवंधस्य क्यजाद्यवाच्यत्वेपि ११

उक्तसंबंधेनैवेच्छायांस्तुवंतार्थस्यान्वयइतिसूचयितुंप्रदर्शनायैवसूत्रेआत्मनइत्युपात्तं आत्मनइतिषष्ठ्यर्थेसंबंधस्य
नयाता: कर्मणइतिसूत्रात्तदुक्तायामिच्छायामन्वेति अव्यावर्त्तकत्वादुक्तार्थलाभाप्रयोजकत्वात् अपितुस्तुपइत्यर्थ
स्तुवंतादित्यत्रस्वैवेषितः संबंधितयाइच्छाविषयार्थकत्वं एवंचेच्छाकर्मणः स्तुवंतादेषितुरिच्छायामितिवृत्त्याव
पिपविषितः स्तुवंतादित्येवयोजना यथाश्रुतेदर्शितानुपपत्तेरितिवोध्यं भृत्यंपुत्रीयतीत्यादावाचारार्थवि-
हितक्यजंतस्यसकर्मकत्वंयुज्यतएव तथाहितमिवाचरतीत्यर्थेउपमानवाचिनःक्यच्विहितःतमिवाचर
तीत्यस्यतत्तुल्यंजानातीत्यर्थः आचारपदस्यव्यवहारमूलकज्ञानपरत्वात् तुल्यतयाज्ञानंक्यजर्थः तच्चसकर्मकमेव
तत्रचतत्तुल्यत्वेप्रतियोगितयापुत्रादेरन्वयः पुत्रादिपदमेववागौण्या पुत्रादितुल्यपरंज्ञानमात्रंवाजर्थः

कु.त्रि. तत्रचस्वाभेदावगाहित्वसंबंधेनप्रदितत्वस्यान्वयः नचैवंपुत्रादिपदमुपमेयार्थकमेवनोपमानार्थकमिति
१२ कथमुपमानादाचारइतितदुक्तंरेकत्वेवाविधानंतत्रसंगच्छतइतिवाच्यं पुत्रादिपदस्यतत्साधकत्वेपितत्त्वप्रति
12 योगितयोपमानपुत्राद्यर्थकत्वात् अतएवचतस्यकर्मवाचकत्वे पुत्रादितत्त्वस्याचारकर्मत्वात्तत्सम्यगुपपद्यते
एवमतेउपमानपदस्यकर्मवाचित्वंआचारकर्मविशेषणतत्त्वप्रतियोगिवोधकत्वरूपंवोध्यं वस्तुतः पु
त्रमिवाचरतीतिस्य पुत्रंयथाव्यवहरतितथाव्यवहरतीतिवार्थः व्यवहारश्चप्रतिपालनत्वादिनाज्ञानंप्रतिपाल
नादिव्यापारोवा एवंचपुत्रकर्मकव्यवहारतत्त्वव्यवहारकर्तृत्वमर्थः पुत्रवेद्वादेर्यथास्वजन्याह्लादतत्त्वतयोप
मानोपमेयभावः पुत्रभृत्ययोरपिस्वकर्मकव्यवहारतत्त्वतयातइतिपुत्रपदस्योपमानवाचिताः आचारनिष्टमा १२

दृश्यप्रतियोग्याचारकर्मवाचिताच आचारसदृशाचारपकावोऽर्थः प्रथमाचारेकर्मतासंबंधेनपुत्रान्वयः अमाधेता
त्वपत्त्रुत्ययविधानेपिधात्ववयवतयाल्लुमस्यप्रमादेर्नियमेनानुपस्थितेः कर्मत्वस्यसंबंधतयामानमुपेयते
यथाराजपुरुषप्रतिसमासत्तूपप्रादिपदिकावयवलुप्तषष्ठ्यादिप्रतिसंधानानियमाद्विभक्त्यर्थनार्थविशिष्टे
पूर्वपदस्यलक्षणापेयते द्वितीयेचाचारेभ्रमस्यकर्मतयाव्यंजनस्यसकर्मकत्वमिति ऊयांप्रासादीयतीत्यादी
आधारत्वेपापमानवाचिसप्तम्यंतोत्तरविहितव्यंजनंतस्यनसकर्मकता तत्रद्विप्रासादाधिकरणकाचार-
त्वस्याचारः व्यंजनार्थः सचावस्थानत्तूपपवेत्यकर्मकपवेतिऊयास्तत्राधिकरणतयातनःसप्तम्येच अव
स्थानयोः सामंचैकजातीयस्तुपवजनकत्वादिनाप्रविशेषयद्दविषयत्वेनवा दंसइवाचरतिदंसायतेदंस

व्यु॰त्रि तीयादेरुपमानवाचिकर्तृवाचकपदोत्तरत्वांउ॰ तत्क्विवंतधातुरप्यकर्मकः तत्रहंसादिकर्तृकाचारतुल्याचारस्यगमनादिरूप
१३ स्यवाउं॰तार्थत्वेपिगम्यादिशतिपाद्यतावच्छेदकसंयोगादिरूपफलानवच्छिन्नस्यैवतदर्थत्वोपगमात् शाब्दज्ञानादिरूपस्तवि
13 षयकव्यापारात्मकस्याचारस्यकचित्तदर्थकत्वेपिविषयत्वरूपकर्मान्वयरूढस्यैवतस्यतदर्थत्वोपगमात् कर्मांरूढ व॰
स्यचकर्मान्वयनिराकांक्षत्वादिकंस्वयमूह्यं॰ कृत्यर्थकधातुयोगेश्चसाधनत्वादिज्ञानविशेष्यताप्रयोज्यः साध्यताविशेषएव
कर्मत्वंद्वितीयार्थः नतुविषयतामात्रं यत्रघटंकरोतीतिप्रयुज्यतेतत्रकपालंकरोतिजलाहरणंकरोतीत्याद्यप्रयोगात्
ग्रथैवंकाशान्कटंकरोतिकाष्ठंभस्मकरोतीत्रकाशकाष्ठादिपदोत्तरंद्वितीयानुपपत्तिः तत्रकृतिनिरूपितोक्तविष
यताविरहादितिचेत् उपादानीयविलक्षणविषयतापिद्वितीयार्थः सा– १३

चहितीर्थांतरोपस्थापणस्मार्थीयविषयताविशिष्टायामेवक्तृतावन्वेति अतःकटादिरूपकर्मांतरासमभिव्याहा
रेणकाशान्करोतीत्यादौनप्रयोगाः अथैवमपिकाष्टंभस्मकरोतिदुग्धंदधिकरोतीत्यादौकाष्टदुग्धादेः कर्मत्वानुप
पत्तिः तस्यभस्मदध्याद्युपादानताविरहात् काष्टदुग्धादिनाशानंतरमेवतदारंभकपरमाणुभिर्भस्मदध्या
द्यारंभात् उत्पन्नाश्रयस्यैवचोपादानत्वात् विभिन्नकालयोराधाराधेयभावविरहात् कारणस्यैवोपादानत्व
मितिनियमाच्च नचपरिणामवादविद्वेषिणांनैयायिकानांकाष्टादेर्भस्मादिरूपद्रव्यांतरकारणत्वे अपितत्प्रति
बंधकत्वमेव द्रव्यवतिद्रव्यांतरानुत्पत्तेरितिचेन्न कर्मद्विविधंभवतिप्राप्यंप्रकृतिविकृतीच तत्रशब्दक्रियाजन्यफ
फलशालिगम्यादेर्ग्रामादिर्ज्ञानादेर्विषयश्च क्रियानिष्पाद्यं यत्नाद्विकृतिरूपं यथापाकादेरोदनादियथावाक्रृतेर्मात्रा

मु.ति कटादिव प्रथमेतंडुलादिरूपपूर्व्वद्रव्यविनाशेनौदनादेर्निवर्त्तनं द्वितीयेच पुष्पादिरूपपूर्व्वद्रव्यमविनाश्यतत्रैव संदर्भादिवि
१४ शेषनिष्पादनेनविशिष्टमाल्यादेर्निवर्त्तनम् तृतीयेच काशादिरूपपूर्व्वधर्म्मिणमविनाश्यतत्रैव कटादिरूपधर्म्मिनिष्पादनं
रूपवच्छिन्ने पारिशेषिकमेव विकार्यपदं प्रकृतिरूपं कर्म क्रियया वस्त्वंतरनिष्पत्तये पूर्व्वभावविशिष्टस्य यस्यासत्त्वं रूपेण विका
14 र्योनिर्वाह्यते तत् यथा पाकादेस्तंडुलादिकृतेः पुष्पकाशादि तत्र प्रथमस्थले तंडुलादिरूपधर्म्मिनाशादेव पूर्व्वभावविशिष्टत
दसत्त्वमोदनादिधर्म्म्यंतरनिष्पादकं ऽन्यत्र तु धर्म्मिणः काशकुसुमादेः सत्त्वेपि कटसंदर्भादिविरुद्धरूपपूर्व्वभावासत्त्वेन
तद्विशिष्टस्यासत्त्वे कटसंदर्भादिनिष्पादकक्रियातो निर्व्वहति एवंच तंडुलानोदनं पचतीत्यादौ प्रकृतिकर्म्मो
त्तरद्वितीयाया नाशकत्वमर्थः तंडुलाद्यन्वितनाशकत्वं पाकेऽन्वेति निर्व्वर्त्यकर्म्मोत्तरद्वितीयायास्तु उत्पादकत्वमर्थः १४

ष्टोदनाद्यन्वितस्यतस्यनाशकत्वविशिष्टेऽन्वयःनाशेचोत्पत्तेःप्रयोजनकत्वमुद्देश्यतावच्छेदकविधेयभावमहिम्नानि
यमतोभासते अतः पाकस्यतंडुलाद्यारंभकसंयोगनाशकत्वेतन्नाशस्यद्रव्यांतरोत्पत्तौद्रव्यनाशेनान्यथासिद्धत
याप्रयोजकत्वबाधेनसंयोगमोदनंपचतीतिनप्रयोगः वस्तुतस्तुनिर्वर्त्यकर्मासमभिव्याहारस्थलेसंयोगंपचती
तिप्रयोगवारणायसंयोगनाशद्वारानाशकत्वमेवद्वितीयार्थोवक्तव्यश्इतिकृतंप्रयोज्यप्रयोजकभावबोधनेन तं
डुलमोदनंकरोतिकाष्ठंभस्मकरोतिदुग्धंदधिकरोतीत्यादावपिशक्तकर्मांतरद्वितीययातन्नाशकत्वंकृतौप्रत्याय्यते
निर्वर्त्यकर्मांतरद्वितीययाचविषयताविशेषउत्पादकत्वंचामिलितमुभयंवाकृतौबोध्यते काशात्कटंकरोतिऊस्त
मानिमौक्तिकानिवास्वंजंकरोतीत्यादौकाशादिपदोत्तरद्वितीयंकृतौविषयताविशेषमेवबोधयति काशादुच्छे

सुत्रि
१५
15

दकतायास्तत्रबाधात्कटमित्यादौद्वितीयार्थः सर्ववत्स्रगादिपदार्थविन्यासविशेषविशिष्टकुसुमादेर्नेकुसुमाद्युपादान
कहेतिविषयताऽपितुविन्यासादिरूपविशेषस्यैवतस्यैवचकृत्यधीनोत्पत्तिरितिस्रजमित्यादिद्वितीयांतस्यविशिष्ट
सत्तानिर्वाहकत्वमर्थः विशेषणोत्पादकस्यापिस्वरूपसंबंधविशेषरूपंविशिष्टसत्वनिर्वाहकत्वयदत्तेमेव अग्निःश्यामे
रक्तंकरोतीत्यादावचेतनकर्तृकव्यापारबोधककरोतिसमभिव्याहृतश्यामादिपदोत्तरद्वितीयायाअपिनोपादाना
ख्यविलक्षणविषयतार्थकत्वसंभवः अपितुतदंतेनश्यामरूपाविशिष्टासत्वनिर्वाहकतारूपंविशिष्टा-
च्छेदकत्वंतादृशव्यापारेप्रत्याय्यते घटंरक्तंकरोतीत्यादावपिघटादिपदस्यारक्तत्वविशिष्टघटादिलाक्ष-
णिकतयाविशिष्टघटघसत्वनिर्वाहकत्वंप्रतीयते प्रकृतिविकृतिभावस्थलेकर्माख्यातेनप्रकृते ॥ १५

कर्मत्वमेव प्रत्याय्यते उतः काष्ठानि भस्मराशिः क्रियन्ते इत्यादौ आख्यातार्थविशेष्यकाष्ठादिवाचकपदस
मानवचनत्वमाख्यातस्य न तु निर्वर्त्यभस्मादिरूपविकारवाचकपदसमानवचनता अथैवं निर्वर्त्यवा
चकपदात् अप्रथमा न स्यात् अपि तु द्वितीयैव तत्कर्मताया लकारेणानभिधानात् यत्तु उभयकर्मत्वमेव लकारेणाभि
धीयते प्रधानाप्रधानकर्मसमभिव्याहृते नीवह्यादि दुह्यादिरूपद्विकर्मकोत्तरकर्मप्रत्ययस्यैव कर्मद्वयानभिधायकत्व
नियमात् प्रकृते च कर्मद्वयस्यैव तुल्यत्वात् विकृतेराख्यातार्थविशेष्यत्वेपि आख्यातस्य तत्समानवचनत्वानियमात् ए
ह्रानिवाचकः संख्या प्रकृतेविकृतेर्न ह्रीत्यनुशासनसिद्ध प्रकृतिविकृतिसमभिव्याहृतलकारीयविकारसंख्याबोधक
त्वाभावश्चात्र निर्वाह्य इति उक्तस्थले न क्रियापदस्यैकवचनान्तता तदन्वितसंख्याबोधकस्यैवाख्यातस्य तत्पदसमानव

व्यु॰नि चनत्वनियमात् नत्वतद्विशेष्यकस्वार्थकर्मत्वादिबोधजनकाख्यातमात्रस्येतितदस्तुविकारविकारिणोर्द्वयोराख्यातार्थवि
१६ शेष्यत्वेवाक्यभेदापत्तेः घटपटौस्तः घटपटौदृश्येतेइत्यादौविशेष्यभेदेपिविशेष्यतावच्छेदकद्वित्वादेरेकथाभाना
न्नवाक्यभेदः अत्रचतादृशपविशेष्यतावच्छेदकभानास्ति येनतत्रैवात्राप्येकवाक्यतानिर्वहेत् नचागत्याइष्यतए
16 वात्रवाक्यभेदइतिवाच्यंतथासत्येकवाक्यार्थपरस्यकाष्ठंक्रियतेभस्मक्रियतइत्येतावत्प्रयोगस्यापत्तेः काष्ठं
भस्मक्रियतइतिवाक्यजबोधस्यकाष्ठविकृतिर्भस्मअन्यविकृतिर्वेतिसंशयनिवर्तकत्वानुपपत्तेः का
ष्ठभस्मनोः प्रकृतिविकारभावाभानात् काष्ठोच्छेदकत्वरूपकाष्ठकर्मकत्वभस्मनिर्वर्तकत्वरूप-
तत्कर्मकत्वयोरेकविशिष्टपरान्वयपवरूपैवोपदर्शितरीत्याकाष्ठोच्छेदप्रयोज्योत्पत्तिकत्वरूपकाष्ठ- १६

कत्वनिरूपकतावच्छेदकैर्जात्यस्याऽवशिष्टानुपस्थितावपिस्वर्गधर्मत्वेन ज्ञानेसंभवत्येव व्यापकताघटकाभाव

प्रतियोगितायाः स्वरूपतोऽवच्छेदककोटिप्रविष्टायाः अपिजातिव्यापकताभानेस्वर्गधर्मत्वादिनाभानेनबाधकस्वा।

र्गधर्मत्वादेरूपलक्षणतयाभानात् प्रतियोगितासंबंधेन प्रतियोगिप्रकारकज्ञानएवप्रतियोगिकोटौउपलक्षा।

णाप्रकाराभाननियमात् प्रकृतेचकारणताशरीरघटकाभावस्यप्रतियोगिताप्रकारेणाभाननियमात् प्रत।

एवस्वरूपतोवह्नित्वावच्छिन्नप्रतियोगिताकाभावस्यवह्नित्वाद्यवच्छिन्नव्यापकत्वोपलक्षितधर्मावच्छिन्नाभाव।

त्वेनलक्षणप्रवेशस्यसंभवदुक्तिकता इत्थमेवचेष्टतावच्छेदकधर्माणामुपलक्षणीभूतेनेष्टतावच्छेदकत्वेन

व्यापकताघटकाभावप्रतियोगितावच्छेदककोटिप्रविष्टेनापिइष्टतावच्छेदकधर्माणांसर्वसाधारणशक्तिग्र

मु-त्ति. हेभानमुपपद्यतेइति एतेननियतोत्तरवर्त्तितावच्छेदकधर्मवत्सर्गकत्वस्यविध्यर्थतामतेयागादिधा-
१८ र्मिकताद्दशाकारगताग्रहस्यप्रवृत्तिहेतुतावाच्या यदद्येत्वयागचस्वर्गादिधर्मिकं नियतोत्तरवर्त्तिता
17 वच्छेदकधर्मवत्त्वयागादिसाध्यताज्ञानस्यप्रवृत्तिहेतुत्वे ताद्दशसाध्यताविशिष्टमात्रस्यविध्यर्थ
त्वंचलाघवं ताद्दशसाध्यतायानिरूक्तसाधनतांतर्गतत्वादितीष्टसाधनत्वस्यविध्यर्थत्वंप्रवर्तकत्वं
चव्याहन्येत एवंयत्रकारणावच्छेदकधर्मोऽप्यनुपस्थितोऽतिप्रसक्तेनन्यूनवृत्तिनावाधर्मेणकारण
मुपलक्षितंतत्रशाव्दाकारणतानुपपत्तिरित्येतिनिरस्तम् व्यापकताघटितकारणगतायाः साध्यतामपस्या
गरीस्याएवोक्तरीत्याप्रवर्तकत्वादिसंभवात् ताद्दशसाधनतांशशरीरव्यापकतावच्छेदकत्वेनैवकारणताम १९

च्छेदकप्रवेशात्तथात्वे विशिष्टतदुपस्थित्यनुपस्थित्यनुपयोगाच्चेति केचित्तु विजातीयस्वर्गनिरूपितसमवायएव
स्वर्गादिनिष्ठयागादेः प्रत्यतावच्छेदकसंबंधः तथाच वैजात्यस्य संबंधघटकतयैव व्यापकताशरीरे नि
वेशात् नोपस्थित्यपेक्षानवाकारणताविघटकव्यभिचारावकाश इत्याहुः तदसत् विजातीयस्वर्गनिरू
पितसमवायत्वेन संबंधतायां मानाभावात् तादृशसंबंधघटितव्यापकतायाविधिप्रत्ययार्थत्वेन स्वर्गा
दिनिवैजात्यभेदेन शक्तिवाहुल्यप्रसंगात् तादृशकार्यसंबंधिघटितेष्टकारणतायाश्च प्रमाणान्तरेणाप्रत्या
यितत्वात् ततश्च शक्तिग्रहानुपपत्त्याशाब्दबुद्धौ तद्भावानुपपत्तेश्च नवेष्टतावच्छेदकत्वोपलक्षितस्वर्गत्वावा
च्छिन्नैककारणताघटकाधिकरणादिपदार्थैश्च खंडशः शक्तिरूपेयायाआकांक्षावशाच्चाधिकरणरूपा

कु॰ त्रि क्वचिदर्थे विजातीयसंसर्गनिरूपितसमवायसंबंधतयाभानात् तादृशकार्यसंबंधघटितकारणतायाः शाब्दबो
१८ धेभानमुपगंतव्यं नतुतादृशसंबंधांतर्भावेनशक्तिरीतिनकाचिदुपपत्तिरितिवाच्यम् एवंसतिसं
18 सर्गतात्पर्यानुरोधेनतादृशसंसर्गोपस्थित्यपेक्षायाउपरित्यात् नचतत्संसर्गेणविशेषणविशिष्टविशे-
ष्यपरत्वज्ञानमेवसंसर्गभाननियामकं तत्रापिचसंसर्गएवनतुविशेषणमितिनज्ञानापेक्षेतिवाच्यं
विशेषणविशिष्टविशेष्यस्यवाक्यार्थत्वेनपूर्वंसन्निश्चिततयातत्परत्वग्रहस्यशाब्दबोधात्पूर्वमसंभवा
त् तत्तत्संबंधिविषयतानिरूपितविशेषणादिविषयताशालिबोधपरत्वज्ञानस्यैवहेतुतयातत्रसं
बंधस्यविशेषणतयातदुपस्थितेएवकाश्यपत्वात् एवंविजातीयसंसर्गनिरूपितसमवायसंबंधं २०

नस्वर्गत्वावच्छेदेनजन्यतोपगमेस्वर्गत्वस्याश्वमेधजन्यत्वसामानाधिकरण्यमात्रमेवदिशब्देनापिप्रतीयते नतुस्वर्ग
त्वस्यजन्यतावच्छेदकत्वे प्रमामर्थ्यादसंभवाच्चेत्यादिमिश्रग्रंथविरोधः यत्तुवैजात्यमेवकार्य्यतावच्छेदकंतत्रसं
बंधविधयैवकारणताघटकं कार्यतावच्छेदकधर्मविशिष्टनिरूपितकार्य्यतावच्छेदकसंबंधेनकार्यवद्विष्टा-
भावप्रतियोगित्वस्यकारणताशरीरेनिवेशप्रयत्वात् इतितदप्यसत् कार्यस्यकार्यतावच्छेदकरूपेणैवनिवेशनीय
तयातद्भस्थित्यपेक्षाधौव्यात् नचनसंबंधसंकोचेप्रमेयत्वेनैवकार्यप्रवेशः संभवतीतिवाच्यम् विजातीय
स्वर्गवद्विष्टाभावप्रतियोगितात्वस्यागुरोरवच्छेदकत्वसंभवेविजातीयस्वर्गीयसमवायसंबंधेनप्रमेयवद्वि-
ष्टाभावप्रतियोगित्वत्वरूपगुरुधर्मावच्छिन्नाभावप्रसिद्धेः एतेनस्वर्गत्वमेवयागजन्यतावच्छेदकं अवच्छेदक

मु॰ त्रि॰ ताघटकसमवायसंवंधत्वंकेचननव्यभिचारइत्यपिनिरस्तम् तादृशसंवंधविशेषणेष्टतावच्छेदक

१९ विशिष्टस्यप्रमाणांतरावेद्यतयातत्रशक्तिनिश्चयासंभवात् नहिसमभिव्याहृतफलबोधकप-

19 दोपस्थाप्यतावच्छेदकत्वरूपेणलक्षणधर्मेणयथास्वर्गत्वादीनांशक्तिग्रहेमाने तथोपलक्षणीभू

ततादृशपदोपस्थाप्यतावच्छेदकसंवंधत्वेनविजातीयस्वर्गनिष्टसमवायादेरपितत्रभानसंभवः

स्वर्गपदाच्छुधसमवायेनैवस्वर्गत्वविशिष्टस्योपस्थितेः विशिष्टसमवायेनस्वर्गत्वविशिष्टस्य

स्वर्गपदार्थत्वोपगमेलक्षणाप्रसंगात् शुद्धसमवायेनस्वर्गत्वविशिष्टविषयककामनावतो

नधिकारप्रसंगात् मीमांशाकाग्रहररहः संध्यामु॰ — ॥ २

पाषीनइत्यानित्यतयानिष्फलेसंध्योपासनादाविष्टसाधनत्वस्यायोग्यत्वेनान्वयासंभवात् नेष्टसाधनत्वंलिङर्थः

अथसंध्यावंदनादेरप्यर्थवादोक्तस्यापिब्रह्मलोकवासादिफलसाधनत्वमव्याहतं यत्रनित्येऽर्थवादादावपि

नफलोपस्थितिस्तत्रापिफलाभावनिश्चायकप्रमाणाभावाद्योग्यतासंशयसंभवेनफलसाधनत्वमप्यन्वयोलि

ङादितःसंभवत्येव नचतद्बोधोनुपयोगीनिष्फलतयाज्ञातेचैत्यवंदनादौप्रवृत्तिनिवारणायइष्टसाधनताज्ञान

स्यप्रवृत्तिहेतुतावश्यकत्वेनानिविधेः प्रवृत्तिनिर्वाहायतस्यफलसाधनताबोधकतायाआवश्यकत्वादि।

तिचेन्नसंध्यामुपासतेयेचसततंसंसितव्रताः इतिवाक्यंइतिश्रुतौसततमितिश्रुतेः कदाचिद्यस्यसं

ध्यावंदनादिबाधस्तेनस्वीयसंध्यावंदनेब्रह्मलोकाद्याप्तिफलानुपधानस्यनिश्चिततयाः अहरहः ॥

कु.नि.
२०

संध्यावंदने ब्रह्मलोकावाप्तिसाधनतावोधनेपि तस्य संध्यावंदनत्वनिर्वाहात् यत्र च निमविशिष्टफ

लवोधकोर्थाऽर्थवादादिनास्ति तत्र विधिप्रत्ययेन इष्टत्वेन फलसाधनतावोधस्यजननेपि इच्छावि

षयतावच्छेदकस्वर्गत्वादिरूपविशेषप्रकारेण फलविषयकतत्साधनतावोधस्यानिर्वाहेण प्रवृत्त्यनि

र्वाहात् इष्टसाधनताज्ञानाघटितकारणस्तोमात्मिकायाः संध्यावंदनाद्यभावगोचरं नरकादिसा

धनताज्ञानाधीनन तद्गोचरद्वेषघटितसामग्र्याएव संध्यावंदनादौ प्रवर्त्तकतायाः उपगंतव्यतयानि

त्यस्य स्ते इष्टसाधनतावोधस्यानुपयोगितयादुर्वारत्वात् नच विश्वजितायजेतेत्यत्र विशिष्टफलाश्रव २२

णेपि यथा स्वर्गकामपदाध्याहारेण तत्समभिव्याहारात् विशेषणरूपावच्छिन्नस्वर्गसाधनताबोधस्तथापि नित्य
स्थलेपि विशेषधर्मप्रकारकस्वर्गसाधनताबोधसंभवात् उक्तप्रवृत्तिसामग्र्यंतरकल्पनमयुक्तमिति वाच्यं
बहुवित्तव्ययायाससाध्यविश्वजिद्यागेनेतरग्रामपश्वादिफलोद्देशेन प्रवृत्त्यनुपपत्तेः तद्विधेः स्वर्गफलतास्वा।
र्थ्ये निश्चयात्संध्यावंदनादेरल्पायाससाध्ये ग्रामादिफलोद्देशेनापि प्रवृत्त्युपपत्तेः तद्विधेः स्वर्गपरत्वनिश्चया
योगात् स्वर्गादिफलकामनारहितैर्मुमुक्षुभिरपि संध्यावंदनाद्याचरणाडुक्तप्रवृत्तिसामग्रीकल्पनसाव।
श्यकत्वाच्च तादृशसामग्रीं विनायासभिन्नादेरिष्टसाधने प्रवृत्त्यनिर्वाहाच्च न च तत्रापि पापध्वंसरूपेष्टसाधनता

वृत्ति
२३
23

ज्ञानात्प्रवृत्तिनिवृत्ति सुखदुःखाभावेतरगोचरेच्छायां इष्टसाधनताज्ञानस्य नियमतोपेक्षायां निष्फलपापध्वं
सस्यैष्टत्वासंभवात् नरकसाधनगोचरद्वेषस्यत— सगोचरेच्छाजनकत्वोपगमेऽस्मत्त्वमीदृत्वाया
मिष्टसाधनताज्ञानाघटितप्रवृत्तिसामग्र्याऽविवादात्तत्कृतिसाध्यताज्ञानसहितेच्छामयीतच्चिकीर्षितेः नि
ष्फलेसंध्यावंदनादौनिर्वाहेणप्रवृत्त्युपपत्तेः नचनरकानुत्पादकप्रायश्चित्तस्यसंध्यावंदनादेश्चफलमि
तिइष्टसाधनताज्ञानघटितैवप्रवृत्तिसामग्रीनरकद्वेषवंताचतदनुत्पादेनियमतएवेच्छेतितेषांनित्यसंध्यावंद
नाद्यनुष्ठानमुपपद्यते प्रत्यवैष्यनसंध्यान्नानुष्ठीयतइतिवाक्यंनरकानुत्पादस्यतत्प्रागभावात्मकस्यप्रतियोगि· २३

विकल्पेनफलत्वासंभवात् अत्यंताभावप्रतियोगिविरोधितयाकदाचित्पापोत्तरेणयस्यनरकदुःखंजनितंज
निघ्ननेवानतदात्मनिसत्वान्निमित्वेनचोभयोः फलत्वासंभवात् योगक्षेमसाधारणसाधनतायाश्चगुरुशरीरत्वे
नेप्रहतैन्नियुपयोगित्वात् यदपिमंडलीकुर्यादित्यादिवाक्यप्रामाण्यवारणायेष्टसाधनत्वस्यविपर्ययत्वमाव
श्यकमितितदपिन मंडलीकरणादिजन्यतद्धंसादिरूपफलेपिकदाचित्कस्यचिदिष्टसाधनताभ्रमेणइकोम
त्वामंडलीकरणादावपीष्टसाधनत्वबोधेनइष्टसाधनत्वविपर्ययतामतेपितद्वाक्यप्रामाण्यस्यावश्यकतयाइष्ट
पत्तेः स्वर्गकामोमंडलीकुर्यादितिवाक्यजन्यबोधेचस्वर्गकामनायामंडलीकरणादिनिष्टकर्तव्यत्वप्रयोजकः।
त्वभानेननतदर्थबाधेनतद्वाक्याप्रामाण्योपपत्तेः नचेष्टसाधनत्वविधिप्रत्ययार्थत्वानुपगमेस्वर्गकामोयजे।

वृ॰त्ति॰
२४
24

तेनादिवाक्यात् स्वर्गादौ प्रवृत्त्यनुपपत्तिः तत्राभावगोचरद्वेषघटितसामग्र्यसंभवात् यागाद्यभावस्य नरकादि
त्वपदिष्टसाधनत्वाभावात् इष्टसाधनत्वबोधकप्रमाणाभावेन तज्ज्ञानघटितसामान्या अपि भवन्नतेर्दुर्घट
त्वादितिवाच्यं इष्टसाधनत्वस्य विध्यर्थतावच्छेदेपि स्वर्गासाधनेन स्वर्गाकामनाधीनकृतीसाध्यमितितत्वा
यवलात्स्वर्गकामकृतिसाध्यतान्वयितावच्छेदकतया स्वर्गसाधनत्वस्योक्तविधिजन्यबोधोभानात् यागा
दाविष्टसाधनताज्ञानादेवप्रवृत्तिनिर्वाहात् इत्थंच संध्यावंदनादौ तत्कालावछिन्नशौचादिकमेवा-
धिकारोनतुफलकामनापि अतः फलकामशून्यस्यापिशौचादिमतः संध्यावंदनाकरणं प्रत्यवा
यजनकं फलकामनायास्तत्राधिकारत्वेतच्छून्यस्यानधिकारितयातदकरणेन प्रत्यवायमावहेत्

नचमुमुक्षापवादेनस्वर्गादिफलकामनायाः कदाचित्संभवेपिनरकाभावरूपफलेनियमतएवइच्छासंभ
वतीतिनाशौचादिमतः संध्यावंदनाकरणस्यप्रत्यवायजनकत्वानुपपत्तिरितिवाच्यम् नरकाद्यनुपस्थितेस्त
वतदभावाज्ञानेनतदिच्छाविरहोपपत्तेरित्याहुः तदसत्तद्ध्वंसादेरत्यंताभावविरोधितायानिष्प्रमाणकत्वय
नरकात्यंताभावस्यैवप्रायश्चित्तसंध्यावंदनादिफलसाध्यतासंभवाद्दृष्टसाधनताज्ञानाघटितप्रवृत्तिसामग्र्य
प्रसिद्धेः करणांतरकल्पनापेक्षयागुरुत्वशरीरक्षेमसाधारणसाधनताज्ञानस्यैवसर्वत्रप्रवृत्तिहेतुत्वेनेति दिक्।
उच्यतेइत्यादिप्रतीतिबलात्स्वरूपसंबंधविशेषरूपस्यक्षेमसाधारणसाधनत्वस्योपगमेतच्छरीरगौरस्या
भा

बु.त्रि.
२५
९७

वाच्चेति नित्यस्थले शौचादिफलकामनयोरुभयोरधिकारत्वेपि प्रत्येकमेव तयोरधिकारतानतु मिलित
योरिति फलकामनाशून्यस्यापि शौचादिमतोऽधिकारतया तस्यापि नित्याकरणं प्रत्यवायजनकं अथवासं
ध्यावंदनाकरणेन प्रत्यवायजननेऽधिकारैकदेशशौचादिमत्वमेव सहकारि नतु फलकामनापि तद
सत्वेपि प्रत्यवायोत्पत्तेः सर्वसिद्धत्वात् एतेन संवलिताधिकारानुगमे शौचादिशून्यफलकामनाव-
तोऽदैवान्नित्या करणं प्रत्यवायं जनयेदिति निरस्तम् अत एव नित्यकाम्यजयंतीव्रतादौ फलकामना
या अधिकारत्वस्य सर्वसिद्धतया शौचादिमतः फलकामनारहितस्य तदकरणं प्रत्यवायं जनयतीति २५

अपरेतुचैत्यंवन्देतेतिवाक्यस्यप्रामाण्यानुरोधेनेष्टसाधनत्वस्यविध्यर्थत्वमावश्यकं कृतिसाध्यत्वादिमा।
तिचैत्यवंदनादौकृतिसाध्यत्वाद्यभावस्यनज्ञावोधनेनतद्वाक्यस्याप्रामाण्यापत्तेः कृतिसाध्यतायाश्चविधित्वे।
निर्युक्तिकेनतदनंगीकारेपिकृतेराख्यातस्यसामान्यार्थतयाविधिप्रत्ययस्यापितदर्थकतयापचेत्यादौकृतेःर्य
कानुकूलकृमानस्यावश्यकतयाऽर्थासाकादावपिकृतिसाध्यताभानात् कृतिसाध्यतायाविधित्वेपिनतत्काल
तत्तत्पुरुषविशेषितकृतिसाध्यताविषयकस्यप्रवर्तकज्ञानस्यशाब्दबोधोत्तरमेवस्वीकरणीयतयाविधिवाक्यज
शाब्दबोधतः सात्तात्मकृत्यनिर्वाहात् अस्तुवासाध्यतासंबंधेनैवाख्यातसामान्यार्थकृतेःक्रियायांविधिप्रत्ययजन्य
बोधेभानेभवतिकेचित्चिकीर्षापिसाध्यतासंबंधेनकृतिप्रकारिकाक्रियेत्येवनचलत्यादिस्थले आख्यातार्थकृतेःक्रिया

मु ति
२६

विशेष्यतयैवभानमितिव्युत्पत्तेः क्रमसाम्येचैतत्पादौनतस्याः क्रियाविशेषणतयाभानसंभवइतिवाच्यम् व्युत्पत्तिवै
चित्र्येणातदुपपत्तेः शाक्यभेदेपिव्युत्पत्तिभेदेवाधकाभावात् अतएवप्राचीनैर्वयागयाकादौलौकिकप्रमाणादेव
कृतिसाध्यतावोधोनिर्वहतितीयदपिनकलंजंभक्षयेदितिनिषेधविधेः प्रमाणानुरोधेनवलवदनिष्टाननु
वंधत्वस्यविध्यर्थविषयकप्रवेशः निषिद्धेपिकलंजभक्षणादौतृप्त्यादिरूपेष्टसाधनत्वसत्वेनतदभावस्य
नञावोधनेप्रामाण्यानुपपत्तेः वलवदनिष्टाननुवंधित्वस्यविधित्वेतस्यैवाभावोवलवदनिष्टनरकानुवंधि
नितत्कर्मणएववोधितोवोध्यतइतिनतत्प्रामाण्यानुपपत्तेः वलवदनिष्टाननुवंधित्वस्येष्टसाधनताविशेषणत
याबाच्यत्वेविशिष्टाभावस्यैवशाब्दवोधेभानंसोपिविशेषणाभावायत्तेवाधितः कलंजभक्षणादौविशिष्टाभा २६

26

बबोधानंतरमेव तल्लिंगकानुमानगम्यो बलवदनिष्टाननुबंधित्वरूपस्तदननुबंधित्वाभावः प्रवर्तकमिव निवर्तक
मपि ज्ञानेष्टकृतिवाक्यात्परं परैरेव न तत्साक्षात् एतन्मते च न तादृशाभावस्य शाब्दबोधे भाने पदार्थैकदेशतयाऽन्तर
विशेषणतयोपस्थितत्वेन नञर्थविशेषणतयाऽनिष्टाननुबंधित्वान्वयासंभवात् वस्तुतो विशिष्टशक्तो विशेष्य
विशेषणभावे विनिगमनाविरहात् पृथगेव बलवदनिष्टाननुबंधिताप्यवाच्यत्वम् न च बलवदनिष्टाननुबंधि
त्वेइष्टसाधनत्वस्य विशेष्यत्वे विधिवाक्यतः क्रियाविशेष्यकेष्टसाधनताज्ञानासंभवात् क्रियागोचरचिकीर्षा
यर्थं विधिवाक्यजशाब्दबोधोत्तरमिष्टसाधनत्वप्रकारकक्रियाविशेष्यकज्ञानानंतरं कल्पनीयमिति तदकल्पनप्र
युक्तलाघवमेव बलवदनिष्टाननुबंधित्वस्य विशेषणत्वेपि विनिगमकमिति वाच्यम् क्रियायां बलवदनिष्ट

मु त्रि॰ साधनत्वज्ञानस्यापि तज्ज्ञो चेदिच्छाहेतुतया बलवदनिष्टासाधनत्वस्य इष्टसाधनत्वविशेषणत्वमते क्रियाविशेष्य
२७ कतत्प्रकारकज्ञानं तस्य विकल्पनीयतया मतद्वयेकल्पनासाम्यात् यदि च बलवदनिष्टसाधनमेव द्वेषा
नमेव द्वेषसामग्रीत्वेनेच्छाप्रतिबंधकं न तु तदसाधनत्वाज्ञानमिच्छाहेतुः तदोक्तस्य विशेषणाभावविनिगमस्य
संभवेपि विशिष्टस्याऽवाच्यत्वे शपनविध्यर्थवाधेन तद्विधायकश्रुतेरप्रमाणत्वप्रसंग इति शक्तिभेदस्य शपने केवले
ष्टसाधनतविषयस्य चोपगमस्यावश्यकः मीमांसकतापि तत्र बलवदनिष्टासाधनत्वस्याभानं लिखितं तदभानं
वीविशिष्टशक्तिपक्षेनसंभवति विशिष्टशक्तिः विशेषणविनिगमेकेन विशेष्याशाभासकत्वात् ततद्धर्मप्रका
रेणपदार्थविषयकशाब्दबोधे ततद्धर्मांशेशाकतावच्छेदकत्वपर्याप्त्यवगाहिज्ञानस्य वा हेतुत्वात् ॥ ग्रस २७

थाविशिष्टस्वर्गादिवाचकस्वर्गादिपदादिनालक्षणां केवलसुखत्वादिप्रकारकशाब्दबोधापत्तेः यदि च केव-
लसुखत्वादिनास्वर्गादिरूपसुखबोधो लक्षणामंतरेण स्वर्गादिपदादिभ्यां न एव नेष्यते परं सुखत्वांतरबोधस्तत्र
प्राक्तिविरहादिति शक्यतावच्छेदकपर्याप्त्यावगाहित्वमनुपयोगीत्यवधेयं तदापि बलवदनिष्टाननुबंधित्व-
विशिष्टेष्टसाधनत्वस्य शक्यतायां प्रवेशेनैः निष्टेवैदिवधबलवदनिष्टासाधनत्वनियतत्वेन तत्त्वसाधनत्व
विशिष्टत्वेन विधिप्रत्ययवाच्यतया सुतरां तत्र विध्यर्थत्वानिर्वाहे एवं प्रत्ययत्ने श्येनस्याहष्टद्वारकत्वचरतर्दि-
सालक्षणानाक्रांततया बलवद्दुःखाजनकत्वमिति मतांतरं तदसत् तथा सति श्येनतात्त्विकप्रवृत्तिवार-
णाय बलवद्दुःखाप्रयोजकत्वज्ञानस्यैव प्रवृत्तिहेतुतायाउपगंतव्यतया तस्यैव च विध्यर्थतायाआवश्यक

मुवा॰
२८

त्वेन श्येनेन व्याधानात् श्रुतेरप्रामाण्यप्रसंगतात्स्वस्थितिश्येनस्य हिंसात्वविरहे व्यभिचारतया नरकजनकत्वस्यउ
र्वीरत्वाच्च यत्तु अभिचरन्नित्यस्य वैरिवधगोचरप्रबलकामनाविशिष्टार्थतया तादृशकामनाविशिष्टमेव पुरुषस्य
बलवद्वेषविषयाऽजनकत्वरूपबलवदनिष्टाननुबन्धित्वघटकद्वेषानुदयात् तादृशकामनाविशिष्टस्यापि बल
द्वेषविषयाऽजनकत्वं श्रुतिवाक्यात्स्यात्तेन ध्वंसनं च श्येने बाधितमेव वैरिवधे उत्कटरागवतस्तज्जन्यनरके बलवद्वे।
षात्तत्समानातादृशनरकस्य वैरिवधोत्कटकामनाविशिष्टस्यापि द्वेषाऽविषयत्वात् न ह्येकदा एकप्रवर्तमानयो
रेकतरमपरविशिष्टस्यापीति मिश्राणां मालाभिप्रायवर्णनेन तदपि न बलद्वेषविषयदुःखजनकत्वप्रतियो।
गिकाभावस्यातिप्रसक्ततया बलद्वेषविषयदुःखजनकत्वत्वावच्छिन्नाभावस्य वाचनास्वीकारे पुरुषपुरु। २८

षविशेषीयबलवद्द्वेषविषयदुःखजनकत्वाभावस्य प्रत्ययासंभवात् । तादृशदुःखजनकत्वेऽप्यभावचखंडशा-
क्तिस्वीकारे विशिष्टशक्तिस्वीकारे परित्यागात् । एवं यत्रोत्कटरागो यदा तत्रैव नोत्कटद्वेषस्तदा तज्जन्यफले उत्क-
टरागदशायां च तज्जन्यदुःखरूपफलांतरे उत्कटद्वेषेन किंचिद्बाधकमिति वैरिवधे उत्कटरागदशायां च श्ये-
नजन्यनरकेवलद्वेषोद्भवापवादपवग्रस्तत्वा फलविशेषोत्कटरागघटित उपायगोचरोत्कटरागसामग्रीत
त्र च तज्जन्यतया ज्ञाते समस्ति फलांतरे फलांतरे पुत्कटद्वेषविरोधिनी तथापि नरके वैरिवधयोरेकतरं प्रति श्ये-
नस्य हेतुत्वाग्रहदशायां तयोर्बलवद्द्वेषरागयोर्युगपत्संभव एव यत्र दीक्षांगपशुघातस्य नरकासाधनतया
माहिंस्यादित्यत्रावैधहिंसैव विवक्षितेति श्येनस्य नरकासाधनत्वोपपादनेऽन्तरपि न तावता पिप्रभिचारवि-

युवा॰ धयातथात्वस्यदुर्वारत्वात् अथस्वत्वाद्युक्तिमबलेष्वानिष्टासाधनत्वाविनिर्मोकेनकंचिद्विधिबोधोपगमेश्ये
तेच्छागलमालभेतेत्यादावपितत्परित्यागसंभवात् अविरोधेनमाहिंस्यादित्यत्रश्रुत्यर्थसंकोचोनस्यादिति।
२५ सांख्यमतमेवसाधीयइतिचेत्स्यादेवअविरोधेपिब्राह्मणेभ्योदधिदीयतांतक्रंकौण्डिन्यायेत्यत्रैवसामान्य
विधेर्विशेषेतरपरत्वंश्रुत्यन्तिसिद्धमितिमाहिंस्यादित्यसंकोचयथवाकथंविद्वांधकामनयासंभवेनौत्स।
र्गिकार्थपरित्यागइतिहिंसानिषेधसंकोचेनैवोपपत्तौनच्येतच्छागमालभेतेत्यादौविधिप्रत्ययस्यबल
वदनिष्टासाधनत्वार्थपरित्यागइत्यर्थः अथयागपाकादिजन्यश्रमादावपिकदाचित्कस्यचिद्दल
वद्द्वेषोदयात् यजेतपचेतेत्यादौअप्रामाण्यप्रसंगोदुर्वारः यत्नबलवदनिष्टासाधनत्वे ॥

लौकिकविध्यर्थः किंतुनकलंजंइत्यादिश्रुतेः प्रामाण्योपपत्तयेवैदिकलिङ्‌ एवतदर्थकता तत्रापिबा-
लवदनिष्टंनरकमेवतादृशोण्णार्थः अतश्श्येनस्यविहितांतरीयभ्रमादेः कदाचिद्द्वेषविषयतयानयागादौवि-
ध्यर्थवादः इतितदपिनसाकंनभुंजीतेत्यादिवयकवाक्यस्यबलवदनिष्टजनकत्वनिषेधपरत्वेविना
प्रामाण्यानुपपत्तेः नथापिरोगंजनकत्वेविध्यर्थस्तदभावोनञाबोध्यतइतिचेत् दिक्कायोनगच्छेत्सध्ये
नोद्वहेदित्यादिज्योतिःशास्त्रवचनस्यानेकः पर्वतमारोहेदित्यादिवाक्यस्यैवैकागतिः तत्रापिविशिष्यत
तदनिष्टसाधनत्वस्यविधिप्रत्ययार्थत्वेशंकानेत्यप्रसंगः व्युत्पत्त्यनुपपत्तिश्चअत्रवदंतिद्वेषविषयता
वच्छेदकत्वोपलक्षितनरकत्वाद्याश्रयसाधनतात्वावच्छिन्नप्रतियोगिताकाभावकूटेनादृशाभावत्वे

बु॰ वा॰

३

नानुगतयैकैव विधिप्रत्ययस्य शक्तिः उपलक्षणीभूतद्वेषविषयविषयतावच्छेदकत्वं परित्यज्य नरकायसा
धनत्वं प्रतीयते इत्यत्र तात्पर्यमेव नियामकं प्रतियोगितायाः प्रकारतयाभानात् प्रतियोगितावच्छेदक
घटकनरकत्वादौ द्वेषविषयतावच्छेदकत्वस्योपलक्षणतया शक्तिग्रहे भानमविरुद्धं नच प्रमेयत्वादेरपि
उपलक्षणतया भानमविरुद्धमिति प्रमेयत्वादेरुपलक्षणतया नरकत्वाद्यनुगमकत्वे कथं न स्वीक्रियते
विनिगमकाभावादिति वाच्यम् दुःखाद्यसाधनत्वस्य विपर्ययविरहेण प्रमेयत्वादेः दुःखजनकत्वादिसाधा
रणेनोक्तरूपस्यैतस्यैव विनिगमकत्वात् नच तात्पर्याभावात् दुःखाद्यसाधनत्वाद्युद्बोधकत्वान्मतौ वि
पर्ययत्वेपि क्षतिविरह इति वाच्यम् तस्य विपर्ययत्वे तात्पर्येणाधुनिकानां न भुंजीतेत्यादिप्रयोगापत्तेः ३

इति विधिवादः समाप्तः ॥

३



च्२

मु·वा·

१

ॐ श्रीगणेशाय नमः गुरुचरणारविंदाभ्यां नमः शाब्दबोधे चैकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्यादया भासते स च क्वचि
द्भेदः क्वचित्तदतिरिक्तपवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः अभेदश्च प्रातिपदिकार्थे स्वसमानविभक्तिकेना
साम्यवद्भिन्नपूर्ववर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया भासते यथा घटो नीलो नीलघटमानयेत्यादौ घटादौ नीलादेः
न तु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात् स्वसमानविभक्तिकत्वं च
स्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वं साजात्यं च विभक्तिविभाजकप्रथमात्वादिना न तु समानानुपूर्वीकत्वेन साजात्यं
वेदाः प्रमाणं शतं ब्राह्मणा इत्यादावन्वयबोधानुपपत्तेः नञ्विंशत्याद्याः सदैकत्वे इत्यनुशासनात् शतं ब्राह्मणा इत्यादेः साधु
त्वेऽपि वेदाः प्रमाणं इत्यादयः कथं प्रयोगाः विशेष्यविशेषणवाचकपदयोः स्मृतिविशेषानुशासने समानवचनत्वनियमात्
अन्यथा घटो नील इत्यादेरपि साधुताप्रसंगात् समानलिंगकस्थले तथा नियमोपगमेन वेदाः प्रमाणमित्यादेः साधुत्वोपपा
दनेऽपि इति देवस्त उअवे इति कारिकायामन्वयः समुदितदेवविति न तद्धेतव इति काव्यप्रकाशव्याख्यायामसंगतिर्द्वीरेव एवम्

समानलिंगकस्थलेविशेष्यवाचकपदासमानवचनस्यापिविशेषणपदस्यसाधुत्वेतादृशस्थलेऔत्सर्गिकमेकवचनमेवसर्व
त्रविशेषणपदानंतरंप्रयोक्तुमुचितमितिप्रत्यक्षानुमानोपमानशाब्दाः प्रमाणानिपितरोदेवताइत्यादेरनुपपत्तिः मैवं य
त्रविशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायाअविवक्षितत्वंतत्रविशेष्यविशेषणपदयोः समान
वचनत्वनियमः अतएववृन्दारकोमाद्दवसौविश्वेदेवाइत्यादौद्वित्वविशिष्टयोः वृन्दारकोमाद्दवः प्रभृत्योर्विशेषणतयाविवक्षि
तत्वात्तद्वाचकपदस्यद्विवचनांतावेदाः प्रमाणमित्यत्रचविशेषणपदोत्तरविभक्त्यावहुत्वविरुद्धमेकत्वंविवक्षितं तत्रप्रकृ
त्यर्थतावच्छेदकेप्रमितिकरणत्वेऽन्वेति शाब्दप्रमाकरणत्वंचशाब्दत्वावच्छिन्नंयावच्छाब्दत्तिष्ठमेकमेवेतिनायोग्यता नच
पदार्थः पदार्थेनान्वेतिइतिव्युत्पत्तिविरोधः संपन्नोव्रीहिरित्यनेकव्रीहितात्पर्यकेप्येकवचनदर्शनेनतादृशव्युत्पत्तिसंकोचस्या

सु·वा·
२

वशपकत्वात् यदि चात्र स्वाश्रयप्रकृत्यर्थतावच्छेदकत्वसंबंधेन प्रकृत्यर्थ एव वशपकत्वान्वयः व्रीहित्वादिजातेः स्वरूपत एव व्रीह्या
दिपदशक्यतावच्छेदकतयाऽन्वयितावच्छेदकरूपेणानुपस्थितेस्तत्र पदार्थान्तरस्यान्वयानुपपत्तेरिति मन्यते तेन दाप्रकृतेपीष्टस्य
वगतिः यत्तु संपन्नो व्रीहिरित्यादावेकवचनोपस्थितान्वितानेकत्वनिष्ठत्वैकं नानाव्रीहिष्वन्वीयन्ते इत्युक्तेऽप्येव सामंजस्ये जाता
वेकत्वभावोपगमोपगमो निरर्थक इति तदसत् यतः स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूप स्वसजातीयद्विती।
यरहितत्वमेकवचनार्थः नत्वेकत्वमात्रं तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् अनुपयोगाच्च अत एव पशुना यजेतेत्यादौप
शुनिष्ठताद्दशैकत्वस्याविवक्षितत्वादनेकपशुकरणकयागादृष्टसिद्धिः साजात्यं च स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्ट २
प्रकृत्यर्थतावच्छेदकरूपेणात्र घटोऽस्तीत्यादौ घटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः एतद्देशवि

घमानत्वटनिष्ठभेदप्रतियोगितानवच्छेदकत्वस्यैवतत्रबोधात् तस्यचप्रसिद्धत्वात् एतद्देशेबहुत्वस्यसत्वदशायांतादृशवाक्य

प्रयोगस्यजात्येकत्वादेवसमर्थनीयः यत्त्वेकत्वाविवक्षायामपिभावाख्यातस्थलेएकवचनस्यसाधुत्वदर्शनात्संख्यायाअ

विवक्षणेपिसंपन्नोव्रीहिरित्यादावेकवचनोपपत्तेरित्यलंजात्येकत्वपरतयातत्समर्थनेनेति तदप्यकिंचित्करं भावाख्यात

स्थलेगत्यंतरविरहेणविभक्तेर्निरर्थकोपगमात् अत्रचसार्थकत्वसंभवेतत्परित्यागस्यानुचितत्वात् सतितात्पर्येतद्बोधक

स्यानुभविकत्वाच्चेति एवंत्रयःसमुदिताहेतुरित्यत्रहेतुपदंकार्योत्पादकतावच्छेदकसमुदायत्वावच्छिन्नपरंतादृशसमुदायत्वा

न्वितमेकत्वमेकवचनार्थः अतएववाक्यादीनांत्रयाणांतृणारणिमणिन्यायेनहेतुत्वशंकानिरासः तथासतितेषामेके

कसमवधानदशायामपिकार्योत्पत्तेरावश्यकतयातत्रितयपर्याप्तसमुदायत्वस्यकार्योत्पत्तिप्रयोजकतानवच्छेदकतयातेषां

श्रु·वा·
२
3

त्रयाणां तथाविधैकसमुदायत्वाश्रयत्वानुपपत्तिः एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्र त्रितयनिष्ठस्य पदशक्तिनिरूपक
पदार्थत्वस्यैकत्वं विवक्षितमिति तत्र विशेष्यपदस्य बहुवचनांतत्वेपि विशेषणपदस्यैकवचनांतत्वोपपत्तिः प्रत्यक्षानुमा
नेति सूत्रे प्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्य प्रत्यक्षानुमानादिनिष्ठस्यैकतयाबाधितत्वेन प्रमाणपदस्य बहुवचनांत
नेति एवं पितरो देवता इत्यत्रापि पितृपितामहादीनामेकरूपेण देवतात्वविरहेण पितृत्वपितामहत्वादिना पृथगेव त्यागोद्दे
श्यत्वरूपदेवतात्वात् उद्देश्यतावच्छेदकभेदेनैवोद्देश्यताभेदात् एकत्वस्याविवक्षया देवतापदस्य बहुवचनांतत्वेतिदिक् स्व
प्रकृतिकत्वं च स्वाव्यवहितोत्तरत्वेन प्रतिसंधीयमानत्वं तेन दधिसुंदरमित्यादौ विशेष्यपदानंतरं विभक्तेरसत्वेपि न क्षतिः २
तत्र विभक्तेरनुसंधानं विना शाब्दबोधानभ्युपगमात् एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्या

वहितपूर्ववर्तितयाप्रतिसंधीयमानत्वं तेनेदंतुधीत्यादौविशेषणपदानंतरंविभक्तेरसत्वेपिनक्षतिः अथनीलस्यघटइ।
त्यादौवमिपदार्थोपस्थित्यादिकारणसमवधानसंभवात् कथंननीलघटायभेदान्वयबोधइतिचेन्नतथाविधान्वयबो।
धौपयिकाकांक्षाविरहात् तथाहितादृशान्वयबोधेप्रथमाविभक्त्यंतघटादिपदसमभिव्याहृतप्रथमांतनीलादिपदत्वमे।
वासमस्तनीलघटपदाद्याकांक्षा समासस्थलेचघटपदाव्यवहितपूर्ववर्तिनीलादिपदत्वंनीलादिपदाव्यवहितोत्तरव
र्तिघटादिपदत्वंवाऽकांक्षा उक्तस्थलेचतादृशपाद्याप्याकांक्षायाविरहान्नापत्तिः कार्यतावच्छेदककोटावव्यवहि।
तोत्तरत्वनिवेशान्नोक्ताकांक्षातानयोः परस्परबोधेव्यभिचारः यत्रसमासव्याससाधारणंविशेषणपदस्यविशेष्य
वाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वस्वरूपंविरुद्धविभक्तिरहित्यमेवतादृशान्वयबोधौपयिकाकांक्षाविशेष्यवा

सु॰वा॰ चकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं च न तथा नीलघटमानयेत्यादावसंभवादिति तदसत् वि-
४ शेष्यवाचकपदाप्रकृतिकत्वस्य तादृशपदानन्तरत्वस्य तदुत्तरत्वेनाप्रतिसंधीयमानत्वरूपस्य वा नीलो घट इत्यादौ नी-
लादिपदसमभिव्याहृतविभक्तौ घटपदसमभिव्याहृतविभक्तिभिन्नायां सत्वात् अथ विशेष्यवाचकपदोत्तराहृतविभ-
५ क्तिविभाजकधर्मवद्विभक्तिराहित्यस्य विवक्षणान्न दोष इति चेन्न द्वितीयविभक्तित्वादिकमजानतः पुरुषस्य तादृशधर्मज्ञाना-
संभवाच्छाब्दबोधानुपपत्तिः नीलो घट इत्यादौ सुप्पदस्याम्पदत्वभ्रमदशायां तादृशशाब्दबोधस्यानुदयात् नीलस्य घट
इत्यादावपि षष्ठ्यादेः सुप्पदत्वादिभ्रमदशायां शाब्दबोधोत्पत्त्या स्वरूपतो विरुद्धविभक्तिराहित्यस्याप्रयोजकत्वात् अथ नी- ४
लो घटो नीलघट इत्यादि द्विविधबोधसाधारणं स्वोत्तरत्वादिभिन्नपदानन्तरत्वविशिष्टस्वोत्तरत्वादिरूपस्याव्यवहितोत्तरत्व

संबंधेन नीलादिपदवत्त्वाद्यं तच्च घटादिपदत्वमेव तथास्त्विति चेन्न नीलो घट इत्यादिवाक्यसाधारण्यापत्तेर्येनान्या
द्यध्याकांक्षाया उपगंतव्यतयोपदर्शितत्वात् समासासमाससाधारण्यानुगताकांक्षानुसरणस्याप्रयोजकत्वात् अथ नीले घट
मानयेत्यादौ नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेन्न कुत्रापि विभक्ति
पदं साधुत्वार्थमेव प्रयुज्यते अत्र केचित् अभेद एव विशेषणविभक्तेरर्थः अभेदस्य संसर्गतया भाने तु समासस्थले एवं
तत्र विभक्त्यनुसंधानं विनापि शाब्दबोधोदयानुभवविकल्पादित्यपि वदंति अथैतन्मते अभेदो यदि भेदत्वावच्छिन्नाभावस्तदा
ऽप्रसिद्धिः यदि च भेदप्रतियोगिकोऽभावस्तदा नीलं जलमित्यादिवाक्यस्य प्रामाण्यापत्तिः जले घटत्वादिना नीलभेदाभावस
त्वात् नीलभेदत्वावच्छिन्नाभावस्य विभक्त्यर्थत्वे नीलादिपदार्थानन्वयप्रसंगः न च भेदप्रतियोगिकाभावो विभक्त्यर्थः

एव

मु॰वा॰ नीलादिपदसमभिव्याहारान्नीलभेदत्वावच्छिन्नप्रतियोगिताकाभावः प्रतीयत इति वाच्यं पदार्थद्वयसंसर्गभानस्यैवा-
कांक्षानियम्यत्वात् नीलभेदत्वावच्छिन्नप्रतियोगितांतर्भावेण वृत्तिं विना भेदरूपपदार्थतावच्छेदस्याभावेनादृशसंब-
५ न्धभानासंभवात् मैवं भेदोऽभावश्च विशेषणविभक्तेरर्थः विशिष्टलाभश्चाकांक्षादिवशात् एतेन भेदे नीलादिप-
5 दार्थान्वये एकदेशान्वयप्रसंग इत्यपि निरस्तं नच विशेषणविभक्तेरभेदार्थकत्वे नीलं घट इत्यादावप्यभेदान्वबोधाप-
त्तिः धान्येन धनवानित्यादौ तृतीयाया अभेदबोधनात् अभेदप्रकारकबोधे विरुद्धविभक्तिराहित्यानपेक्षणादिति वाच्यं
द्वितीयादिनाभेदबोधे द्वितीयाद्यंतविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वाभ्युपगमात् अथ प्रमेयो घट इत्या-
दौ प्रमेयत्वावच्छिन्नभेदाप्रसिध्या लघुधर्मसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वे कंबुग्रीवादिमान् घट ५

इत्यादावपि कंबुग्रीवादिमत्त्वावच्छिन्नभेदप्रसिध्यविशेषणविभक्तेरभेदार्थकत्वासंभवः एवं नीलपटादिपरनीलादि
पदघटितस्य नीलो घट इत्यादिवाक्यस्यापि प्रामाण्यापत्तिः नीलत्वादिना पटभेदाभावस्य नीलघटादौ सत्त्वात् एतेन वि
शेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेव विशेषणविभक्तेरर्थः नीलत्वादेर्नीलत्वाद्यवच्छिन्नभेदाभावत्वरूप
तयाऽभेदार्थकत्वप्रवादोपपत्तिरिति परास्तं नीलत्वादौ नीलत्वादिमतः स्ववृत्तित्वसंबंधेनान्वयेऽप्याकांक्षाविरहाच्चय
थाहि तद्विशिष्टेऽधिकरणे तदधिकरणतया तदन्वयोऽनुभवविरुद्धस्तथा तद्धर्माधेयतया तद्धर्मवदन्वयोऽपि ग्रता।
एवं च कर्म गच्छतीत्यादिवाक्यस्य निराकांक्षता नचैवं संसर्गतामतेऽप्यनिस्तारः नीलो घट इत्यादौ स्ववृत्तिनीलत्वादेः
संसर्गतास्वीकारे उक्तस्थले प्रामाण्यापत्तेर्दुर्वारत्वादिति वाच्यं स्ववृत्तिनीलत्वादेः स्वस्मिन्नेव संबंधोपगमेन पटादिवृत्ति

कु॰वा॰
६
6

नीलादेर्घटादेरपटादिसंबंधताविरहेणतादृशातिप्रसंगाभावात् वस्तुतस्तत्तद्व्यक्तित्वावच्छिन्नभेदाभावएवनी
लत्वादिप्रकारेणभासमानांतत्तद्व्यक्तीनांस्वस्मिन्भासतइतिनकाप्यनुपपत्तिः संबंधताचतस्यनीलादिभेदप्रति-
योगिकाभाववत्वेनतत्तद्व्यक्तिभेदप्रतियोगिकाभाववत्वेनवेत्यन्यदेतत् नचैवंविशेषणविभक्तेरभेदार्थकत्वमतेपि
तत्तद्व्यक्तित्वावच्छिन्नभेदएवविभक्त्यर्थोवक्तव्यइतिवाच्यम् तथासत्यपूर्वव्यक्तित्वस्यकथंचिदपिभानासंभवेनतदा-
वच्छिन्नभेदाभावेशक्तिग्रहासंभवेनापूर्वव्यक्तीनामभेदान्वयानुपपत्तेः संसर्गज्ञानस्यविशिष्टबुद्धावहेतुत्वेनानुप
स्थितस्यापिसंसर्गतयाभानसंभवेनसंसर्गतामतेनुपपत्त्यभावात् नचविभक्त्यर्थेपिभेदेतत्तद्व्यक्तित्वावच्छिन्नप्र- ६
तियोगिताकत्वसंबंधेनैवनीलत्वादिनातत्तद्व्यक्तीनामन्वयः तादृशभेदानामपितत्तद्व्यक्तित्वावच्छिन्नप्रतियोगि-

ताकत्वसंबंधेनैवाभावेन्वयउपपद्यतेतावतैवतत्तद्व्यक्तित्वावच्छिन्नाभेदलाभइतिनकाप्यनुपपत्तिरितिवाच्यं वि
शेषणतावच्छेदकावच्छिन्नायाएवप्रतियोगितायाअभावेप्रतियोगिनः संबंधेनयाभानात् अन्यथाविशिष्टवै
शिष्ट्यबोधत्वानुपपत्तेः प्रतियोगिविशेषिताभावत्वानंतविशिष्टवैशिष्ट्यबोधमर्यादानातिशेतेइतिदर्शना
त्केवलंविशेष्येविशेषणमितिरीत्यानकश्चिदभ्युपैतीतिचेत्सत्यं अभेदस्तादात्म्यंतत्रस्ववृत्त्यसाधारणोधर्मः ।
असाधारण्यंचैकमात्रवृत्तित्वं तच्चस्वसमानाधिकरणस्वप्रतियोगिवृत्तित्वोभयसंबंधेनभेदविशिष्टंयत्तदन्यत्वं
इत्येकमात्रवृत्तिधर्मएवविशेषणविभक्तेरर्थः वृत्तिश्चतत्रप्रकृत्यर्थस्यसंसर्गमर्यादयाभासतेतादृशश्चधर्मः ।
स्तत्तद्व्यक्तित्वादिरूपएव अपूर्वव्यक्तिनिष्ठस्यतादृशधर्मस्यविशिष्यज्ञातुमशक्यत्वेपिएकमात्रवृत्तिधर्मत्वा ।

मु·वा·
५

दिनासामान्यप्रत्यासत्त्यासत्त्वग्रहत्वमेव अभेदस्य संसर्गतामते पि तादृशाऽनुगतत्वाभेदस्यैव तथात्वमुचितं तद्व्यक्ति
त्वावच्छिन्नभेदाभावकूटस्य विशिष्टतथात्वे च घटो नील इत्यादिवाक्यजन्यबोधे प्रतियोग्यभावान्वयित्वस्य योग्यत्वेमा
विति न्यायेन तादृशाननुगतसंबंधावच्छिन्नप्रतियोगिताननुगताभाव एव भासेरन् न तु नीलादिवृत्तिप्रतियोगि
ताकैकोभावः तथा सति यत्किंचित्तादृशाभावतात्पर्येण प्रयुक्तस्य नीलेन नील इत्यादिवाक्यस्य प्रामाण्यं स्यात् ।
इदं तु बोध्यं विशेषणविभक्तेरभेदार्थकत्वे च घटो न नील इत्यादौ नञा नीलाद्यभेदाभाव एव प्रत्याय्येत न तु नीला
दिभेदः यादृशसमभिव्याहारस्थले येन संबंधेन यत्र धर्मिणि येन रूपेण यद्वत्त्वं तत्सत्त्वे प्रतीयते तादृशस्थले ७
नञा तत्र धर्मिणि तादृशसंबंधावच्छिन्नतादृशधर्मावच्छिन्नप्रतियोगिताकाभावबोधस्यानुत्पत्तिसिद्धत्वात् प्रतियो

ग्यभावान्वयावित्यादेरप्ययमेवार्थः एवं च नञोभेदबोधकत्वे ऽत्रापि न संभवति अनीलघटमानयेत्यादौ घटप
दसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञोभेदवत्येव लक्षणाया उपगंतव्यत्वात् इदं तु बा
वधेयं अभेदस्य प्रकारतामते पि घटो न नील इत्यादिवाक्यस्य नीलाभेदाभावबोधकत्वे पित्वनीयाभावस्य प्रतियोगि
स्वरूपतया नञोभेदबोधकत्वेनानुपपत्ते परं तु भेदत्वप्रकारेण बोधो भवति न वेत्यन्यदेतत् इदं तु तत्त्वं असमास
स्थले ऽभेदस्य संसर्गतोपगमे पि गौरवविरहात् तत्र विशेषणविभक्तेर्इतिकल्पनमनुचिते तत्राभेदे यत्र विशेष
णविभक्तेः शक्तिभ्रमः स्वारसिकलक्षणाग्रहो वा तत्र सर्वमत एवाभेदप्रकारकबोधस्य नीलो घट इत्यादिवाक्या
दुत्पत्तेस्तादृशसमभिव्याहारज्ञानस्य द्विविधबोधे हेतुताद्वयं कल्पनीयं अभेदस्य संसर्गतावादिमते ऽतिगौरवं

व्यु·वा· पर्वंतादृशसमभिव्याहारज्ञानघटितसामग्र्यास्तत्कृतेभिन्नभिन्नयोगपत्ताज्ञानघटिततयाद्वैविध्ये नाभिन्नविषयकप्र
८ त्यक्षादिकं प्रतितादृशसामग्रीप्रतिबंधकतायाश्चाप्यधिकामितिवाच्यं अभेदस्यसंसर्गतावादिनोक्तस्थलेपितत्सं
९ सर्गकबोधस्यैवोपगमादिक स्तोकं पचतिमृदु पचतीत्यादौविरुद्धविभक्त्यवरुद्धपदोपस्थापितस्यापिस्तोकमृ
व द्वादेर्धात्वर्थपाकादौभेदान्वयोपपत्तिसिद्धः तदनुरोधेनचद्वितीयांतस्तोकथात्तपदसमभिव्याहारस्यापिअभेदा
न्वयबोधोपयिकाकांक्षात्वमुपगम्यते क्रियाविशेषणस्थलेचनद्वितीयातिरिक्तविभक्तिरुत्पद्यते क्रियाविशेष
णानांकर्मत्वमित्यनुशासनेनतत्रकर्मत्वातिदेशात् नचैवंस्तोकःपाकइत्यादौवपिद्वितीयाप्रसंगः तत्रापिस्तो ८
कादेःक्रियायामेवविशेषणत्वात् भावकृतांप्रयोगसाधुत्वमात्रार्थकतयाधात्वर्थैनैवतत्रपाकादिप्रतिपादना।

दितिवाच्यं क्रियापदस्य तत्र सार्थकप्रत्ययांतधातूपस्थाप्यार्थपरत्वात् स्तोकं स्थीयत इत्यादावाख्यातस्यापि वर्तमा-
मानत्वाद्यर्थकतया सार्थकत्वात् न च वर्तमानत्वाद्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यं वर्तमानत्वादिविवक्षास्थ
लेऽश्वार्थबोधप्रयोजकाकांक्षाशालित्वेनैव तदविवक्षास्थलेऽपि भावाख्यातस्यार्थवत्वात् केचित्तु धातोरिव ण्यजंतस्य
पि पाकादौ शक्तिरुपपन्ने अन्यथा सुविभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुपपत्तेः प्रकृत्यर्थान्वितस्वा
र्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेः धातूनां सुभक्त्यप्रकृतित्वात् प्रकृत्येकदेशार्थेऽपि प्रत्ययार्थान्वयोपगमे प-
चंतं पश्यतीत्यादितः पचमानं पश्यतीत्यादितः अपि पाकादौ द्वितीयाद्यर्थकर्मत्वान्वयप्रसंगात् एकत्र विशेषणत्वे-
नान्वितस्यान्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नत्वेन तत्र प्रत्ययार्थविशेषणपाकादेर्नकर्मत्वे विशेषणतयान्वय

मु·वा· इति चेत् तथापि पाकादिविशेषणतया स्वार्थसंख्यान्वयसंभवात् यत्र पाककर्त्रादेर्द्वित्वादिकं बोधितं पाकादेस्तत्र तद्
५ बाधितं तत्र पचंतौ पश्यति पचमानौ पश्यतीत्यादिप्रयोगप्रसंगदुर्वारत्वात् धात्वुपस्थाप्येऽर्थे सुबर्थान्वयबोधं प्रति तत्त
9 द्धात्वुत्तरप्रत्ययधर्मिककिंचिदर्थपरत्वज्ञानस्य प्रतिबंधकताभ्युपगमेनैतादृशातिप्रसंगवारणे च गौरवात् एवं शो
भनं पचनमित्यादौ धातुमात्रेण पाकाद्युपस्थितौ शोभनाद्यभेदान्वयबोधानुपपत्तिः विशेषणविभक्तिसजातीयवि
भक्तिप्रकृत्यनुपस्थाप्यत्वात् प्रकृत्येकदेशसाधारणतादृशविभक्तिप्रकृतित्वस्य प्रयोजकत्वे तु न त्वल्युडादेरधिकर
णपरत्वेपि तथाविधान्वयबोधापत्तेः कस्यचित्प्रतिबंधकतां कल्पयित्वा तद्वारणे च गौरवात् नचैवमुपकुंभमर्थपिप्प ५
ल्यादिरूपपूर्वपदार्थप्रधानसमासपदात्कुंभसमीपपिप्पल्यर्थादौ विभक्त्यर्थान्वयस्य प्रातिपदिकार्थेतराभेदान्व

यस्य चानुपपत्तिः पूर्वपदस्य समासोत्तरविभक्त्यप्रतीतत्वादिति वाच्यं तदनुरोधेनैव तत्र कुंभपिप्पल्यादिपदानामेव
कुंभसमीपपिप्पल्यर्थादौ लक्षणायाः पूर्वपदस्य तात्पर्यग्राहकमात्रोपयोगितायाश्च स्वीकारात् वस्तुतस्तु तत्र तत्रोत्त
रपदार्थविशेषिते पूर्वपदार्थे समीपाद्यबोधे समानविभक्ति) र्थादौ प्रत्ययार्थान्वयबोधे तादृशसमस्तपदप्रत्ययपद
योरव्यवहितपूर्वापरीभावोपि ग्राकांक्षा एवं तत्र प्रातिपदिकांतरार्थाभेदान्वयबोधे समानविभक्तिकयोस्तादृशस
मस्तपदपदांतरयोश्च समभिव्याहारोप्याकांक्षा तथा सत्यतिप्रसंगविरहात् धात्वर्थे पाकादौ प्रत्ययार्थान्वयबोधे प्रा
तिपदिकांतरार्थाभेदान्वयबोधे वस्तुतस्त्वाद्यंत समुदायप्रकृतिप्रत्यययोरानुपूर्वीरूपाव्यवहितपूर्वापरीभावस्य स
मानविभक्तिकयोस्तादृशसमुदायपदपदांतरयोः समभिव्याहारस्य चाकांक्षात्वोपगमे तद्दर्शिताधिकारणार्थ

कु॰वा॰

१०

10

कालुङ्प्रत्ययस्यलीयातिप्रसंगास्यङकृदन्तयानन्तत्संभवः अथचज्ञायंतसमुदायस्यपाकाद्यर्थकत्वेचज्ञायंतसमु
दायस्यसंयोगत्वविभागत्वविशिष्टवाचकत्वंसुत्याद्यसंयोगविभागादिपदानांनैमित्तिकसंज्ञानिराकरणेदीधितिकृतो
विरुद्धइतिचेत्नक्षतिः नहिकस्यचित्कृष्णकृतोविपरीतलिखनेशक्तिवलादस्तसिद्धौबाधकं एवंचयत्रधात्वमात्रस्यपा
कादौतात्पर्यंतत्रतद्विशेषणवाचकपदाद्वितीयैव यत्रतुकृदंतसमुदायस्यपाकादौतात्पर्यंतत्रतादृशपदेनयाविध
कृदंतसमुदायसमानविभक्तिकमेव तडक्तंकातंत्रपरिशिष्टकृता कथंस्तोकःपाकः कृदंतविशेषणत्वात् धात्वैकं
यिकरणयेतस्तोकमोदनस्यपाकइतिस्यादेवेतिवदंति तदर्थवाचकपदोत्तरसुविभक्त्यासंख्याबोधनेप्रभेदसंसर्गा। १०
वच्छिन्नप्रकारताभिन्नतदर्थविषयताकशाब्दबोधसामग्र्यपेक्षितातादृशशाब्दबोधस्तदर्थविशेष्यकस्तदर्थनिरूपि।

तभेदान्वयविषयकस्य नीलो घटावित्यादौ च विशेष्यवाचकपदोत्तरविभक्तेर्वद्वित्वादिकं प्रत्याय्यते एवं च क्रियाविशेष
णवाचकपदोत्तरविभक्त्या बाधितयोरपि द्वित्वबहुत्वयोः प्रत्यायनासंभवात् तादृशपदोत्तरमौत्सर्गिकमेकवचनमे
वभाव्याख्यातस्थलवदित्यवधेयं अभेदान्वयबोधस्य विरूपोपस्थितयोरेवेति व्युत्पत्तिः घटो घटः दंडवान् दंडवान् पा
केपचतीत्यादौ घटत्वदंडवत्त्वपाकत्वाद्यवच्छिन्नेन तद्रूपावच्छिन्नस्य तथान्वयबोधात्वबोधानुदयात् अथ तत्प्रयोजक
समानविभक्तिकत्वादेः सत्त्वात्कथं न तादृशान्वयबोधः अत्राहुः यादृशं फलं क्वचित्प्रसिद्धं तादृशस्यैवापत्तिः संभव
तिक्लृप्तसामग्रीबलात् यादृशं फलं च सर्वत्रैवाप्रसिद्धं तादृशस्यापादकाप्रसिद्धेरापत्तिरशक्यैवेति घटत्वाद्यवच्छि
न्नविशेष्यताकाभेदसंसर्गकघटत्वाद्यवच्छिन्नप्रकारताकबोधस्य क्वचिदप्यभावान्न तदापत्तिः अथ च घटो नीलघटः ।

मु॰ वा॰

११

दंडवान् रक्तदंडवानित्यादौ च तादृशशाब्दबोधस्य प्रसिद्धिः विधेयकोटावधिकावगाहित्वः शाब्दबोधस्य नवीने

रूपगमादिति चेन्न हि घटाद्यंशे विशेषणतावच्छेदकविधया नीलादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञान

विशेषादिघटितैव सामग्री घटत्वाद्यवच्छिन्नविशेष्यकनीलघटत्वाद्यवच्छिन्नाभेदान्वयबोधप्रयोजिका तदभावा

देव घटो घट इत्यादौ न तादृशान्वयबोधापत्तिरिति केचित् पथ द्रव्यत्वादौ धर्मितावच्छेदकतासंबंधेन प्रसिद्धस्य

घट द्रव्यघटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्यैतादृशावापत्तेः संभवात् न च तत्रापादकाभावः तत्र तात्पर्यज्ञानविशे-

षादिघटिताया धर्मितावच्छेदकतया द्रव्यत्वादौ तदुत्पादनियामकसामग्र्या एवापादकत्वात् नच धर्मितावच्छेदक ११

तासंबंधेन द्रव्यत्वादौ तादृशान्वयबोधोत्पत्तिप्रयोजिका द्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितत्वेपि द्रव्यत्वादौ तादृ

शाप्रत्यासत्त्ययोग्यताज्ञानानातादृशप्रत्यासत्त्याशाब्दबोधापत्तिः आत्मनिष्ठप्रत्यासत्त्यादेर्हेतुभूतांद्रव्यत्वाद्यव-
च्छिन्नोपस्थितिमंतरेणापितादृशप्रमेयत्वाद्यवच्छिन्नोपस्थित्यादिदशायांप्रमेयत्वादौ धर्मितावच्छेदकतासंबं-
धेनयोग्यताज्ञानस्यफलजनकत्वात् तादृशद्रव्यत्वावच्छिन्नोपस्थितिविरहस्याकिंचित्करत्वात् इति वाच्यं स-
मानप्रकारताप्रत्यासत्त्यापदार्थोपस्थितेः शाब्दबोधहेतुत्वोपगमात् येनसंबंधेनयद्धर्मावच्छिन्नकार्यंप्रतियेन
संबंधेनयद्धर्मावच्छिन्नस्यव्यापकतातेनसंबंधेनतद्धर्मावच्छिन्नकार्योत्पादकसामग्र्यामपितेनसंबंधेनतद्धर्माव-
च्छिन्नकार्योत्पादावपेक्षिततयाप्रकारतासंबंधेनद्रव्यत्वादौ द्रव्यपदजन्यपदार्थोपस्थित्यसत्त्वेनतत्रधर्मितावच्छे-
दकतासंबंधेनशाब्दबोधापत्तेरयोगात् नचयत्रप्रमेयत्वाद्यवच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्यवच्छिन्न-

शु॰वा॰ विशेष्यकोपस्थितेर्वैवोद्बोधकांतरात्तद्धर्मत्वावच्छिन्नस्यभानेतत्तद्धर्मत्वावच्छिन्नवि विषयकशाब्दापत्तिवारणा
यतद्धर्मावच्छिन्नविशेष्यकशाब्दबोधंप्रतितद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकोपस्थितित्वेनै
१२ वपदार्थोपस्थितेर्हेतुतावाच्या तथाचप्रकारविशेषनिवेशस्यावश्यकत्वेप्यात्मनिष्ठप्रत्यासत्त्याहेतुताकल्पन
12 मुचितं अन्यथापुरुषभेदेनकार्यकारणभावबाहुल्यप्रसंगादितिवाच्यं स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारता
निरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेनोपस्थितेर्हेतुतांस्वीकृत्यतादृशापत्तेर्वारणात् नचपदा
र्थोपिप्रकारतासंबंधेनशाब्दबोधउत्पद्यतेतत्रप्रकारतासंबंधेनपदार्थोपस्थितेरभावात् प्रकारनिष्ठप्रत्यासत्त्या १२
पदार्थोपस्थितिहेतुताव्यभिचारेणकल्पयितुमशक्येतिवाच्यं परामर्शकारणताविचारदर्शितदिशाव्यभि।

चारस्यवारणीयत्वादितिचेन्नहिंतद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबं
धेनशाब्दत्वावच्छिन्नंप्रतितद्धर्मभेदस्यापिहेतुतायाः स्वीकरणीयतयानघटोघटइत्यादिस्थलेशाब्दबोधापत्तिः॥
सघटंइत्यादिवाक्याज्जातित्वादिनाघटत्वादिधर्मितावच्छेदककस्यस्वरूपतोघटत्वादिप्रकारतावच्छेदककस्यबा-
दः सइत्यादिवाक्यात्स्वरूपतोघटत्वादिधर्मितावच्छेदककस्यजातित्वादिविशिष्टघटत्वावच्छिन्नप्रकारकस्यचशा
ब्दबोधस्यचोपपत्तयेविशेष्यत्वप्रकारत्वयोरवच्छेदकत्वेनिरवच्छिन्नत्वेनविशेषणीयेघटोनीलघटइत्यादावन्वयबो
धकस्यप्रामाणिकत्वेऽन्यत्रदर्शितरीत्यासोऽप्युपपादनीयः समंइत्यादिवाक्यात्जातित्वावच्छिन्नधर्मितावच्छेदक-
ताकतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकाभेदान्वयबोधस्यवारणायतद्धर्मावच्छिन्नावच्छेदकताकप्रकारता-

मु॰ वा॰
१२
13

निरूपितधर्मितावच्छेदकतावच्छेदकत्वप्रत्यासत्त्या शाब्दबोधं प्रतितद्धर्मभेदस्यापि पृथक्कारणत्वं कल्पनीयं एवं दंड।
वान् दंडवान् इत्यादिवाक्यात् दंडसंयोगत्वाद्यवच्छिन्नवृत्तितदवच्छिन्नवद्भेदान्वयवारणाय दंडसंयोगत्वाद्यवच्छिन्नाव
च्छेदकताकप्रकारतानिरूपितधर्मितानिरूपितसंयोगत्वाद्यवच्छिन्नावच्छेदकतानिरूपितावच्छेदकत्वसंबंधेन शाब्दबु।
द्धौ दंडत्वादिभेदस्य पृथक्कारणता कल्पनीया अवच्छेदकताया निरवच्छिन्नत्वनिवेशेपि पूर्ववद्दोषः वस्तुतस्तु त
द्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रतितद्धर्मभेदत्वेन हेतुता लाघवात् घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविशेष्य
तावच्छेदकतासंबंधेन शाब्दं प्रति घटत्वान्यवृत्तिविषयतासंबंधेन ज्ञानत्वावच्छिन्नस्य व्यापकतया घटत्वादौ तादृश।
विषयतासंबंधेन ज्ञानत्वावच्छिन्नोत्पादकसामग्रीविरहेण तत्र न तादृशविशेष्यतावच्छेदकतासंबंधेन शाब्दबोधः।

पत्तिः एवंचघटवान्घटवानित्यादिशाब्दबोधवारणानुरोधेन धर्मितावच्छेदकादिनिष्ठप्रत्यासत्त्याकारणत्वांतरम
पिनकल्प्यते एवमुद्देश्यतावच्छेदकविधेयतावच्छेदकयोरैक्ये नैको द्वावित्यादिवाक्यादेकत्वद्वित्वाद्यवच्छिन्नैकत्व
द्वित्वादीनां भेदान्वयबोधानुदयात् एकत्वत्वद्वित्वत्वाद्यवच्छिन्नसमवायादिसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्य
तानिरूपितसमवायादिसंसर्गावच्छिन्नावच्छेदकतावच्छेदकत्वादिसंबंधेन शाब्दबुद्धावेकत्वत्वद्वित्वत्वादिभेदस्य ए
वे कर्मंगच्छतीत्यादौ कर्मत्वत्वाद्यवच्छिन्नाधेयतासंबंधेन तद्वत्तोन्वयबोधवारणाय कर्मत्वत्वाद्यवच्छिन्नावच्छेदक
ताकाधेयतासंसर्गावच्छिन्नप्रकारतानिरूपितधर्मितावच्छेदकत्वसंबंधेन शाब्दबुद्धौ कर्मत्वत्वादिभेदस्य च घटेन
घटश्चायघनुमितेः शाब्दस्य च वारणाय घटत्वाद्यवच्छिन्नभेदप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेनानुमि

सु·वा· तौषाद्बोधे च घटत्वादिभेदस्य हेतुत्वांतरकल्पनमनादेयमेव तत्र तद्धर्मभेदस्यैकैककारणतयैव सकलातिप्रसंगवार-
णादिति कृतं पल्लवितेन भेदान्वयबोधस्य प्रातिपदिकार्थधात्वर्थयोः प्रत्ययार्थेन क्वचिन्निपातार्थेन च सममेव जाय-
१४ ते नत्वन्येन सत्यपि पदार्थोपस्थितियोग्यताज्ञानादिरूपकारणकलापे राजा पुरुषः भूतलं घटवदित्यादौ पुरुषघ-
14 टाद्यंशे राजभूतलादेः स्वत्वाधेयत्वादिसंबंधेन तंडुलः पचति चैत्रः पच्यते इत्यादौ कर्मत्वकर्तृत्वादिसंबंधेन तंडु-
लचैत्रादौ पाकादेः स्वकर्मकत्वस्वकर्तृकत्वादिसंबंधेन पाकाद्यंशे वा तंडुलचैत्रादेरन्वयबोधान्निपातातिरिक्तप्रा-
तिपदिकार्थयोः क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात् विभक्त्यर्थमंतराकृत्वा- १४
तयोरप्यन्वयबोधात्साक्षात्वादिति निपातातिरिक्तत्वविशेषणात् भूतलेन घटः घटो न पटः इत्यादौ घटादेर्नञर्थाभावे

नमुखंचंद्रइवेत्यादौमुखचंद्रादीनामिवार्थसादृश्यादिनानकलंजंभक्षयेदित्यादौनैयायिकमतेनानुपस्थाप्येनते
बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधनत्वादिरूपतिङर्थस्याभावेनधात्वर्थभक्षणादेरनुयोगितयागुरुमतेतद्वि
ध्यर्थांशेष्टंविशेषणतयान्वितेननञुपस्थाप्याभावेनधात्वर्थभक्षणादेः प्रतियोगितयान्वयेपिनक्षतिः राजा
पुरुषइत्यादिसमासस्थलेतुपुरुषादिपदार्थेनसमंराजादिपदार्थस्यनभेदेनान्वयः किंतुतेनसमंविभक्त्यर्थेना
विशिष्टलाक्षणिकराजादिपदोपस्थापितराजादिसंबंध्यादेरभेदान्वयबोधेएवेतिनदोषः एवंमुखंचंद्रइत्या
दिरूपकस्थलेचंद्रादेश्चंद्रसदृशेलक्षणयामुखादौचंद्रादिसदृशाभेदान्वयबोधएवनतुसादृश्यादिसंबंधेनचं
द्रादेर्मुखादावन्वयइतिनतत्रव्यभिचारः केचित्तुरूपकस्थलेचंद्रादिपदस्यचंद्रादिसदृशेनलक्षणाकिंतुतत्रमु

सु॰वा॰
१५
15

ख्यार्थचंद्रादेर्वाभेदभ्रमोमुखादौमुखत्वेनचंद्रइत्यादिविशेषदर्शनदशायांचनतत्रशाब्दोऽभेदप्रत्ययः अपितुशाब्दजन्य
विशकलितपदार्थोपस्थितिमूलकोमानसएवाहार्याभेदभ्रमइत्याहुः केचित्तुतादात्म्यातिरिक्तसंबंधेननामार्थयो
र्नान्वयबोधः तादात्म्यंचप्रकृतेतद्वृत्तिधर्मवत्वं एवंचनीलोघटइत्यादौस्ववृत्तिनीलत्वादिसंबंधेनघटाद्यंशेनील
पदार्थस्यैवमुखंचंद्रइत्यादौस्ववृत्त्याह्लादकत्वसंबंधेनमुखादौचंद्रादेरभेदान्वयबोधेपिसमानविभक्तिकत्वादिके
तेत्रमतेनातिप्रसंगइतिवदंति अथराजापुरुषइत्यादौपदार्थोपस्थित्यादिसत्वेकथंनभेदेनशाब्दबोधः सामग्र्य
कार्यजननेउक्तनियमभंगरूपायाः प्रयोजनहानेरकिंचित्करत्वात् सामग्रीसत्वेऽवश्यंकार्यं नचतत्रभेदान्वयबो
धोपयिकाकांक्षाविरहाच्छाब्दबोधसामग्र्येवासिद्धेतिवाच्यं समभिव्याहाररूपाकांक्षायास्तत्रापिसत्वात् नच। १५

मितिनियमात्२

ताद्दशाकांक्षायास्तत्रसत्वेपिराजादिपदार्थप्रकारकभेदान्वयबोधेराजादिपदोत्तरङः सपदत्वरूपानुपूर्वीवि

शेषरूपाकांक्षायाअपिप्रयोजकत्वात् तदभावादेवनतत्रशाब्दसामग्रीतिवाच्यं संबंधादिविशेष्यकराजादिप्र

का कारान्वयबोधएवताद्दशाकांक्षाज्ञानस्यहेतुतयापुरुषादौराजादिप्रकारकान्वयबोधोत्पत्तौताद्दशाकांक्षाज्ञान पदार्थ३

रूपकारणविरहस्याकिंचित्करत्वात् अत्रकेचित् नामार्थप्रकारकभेदान्वयबोधंप्रतिसमानविशेष्यत्वप्रत्यास

त्याप्रत्ययजन्योपस्थितेर्हेतुत्वकल्पनान्नामार्थप्रकारकभेदान्वयबोधेविशेष्यतयाप्रत्ययार्थस्यैवभानं[illegible]

[illegible]नंननामार्थस्यतत्रविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितेरभावात् नचसंबंधादेरपिनामार्थतयातत्प्र

कारकान्वयबोधेपुरुषपदार्थस्यविशेष्यतयाभानानुपपत्तिः तत्तन्नामपदजन्यतत्तन्नामार्थप्रकारकशाब्दबोध

पस्थितौ प्रत्ययजन्यत्वम् कश्चित्प्रत्ययोपि विषयीभूतः तत्र प्रत्ययजन्यत्वाभिधसमूहालंबनोपस्थितेर्विशेष्यतासंबंधेन पुरुषे ४

मु॰वा॰ त्वावच्छिन्नंप्रतिप्रत्ययजन्योपस्थितित्वेनहेतुत्वेपिराजसंबंधः प्रमेयः राज्ञः पुरुषइत्येतादृशवाक्यद्वयजन्यवाक्या

१९ र्थबोधेपुरुषस्यराजसंबंधविशेष्यतयाभानानुपपत्तिरितिवाच्यं प्रत्ययार्थीनंततत्पदार्थोपस्थितजन्यतत्तदर्थ

16 प्रकारकशाब्दबोधत्वावच्छिन्नंप्रत्येवप्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्याहेतुत्वोपगमात् अथै

वमपियत्रराजापुरुषइत्यत्रपुरुषपदार्थीनपुरुषोपिसत्वात् तस्यराजप्रकारकभेदेनान्वयबोधेविशेष्यतया

भानापत्तिदुर्वारैव नचप्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेनोपस्थितेर्हेतुतोपगमान्नानुपपत्तिः ता

दृशसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतायांनाम्नपवजन्यतावच्छेदकत्वादितिवाच्यंज्ञानभेदे १९

नविशेष्यताभेदाभावात् यत्रकुत्रचित्प्रत्ययादेवलक्षणादिनापुरुषाद्युपस्थितिस्तत्रतादृशोपस्थितिजन्यतोव

छेदकीभूतविशेष्यतानः पुरुषादिपदजन्यपुरुषाद्युपस्थितिविशेष्यतायाअभिन्नतयातावतापुक्तातिप्रसंग
वारणासंभवादितिचेन्नास्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासंबंधे।
नैवोपस्थितेर्द्वैतनयोक्तसमूहालंबनोपस्थितिनिरूपितविशेष्यतायाश्चतादृशोपस्थितिजनकज्ञानीयप्रत्य
यवृत्तिप्रकारतानिरूपितविशेष्यतासामानाधिकरण्यविरहापत्तिप्रसंगइतिवदंति तदसत् प्रत्ययत्वस्यानुग
तानतिप्रसक्तस्यदुर्वचतयाउक्तकारणभावकल्पनायाअसंभवात् राजसंबंधः पुरुषइत्यादौसंबंधादिपदेऽ
स्रपदत्वादिभ्रमदशायांसंबंधादिविशेष्यकराजापदार्थप्रकारकान्वयबोधानुपपत्तिः राज्ञः पुरुषइत्यादौऽस
पदादौसंबंधादिपदत्वभ्रमेपिसंबंधायंशोराजादिप्रकारकान्वयबोधापत्तेश्च नच प्रत्ययत्वेनज्ञातेयत्पदंतज्ज।

पदार्थ१

सु॰वा॰ स्योपस्थितेः कारणत्वादेतद्दोषद्वयस्यानवकाश इति वाच्यं राज्ञः पुरुष इत्यादौ षष्ठ्यादेः प्रत्ययत्वाद्यनुपस्थितावपि
प्रानुपूर्वीविशेषप्रकारकज्ञानाधीनतत्पदार्थोपस्थितिसत्त्वेन शाब्दबोधोत्पत्त्या प्रत्ययत्वप्रकारकज्ञाननिवेशासंभ
१८ 17 वात् इदंतुनरथतत्वे राजपुरुष इत्यादौ पुरुषादिविशेष्यकराजादिप्रकारकभेदान्वयबोधस्याप्रसिध्यैवनापत्ति
संभवः यत्र षष्ठ्यादिविभक्तेरेव स्वारसिकलक्षणया शक्तिभ्रमेण वा पुरुषाद्युपस्थितिस्तत्र तद्विशेष्यकराजा।
दिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्ध इति तद्भिन्नादृशबोधे तथाविधप्रकृतिप्रत्ययानुपूर्वीरूपाकांक्षाज्ञा
नसहकृततद्विभक्तिधीजन्यपुरुषाद्युपस्थितिघटितसामग्र्या एव तादृशबोधोत्पत्तिनियामकतया तदभा १८
वादेव न तदापत्तिः एतेन स्वत्वादिसंबंधेन राजादिविशिष्टपुरुषादितात्पर्यकतदादिपदाघटितात्संसेदरइ

त्यादिवाक्यात्पुरुषादिविशेष्यकस्वस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्य च प्रसिद्धत्वाद्राजा पुरुषः।
सुंदरइत्यादौ पदार्थोपस्थितियोग्यताज्ञानबलान्नादृष्टशाब्दबोधापत्तिरिति निरस्तं सुंदरइत्यादिवाक्या
र्थशाब्दबोधसामग्र्यास्तत्पदत्वावच्छिन्नविशेष्यकसुंदरादिपदसमभिव्याहारज्ञानसहकृततत्तदादिपदज
न्यतादृशविशिष्टार्थोपस्थितिघटिततया तदभावादेवापत्त्यभावात् अथैतादृशरीत्या(आ)पत्तिवारणे राज्ञः पुरु
षइत्यादौ स्वत्वादिसंबंधेन पुरुषादौ राजान्वयबोधस्वीकारेपि क्षतिविरहात् उक्तव्युत्पत्तिर्निर्युक्तिका विभक्ती
नां संबंधवाचकत्वमपि निर्युक्तिकं नीलो घटइत्यादौ विशेषणवाचकपदसमभिव्याहृतविभक्तिरिव सर्ववि
भक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचितत्वात् न क्षितथाविधान्वयबोधोपगमे तस्य लीयसामग्रीबलात् राजा

एवंच राजपुरुषइत्यादि समासे राजादिपदस्य राजसंबंधादिलक्षणा स्वीकार्योपि इत्यर्थः तत्र भेदान्वयबोधस्वीकारोपि तत्र निविरहात् नचतत्र भेदान्वयबोधाभ्युपगमे तत्स्थलीयसामग्री
बलाद्राजा पुरुष इत्यादावपि तादृशान्वयबोधापत्तिरितिवाच्यं तत्स्थलीयशाब्दबोधे राजपदार्थस्य वृत्तितोस्य पुरुषादिपदजन्योपस्थित्यानुपूर्वीविशेषज्ञानस्य हेतुतयाअसमानस्थले पुरु
षादिपदसमभिव्याहाराज्जादिपदजन्यउपस्थित्यवृत्तित्वात्तादृशानुपूर्वीविशेषज्ञानासंभवेन तत्रतादृशबोधसामग्र्याः असिद्धेः नचपुरुषस्यानुपूर्वीविशेषस्याकाङ्क्षा

कु.वा. 18

पुरुष इत्यादावपि तथाविधान्वयबोधप्रसंगः संभवति तत्स्थलीयसामग्र्याः षष्ठ्यन्तराजपदे तत्वाद्यवच्छिन्नधर्मिकपुरु
षादिपदसमभिव्याहाररूपाकांक्षाज्ञानघटितत्वात् तदभावादेवतत्रतादृशसामग्र्या अभावात् एषोप्रयोजनाभा
वेतत्तादृशकार्यतावच्छेदकस्यैवभेदान्वयबोधेसाधारण्येनानुपूर्वीज्ञानहेतुतायाअनाधिक्यात् एवंतण्डुलंपच
तीत्यादौ वपिपाकादिरूपधात्वर्थेकर्मत्वादिसंबंधेनैवतण्डुलादेरन्वयबोधः स्वीकर्तव्य इतिः कर्मत्वादेः पाकाद्यंशे
प्रकारत्वेनद्वितीयादेः शक्तिकल्पनेतादृशवाक्यजन्यशाब्दबोधे कर्मत्वादिसंसर्गस्याधिकल्पविषयताकल्प
नेगौरवात् तण्डुलंपचतीत्यादिवाक्यजन्यशाब्दबोधेसामग्रीबलात्तण्डुलः पचतीत्यादावपितथान्वयबोधापत्ति
र्नसंभवतीतितादृशसामग्र्या असिद्धेः एवंपचतीचैत्रइत्यादावपिकृतिसंबंधेनपाकादेश्चैत्राद्यंशेऽन्वयबोधस्वी

त्वात् प्रातिपदिकपद
हयावबधानघटितो
केऽनुक्तानुपूर्वीविशे
षज्ञानस्यहेतुत्वमेवा
निष्प्रमाणकमितिवा
च्यं भवन्मतेपिराजपु
रुष इत्यादौ यादृशाः
सामग्रीबलाद्राजपदा
र्थपोरभेदान्वयबोधः
स्यात् तादृशसामग्री
बलाद्राजा पुरुष इत्या
दावपिराजादिपदस्य
जसंबंधादौ लक्षणाग्रह

[illegible]

कारकान्वितः अन्यथोक्तरीत्यागौरवात्तत्रतादृशान्वयबोधस्वीकारेतत्स्थलीयसामग्रीबलात्पच्यतेचैत्रःपाक
श्चैत्रइत्यादौतथाविधान्वयबोधापत्तेरुक्तरीत्यैववारणसंभवादिति मैवं राज्ञः पुरुषइत्यादौषष्ठ्यादेः स्वत्वा
दिवाचकतयाश्रयत्वव्यापकत्वात्अन्यथापुरुषोनराज्ञइत्यादौराजस्वत्वाद्यभावबोधानुपपत्तेः नहितत्रस्वत्वा
दिसंबंधावच्छिन्नप्रतियोगिताकराजाभावएवप्रतीयतेनतुराजस्वत्वाद्यभावइतिसंभवति स्वत्वादिसंबंधस्य
वृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेनतत्संबंधावच्छिन्नप्रतियोगिताभावाप्रसिद्धेः अतएव
स्वामित्वादिकंपरित्यज्यस्वत्वादेः षष्ठ्यर्थत्वेनवीनाःस्वीकुर्वंति स्वामित्वादेःषष्ठ्याद्यर्थत्वेतस्यनिरूपकतासं
बंधेनांशेऽन्वयसंभवेपितादृशसंबंधस्यवृत्त्यनियामकतयाऽभावप्रतियोगितानवच्छेदकत्वेनतत्संबं

ञ॰वा॰ धावच्छिन्नाभावस्य न[आ]प्रत्याय्यतासंभवात् आश्रयतासंबंधावच्छिन्नाभावबोधस्य नञ्समभिव्याहारस्थलेऽभ्यु-
19 १९ पगमे चैत्रादिसंबंधिधनेऽप्याश्रयतासंबंधावच्छिन्नप्रतियोगिताकचैत्रवृत्तिस्वामिभावसत्वात् नेदं चैत्रस्येति प्रयो-
गापत्तेः न च नञ्समभिव्याहारस्थले नञर्थेन षष्ठ्यादेः स्वत्वादिवाचकत्वेपि तात्तः पुरुषस्यादौ षष्ठ्यर्थस्य सं-
सर्गमर्यादयाभानमुचितं तस्य प्रकारत्वोपगमे तत्संसर्गभानकल्पने गौरवात् नञ्समभिव्याहारस्यैव तत्-
प्रकारकबोधनियामकत्वाभ्युपगमेन सामग्रीबलात् तत्प्रकारकबोधस्य तदसमभिव्याहारस्थलेऽसंभवादिति।
वाच्यं एवं सति नञ्पदं विनायादृशसमभिव्याहारस्थले यत्र धर्मिणि येन संबंधेन यस्य विशेषणतया भानं न १९
ञ्समभिव्याहारे तत्र धर्मिणि तत्संबंधावच्छिन्नप्रतियोगिताकतदभावः प्रतीयत इति सर्वजनानुभवस्यापला-

पापत्तेः राज्ञः पुरुषः इत्यादिवाक्यजन्यायाममाणपज्ञानानास्कंदितबोधदशायां पुरुषो न राजा इत्यादिवाक्यादपि
शाब्दबोधापत्तेः स्वत्वाभाववद्वृत्तौ स्वत्वसंसर्गकज्ञानस्य विरोधित्वे मानाभावः वृत्तिनियामकसंबंधस्याभावप्रा
तियोगितावच्छेदकत्वेपि राज्ञः पुरुषः इत्यादौ स्वत्वादेः प्रकारताभ्युपगमः संभवितः अन्यथा तादृशसमभि
व्याहारज्ञानघटितशाब्दसामग्रीकाले राजस्वत्वाभाववान्पुरुषः इत्याद्याकारकविशिष्टवैशिष्ट्यावगाहि
प्रमत्वकारणायत्तत्वतादृशसामग्र्याः प्रतिबंधकताकल्पनाधिक्येन गौरवात् अप्रमत्वये तादृशसमभिव्याहार
ज्ञानघटितसामग्र्या राजस्वत्वाभाववान्पुरुष इत्यादिबाधाभावघटिततया तत्सत्वे विशेष्यतावच्छेदकादिप्रका
रकनिश्चयरूपकारणविरहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्त्यसंभवेन तादृशसामग्र्यास्तत्र

मु·वा·

२०

प्रतिबंधकत्वाकल्पनात् अन्यादृशप्रत्यक्षस्थलीयप्रतिबंधकतयाचननतव्यतेनिर्वाहः अन्यज्ञान्यविधप्रत्यक्षेच्छानामे-
वोत्पत्तेजनकतयातादृशेच्छायामसत्यां उपदर्शितविशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाबलादुपदर्शितविशिष्टवैशिष्ट्यबोधो-
पपत्तयेअन्यादृशविषयतायाएवतत्रप्रतिबध्यतावच्छेदकत्वेनोपगमात् नवसत्वादेःप्रकारतामतेपिसत्वादिसंबंधाव-
च्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टपुरुषादिवैशिष्ट्यबोधेतथाविधसामग्र्याः प्रतिबंधकत्वाकल्पनेनगौरवं तत्-
त्संसर्गतामतेतादृशसामग्र्याः सत्वादिसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततयातत्स-
त्वेकारणविरहादेवतथाविधप्रत्यक्षवारणसंभवादितिवाच्यं मन्मते तादृशप्रत्यक्षंप्रतितथाविधसामग्र्याःप्रतिबंध- २०
कताधिक्येपिनिरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टसत्वादिवैशिष्ट्यबोधेतथाविधसामग्र्याः

वा

प्रतिबंधकत्वाकल्पनेन तद्दोषसाम्यात् तथा च शूर्वोक्तराजस्वत्वाभावपुरुषः स्वंदरइत्यादिविशिष्टस्वत्वादिवैशिष्ट्य-

बोधे तथाविधप्रत्यक्षं प्रतिराज्ञः पुरुषइतिशाब्दसामग्र्याः प्रतिबंधकत्वकल्पने संसर्गतावादिमते अधिकमिति नवस्व-

त्वादिप्रकारतामते घटप्रत्यक्षत्वादिकं प्रतिताहशसामग्री प्रतिबंधकतायां विभक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्ये-

न राजस्वत्वाभाववान्पुरुषइत्यादिबाधाद्यभावनिवेशाधिक्येन गौरवं अस्मन्मते ताहशोपस्थितिबाधाभावादीनां तथा-

विधवाक्यजन्यशाब्दबोधं प्रत्यहेतुतया ताहशवाक्यघटितसामग्री प्रतिबंधकतायां तेषामनिवेशादितिवाच्यं भवा-

न्मतेपि स्वत्वसंबंधावच्छिन्नप्रतियोगिताकराजाभाववत्त्वाप्यराजस्वत्वाभाववान्पुरुषइत्यादिनिश्चयस्य तदभावव्या-

प्यवत्तानिश्चयस्य च हेतुतया ताहशवाक्यजन्यशाब्दधीविरोधितया ताहशनिश्चयाभावस्य तथाविधशाब्दसामग्री प्रतिबं-

धकतायां निवेशस्याधिक्येन लाघवानवकाशात् मन्मते राजस्वत्वाभाववान् पुरुष इत्यादिबाधाभावनिवेशनेनैव
मु॰वा॰ तादृशानिश्चयकाले प्रत्यक्षाद्युपपत्तेस्तदभावानिवेशात् यत्र राज्ञः पुरुष इत्यादौ राजस्वत्ववान् पुरुष इति शाब्दा-
२१ बोधवादिनये राजकीयं स्वत्वं राजस्वत्ववान् पुरुष इत्याकारकद्विविधानुमितेरेव तदतिरिक्ताविषयकत्वेन तादृशानु-
मितीं प्रति प्रत्येकं तादृशाबाधाघटितसामग्र्याः प्रतिबंधकत्वद्वयं अस्मन्मते च तादृशानुमित्योस्तथाविधबाधजन्य
राजकीयः पुरुष इत्येतादृशबोधादतिरिक्तविषयकतया तत्र तादृशसामग्र्याः प्रतिबंधकत्वकल्पनं नास्ति तथा-
विधानुमितिशाब्दबोधसामग्र्योः सत्योरनुमितेरेवोत्पत्तेः अपि तु राजकीयः पुरुष इत्याकारकस्वत्वसंसर्गकैक २१
विधानुमितिं प्रत्येव तादृशसामग्र्याः प्रतिबंधकत्वमेकं कल्पनीयमिति लाघवमिति तदप्यकिंचित्करं भवन्मते यत्र

यादृशानुमितिः स्वीक्रियते अस्मन्मतेपि तद्वत्तादृशानुमितेः स्वीकरणीयतयाऽनुमितौ शाब्दबोधसामग्र्याः प्रतिबं
धकतासाम्यात् उपदर्शितस्थले भवद्भिरनुमितिस्वीक्रियते अस्माभिरपीतिऽतः प्रतिबंधकताद्वयमिति भवता
पि तादृशशाब्दे प्रतितादृशानुमितिद्वयसामग्रीद्वयस्य प्रतिबंधकतायावाच्यतया साम्यात् एवं राजपुरुषइत्यादि
समासवाक्यात्स्वत्वसंसर्गकशाब्दबोधस्वीकारेतादृशशाब्दसामग्र्याः स्वत्वसंसर्गकराजविशिष्टपुरुषतात्पर्यज्ञाना
दिघटितायाभिन्नविषयकप्रत्यक्षादिकं प्रतिप्रतिबंधकताधिक्येन गौरवात् तत्र राजसंबंधिप्रकारकाभेदान्वयबोध
बोधस्वीकार एवोचितः नवभवन्मतेपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबंधकताधिक्येन गौरवमिति वाच्यं
राजपदस्य राजसंबंधिनि स्वारसिकलक्षणाग्रहदशायां अभेदसंबंधेन राजसंबंधिविशिष्टपुरुषतात्पर्यग्रहसत्वे

भवन्मतेपि कर्मधारयत्वेनाभिमतानां तथाविधसमासवाक्यात्तादृशशाब्दबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबं
व्यु॰वा॰ धकताया उभयमतसिद्धत्वात् यत्तु दधिपश्यतीत्यादौ लुप्तद्वितीयाविभक्तिस्मरणेन दधिकर्मकदर्शनबोधवत् राजपु
२२ रुषइत्यादावपि लुप्तषष्ठीविभक्तिस्मरणेन राजसंबंधिप्रकारकभेदान्वयबोधनिर्वाहे राजसंबंधिनि निरूढलक्षणां स्वीकृ
त्याभेदान्वयबोधोपगमो निरर्थकः न च षष्ठीतत्पुरुषादिस्थले लुप्तविभक्तिस्मरणमेव चेदन्वयबोधस्तदा राजद्रुमस्य राजमा
तंगइत्यादिप्रयोगापत्तेः तत्र मातंगादौ राजादीनामन्वयबोधोपपत्तये राजादिपदोत्तरषष्ठ्यादिविभक्त्यनुसंधानस्यावश्य
कत्वे समानविभक्तिकतया राजादौ ऋद्धादिपदार्थस्याभेदान्वयबोधसंभवादिति वाच्यं यतस्तत्र ऋद्धराजादीनामभेदा २२
न्वयानुपपत्त्या नाभियुक्तानाम् नामप्रयोगः किंतु समासघटकपदसापेक्षतया राजपदस्यासामर्थ्यात्समासासाधुत्वे।

नसापेक्षत्वेचनतदर्थान्वितेस्वार्थस्यात्रस्वीयमहन्नियमहविशेषणत्वं अतएवशौरेः शान्तितपञ्जोयंचैत्रस्यदासभार्याइत्या
दौनसमस्यमानशान्तितरासपदादेः सापेक्षतातदर्थैकदेशशान्तनदासत्वादावेवप्रकरणकत्वचैत्रनिरूपित
त्वानामत्वयात् तदर्थान्वितेतस्याभेदान्वयोवानिवेशनीयइति तत्र स्वारसिकलक्षणाग्रहस्यलाघवेनताद
शसमभिव्याहारज्ञानादेस्तथाविधबोधजनकतायाः क्लृप्तत्वान्नचनिरूढलक्षणास्वीकारेगौरवाभावात् नच
स्वारसिकलक्षणाग्रहस्यलेतादृशान्वयबोधस्योभयवादिसिद्धेपिनिरूढलक्षणामतेसंबंधितात्पर्यस्याना
दित्वकल्पनागौरवम् अनादितात्पर्यविषयीभूतार्थनिष्ठलक्षणायाएवनिरूढलक्षणात्वादितिवाच्यं राजपुरु
षइत्यादिवाक्यजन्यशाब्दबोधात्पूर्वंनियमतोलुप्तविभक्तिस्मरणकल्पनापेक्षयातात्पर्यानादित्वकल्पनायांगौ

बु·वा·
२३
23

रवविरहादिति नैचैवं दधिपशुपतीत्यादावपि दध्यादिपदस्य दधिकर्मकादोलक्षणां स्वीकृत्य धात्वर्थेन समं तस्याभेदान्वा-
यबोधोपपादनसंभवात्तत्रापि लुप्तविभक्तिस्मरणकल्पनसमुचितमिति वाच्यं दध्यादिपदस्य दधिकर्मकादोलक्षणाया-
हृदशायामपि तस्य द्वितीयेतरविभक्त्यंततात्पर्यदशायां दधिकर्मकः पशुपतिदधिकर्मकेन पशुपतीत्यादाविवोक्तस्थले
पि दधिकर्मदर्शनान्वयबोधानुदयात् भवन्मते दधिपशुपतीति स्थलीय दधिपदोत्तरपशुपतिपदत्वरूपाकांक्षादिघटित
सामग्रीसत्वात् दधिकर्मकान्वयबोधस्यापत्तेरिति द्वितीयांतदध्यादिपदत्वावच्छिन्नधर्मिकतात्पर्यशाथान्त्वादिसमभिव्याहा-
रत्तानस्य तात्पर्यशान्वयबोधहेतुतायाश्चावश्यकत्वात् दधिपशुपतीत्यादौ लुप्तद्वितीयानुसंधानस्यावश्यकत्वात् राजसंबं- २३
धिपुरुषान्वयबोधे च राजादिपदाव्यवहितोत्तरपुरुषादिपदत्वप्रकारकज्ञानस्य हेतुतायाः स्वारसिकलक्षणायद्दस्थला-

त्वेनान्वयप्रकल्पनीयतया राजपुरुष इत्यादौ राजादिपदस्यात्तृतीयार्थं तत्त्वभ्रमदशायां राजसंबंधिपुरुषाद्यन्वयबो
धापत्त्यसंभवात् तृतीयादिविभक्त्याव्यवधानाद् दधिपश्यतीत्यादौ दधिपदाव्यवहितोत्तरप्रकारकधातुपदज्ञानस्य हे
तुतायाः सत्त्वात् पश्यति दधि पश्यति चैत्रो दधीत्यादावपि दधिकर्मकदर्शनान्वयबोधात् तादृशहेतुतायाश्च श
क्यकल्पनत्वाच्चेति तंडुलं पचतीत्यादौ तंडुलादिपदस्यैव तंडुलादिकर्मके लक्षणा विभक्तिस्तु साधुत्वार्था एवं राज्ञः
पुरुषः इत्यादावपि राजादिपदस्य संबंधादौ लक्षणा विभक्तिः साधुत्वार्थेतन्न द्विभक्त्यर्थं तत्समभिव्याहारस्य तत्तल्ला
क्षणिकार्थबोधनियामकत्वान्नातिप्रसंगः विभक्तेरेव प्रकृत्यर्थविशेषितस्वार्थे लक्षणेति तन्न संभवति विभक्तेः।
कुत्रापि शक्तेरभावात् तत्र शक्यसंबंधरूपलक्षणाया असंभवात् तंडुलः प्रमेय इत्यादौ विभक्त्यर्थामिश्रितस्यैव प्रकृ

व्यु॰वा॰
२४
25

न्यर्थस्याभानात्त्वकृतिशक्तेः स्वार्थे कृप्ततयात्तत्र लक्षणासंभवादिति तु चिंत्यं राजादिपदस्य राजसंबंध्यादौ शक्तत्वभ
मदशायामिव तदर्थलक्षणाग्रहदशायामपि राजसंबंधिनः पुरुष इत्यादाविव राजसंबंधिसंबंधी पुरुष इत्याद्यन्व
यबोधस्य सर्वजनीनानुभवसिद्धत्वात् पचति चैत्र इत्यादावपि कृतिसंबंधेन पाकादेश्चैत्राद्यंशे विशेषणत्वोपगमे न प
चतीत्यादावन्वयबोधानुपपत्तिरिष्टत्वा कृतिसंबंधस्यापि वृत्त्यनियामकतया तत्संबंधावच्छिन्नाभावस्याप्रसिध्या त
द्बोधनासंभवात् अथैवमपि चैत्रो जानातीत्यादौ चैत्राद्यंशे ज्ञानादेराश्रयतासंबंधेनान्वयबोधोपगमे ज्ञातिविरहः आ
श्रयतासंबंधस्याभावप्रतियोगितावच्छेदकतया न जानातीत्यादावाश्रयतासंबंधावच्छिन्नप्रतियोगिताकज्ञानाद्य २४
भावस्यैव भानसंभवात्तथा वत्तत्राख्यातस्याश्रयत्वार्थकत्वं निर्युक्तिकं न वधात्वर्थज्ञानादेराश्रयतासंबंधेन चैत्रादिरू

पशातिपदिकार्थेसाक्षात्प्रकारकत्वोपगमे ज्ञाने चैत्रः स्यादावपि तथान्वयबोधापत्तिरिति वाच्यं तादृशशाब्दान्वय
बोधे आख्यातान्तधातुसमभिव्याहारज्ञानस्य हेतुत्वात् भवतोप्याश्रयत्वप्रकारकबोधे तादृशसमभिव्याहारज्ञान
हेतुताया आवश्यकत्वात् यत्तु पचति चैत्रः स्यादौ पाककृतिमांश्चैत्रः इत्याकारकाख्यातार्थप्रकारकशाब्दबोधः।
तस्यात्र आख्यातजन्यकृत्युपस्थितेर्हेतुत्वकल्पनमावश्यकं तथा च तत्तदर्थविशेषान्निवेशात्मनिष्ठप्रत्यासत्त्या।
पदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थितेः कारणताबाहुल्यमिति स्वार्थविशेषान
निवेश्य धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्यैव हेतुत्वमुपेयते तथा च
तादृशकारणबाधेनैव चैत्रादेर्धात्वर्थज्ञानादिविशेष्यतया भानं न संभवति यदि च धातुत्वप्रत्ययत्वादीनामनुगता

सु·वा·
२५
25

नांउर्वचननतयानैतादृशानुगतकार्यकारणभावकल्पनं संभवतीति मन्यते तदापि यत्र ज्ञाधातोरेव पाकादौ लक्षणा
तत्र जानातीत्यादिवाक्यात्पाककृत्यादिप्रकारकान्वयबोधोत्पत्त्या ज्ञाधात्वर्थप्रकारकान्वयबोधे तदव्यवहितोत्तरति।
ङपदत्वादिप्रकारकज्ञानजन्योपस्थितेः समानविशेष्यत्वप्रत्यासत्त्या हेतुतायास्तत्र कल्पनीयतया तादृशकारणबा
धाच्चैत्रादेर्ज्ञानादिविशेष्यतयाभानानुपपत्तिर्दुर्वारैवेति तत्र प्रत्ययान्तरार्थविशेष्यकशाब्दबोधे व्यभिचारवारणाय
तादृशोपस्थितिवैशिष्ट्यस्य तादृशोपस्थितिजन्यतावच्छेदककोटौ निवेशनीयतया तदनन्तरशाब्दबोधे चैत्रादेर्ज्ञाना।
दिविशेष्यतयाभाने तादृशकारणबाधस्याकिंचित्करत्वात् तादृशानुपूर्वीघटकज्ञादिधातुजन्यज्ञानाद्युपस्थितिवै २५
त्रादिरूपविशेष्योपस्थितियोग्यताज्ञानादिघटितसामग्र्या आश्रयतासंबंधेन ज्ञानविशिष्टचैत्रादितात्पर्यकास्सर्वा।

नाम्नः सांकेतिकशब्दांतराद्यातादृशसंबंधेन ज्ञानादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य सर्वमतएवप्रसि
द्धावपि तादृशशाब्दबोधे पदार्थांतरभानं नैयत्येन तन्निश्चितयोग्यताज्ञानस्य तत्र हेतुतायाश्चावश्यकत्वात् ज्ञा
नादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानस्य ज्ञानादिविशिष्टचैत्रादिविषयकशाब्दबोधहेतुतायाः क्लृप्त
क्लृप्तत्वादिति वाच्यं भवन्मतेपि ज्ञानाश्रयताप्रकारकचैत्रादिविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतु
तायाश्चाधिक्यात् आश्रयतासंसर्गकज्ञानीयकारणतावच्छेदकस्य तदीयसंसर्गविषयताद्यदितत्प्रकारकज्ञा
नकारणतावच्छेदकापेक्षया लघुशरीरतयाश्रयतायाः संसर्गमतस्यैव लघुत्वात् न च यत्राश्रयत्वे ज्ञाधातोस
मभिव्याहृतताख्यातस्य शक्तिभ्रमः स्वारसिकलक्षणा यद्वा तत्र ज्ञानाश्रयताप्रकारकशाब्दबोधस्योभयमतसि

इतयातत्रतादृशयोग्यताज्ञानहेतुत्वमुभयवादिसिद्धमेवोक्तिवाच्यं आश्रयतायाः संसर्गतावादिनातत्रज्ञानाश्रयताप्र
कारबोधस्यानभ्युपगंतव्यत्वादिचेतत्सत्यम् एतदभिप्रायेणैवजानातीत्यादावाख्यातस्यनिरर्थकत्वंमणिकारउररीच
कार अत्राश्रयत्वेनिरूढलक्षणामुपगच्छंतांदीधितिकाराणांपुनरेषआशयः यत्रज्ञाधातोर्ज्ञानाश्रयत्वेशक्तिभ्रमःस्वा
रसिकलक्षणाग्रहोवातत्रचैत्रोयंशोधात्वर्थैकदेशस्यज्ञानादेरन्वयानुपपत्यास्वरूपसंबंधेनज्ञानाश्रयताप्रकारकचैत्रा
दिविशेष्यकान्वयबोधएवमणिकृता[illegible]कामस्वीकरणीयः तत्रचज्ञानाश्रयताप्रकारकशाब्दबोधेतत्प्रकारयोग्य
ताज्ञानहेतुतायाः क्लृप्तत्वादाश्रयतासंसर्गकशाब्दबोधेतादृशयोग्यताज्ञानहेतुताकल्पनमधिकमेवमणिकृन्म
ते नवदीधितिकृन्मतेतादृशयोग्यताज्ञानहेतुत्वाकल्पनलाघवेपिजानातीत्यादावनुपूर्वज्ञानचरितज्ञाधातुशक्ति २९

ज्ञानजन्यज्ञानोपस्थितिघटितशाब्दसामग्र्याभिन्नविषयकप्रत्यक्षादिकं प्रतिप्रतिबंधकतायां ग्राह्याव्यानजन्याश्रयत्वो
पस्थितिनिवेशस्याधिक्यात् गौरवमितिवाच्यं भवन्मतेपिज्ञानाश्रयत्वाभाववत्त्वांश्चेत्रः सुंदरइत्यादिविशिष्टवैशिष्ट्यावगा-
गाहिप्रत्यक्षेजानातिचैत्रइत्याद्यानुपूर्वीज्ञानघटितज्ञाधातुजन्योपस्थितिघटितसामग्र्याप्रतिबंधकताधिक्येन-
गौरवात् मन्मतेतादृशशाब्दसामग्रीविरोधिज्ञानाश्रयत्वाभाववत्तानिश्चयघटिततथाविधविशिष्टवैशिष्ट्याव-
वोधसामग्र्यास्तादृशशाब्दसामग्र्यासमं युगपदवस्थानासंभवेनतादृशप्रतिबंधकत्वकल्पनाविरहादितिशेषं-
दर्शितदिशावसेयं ग्रंथेवंबीत्याभूतलेनघटइत्यादौघटादिपदस्यघटप्रतियोगिकादौतदुत्तरसुविभक्तेरेववाप्र
तियोगितायांलक्षणामुपेत्यतत्रघटप्रतियोगिकाभाववोभूतलइतिरीत्यायाकारकप्रतियोगिताप्रकारकशाब्दो

मु.वा.
२८
97

पगमपदसमुचितः तथासतितथाविधसमभिव्याहारज्ञानघटितसामग्र्याघटप्रतियोगिकत्वाभाववान्भावः प्र
मेयइत्यादिविशिष्टवैशिष्ट्यबोधं प्रतिप्रतिबंधकत्वाकल्पनेनलाघवादित्युक्तनियमेनिपातातिरिक्तत्वविशेषण।
वैयर्थ्यमितिचेत् भूतलेनघटइत्यादौघटाद्यभावेभूतलाद्यन्वितसप्तम्यर्थाधेयत्वस्यैवतात्पर्यवशात्घटादौसप्त
म्यर्थेभूतलादिवृत्तित्वाभावस्याप्यन्वयबोधोऽनुभवसिद्धः अन्यथातादृशवाक्यजन्यस्याप्रामाण्यज्ञानानास्कंदि-
तबोधस्यभूतलेघटइत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाद्याधेयत्वप्रकारबोधविरोधितायाःसर्वानुभवसि
द्धायाअनुपपत्तेः नञ्पदंविनायत्रधर्मिणियस्यविशेषणतयाज्ञानंयादृशसमभिव्याहाराद्भवतितादृशसमभि २८
व्याहारस्थलेनञसत्वेतत्रधर्मिणितदभावः प्रतीयतइत्यनुभवापलापप्रसंगाच्च एवंच नञर्थाभावेऽनुयोगि

पाक

तयाघटायन्वयबोधोपपन्नयेनिपातातिरिक्तत्वविशेषणमावश्यकं एवंनचातिचैत्रःचैत्रस्यनधनंइत्यादौसम्बद्धा
कृतिचैत्रस्यत्वाभावस्यनञर्थस्यचैत्रधनादौअन्वयबोधोपपन्नयेचघटोनपटइत्यादौनञर्थपटादिभेदस्यअन्वय
बोधोपपन्नयेचतदावश्यकं नचोक्तस्थलेषुनञोऽभाववल्लाक्षणिकतयाअभाववतासममनुयोगितामभेदान्व
यबोधोपपन्नयेनिपातातिरिक्तत्वविशेषणत्वमेवोपेयतइतिवाच्यं तयासतिसर्वत्राभाववतएवनञर्थतयाशक्या
र्थपरनञोदुर्लभत्वापत्तेः अभावस्यभेदान्वयबोधोपगमेपिकार्यकारणभावाधिक्यकल्पनाविरहेणाभाववा
तिलक्षणानौचित्यात् अभाववतोऽभेदान्वयबोधेभूतलेघटइत्यादिवाक्यजन्यबोधस्याविरोधितापत्तेश्च लाघ
वात्स्वरूपसंबंधेनघटाद्यभावप्रकारकनिर्णयस्यैवविशिष्टबुद्धिविरोधित्वान्नत्वभेदसंसर्गकघटाद्यभावाश्रयप्र

सु.वा.
२८
28

कारकनिष्ठस्येति नीलोघटइत्यादौविशेषणविभक्तेरभेदार्थकत्वमतेपियदुक्तरीत्यालाघवंसंभवतितदातत्रापिन
नोविद्वेषइतिदिक् प्रत्ययाश्चविभक्तिकृत्तद्धितादिभेदेननानाविधाः विभक्तिश्चसुप्तिङ्भेदेनद्विविधा सुब्विभक्त
यः प्रथमादिभेदेनसप्ततत्रप्रथमार्थः प्रकृत्यर्थेविशेषणविधयान्वयिनीसंख्यैव अतएवयत्रविशेष्यवाचकं
समानविभक्तिकपदंनिपातपदंवानास्तितत्रप्रथमांतार्थस्यविशेषणताभासकसामग्र्यभावादसौमुख्यविशे
ष्यतयैवभासते संख्यावाचकाश्चैकवचनद्विवचनबहुवचनानांएकत्वद्वित्वबहुत्वावच्छिन्नेशक्तिःश
क्तताचस्वत्वौजसत्वादिना नतुस्त्वादितिसाधारणैकवचनत्वादिना एकवचनत्वादेर्दुर्वचत्वात् नचैकत्वादिवा २८
चकत्वेनतत् वाचकतायाः शक्ततारूपत्वेआत्माश्रयात् बोधकत्वरूपत्वेशक्तिभ्रमेणद्विवचनादीनामप्येकत्व

बोधकतयाऽतिप्रसक्तत्वात् नचैकवचनत्वादिकं जातिविशेषः सुप्त्वादिना संकरात् नच शक्तिसंबंधेनैक
वचनादिपदवत्वं तत् तदज्ञानदशायां च सुत्वादिना शक्तिभ्रमादेव शाब्दबोधः एकवचनादिशब्दस्य पदद्वयात्मक
तया तादृशसमुदायशक्तिरेवाप्रसिद्धेत्तनाशंक्यं एकं वक्तीत्यादिव्युत्पत्त्या एकवचनादिशब्दस्य स्वादिबोधकत्वे
एकादिशब्दे पि तादृशव्यवहारापत्तेरेकवचनादिशब्दस्य स्वादौ रूढिस्वीकारस्यावश्यकत्वादिति वाच्यं ग्रंथका
रीयसंकेतेनैवोपपत्तौ एकवचनादिपदशक्तेरप्रामाणिकत्वात् तान्येकवचनेत्यादिपाणिनिसूत्रस्य तदीय
संकेतग्रहपरतयाप्युपपत्तेः नहि सुप्त्याख्यो नदीत्यायनुशासनात्प्याख्येहदंतादिशब्देनयादिपदस्य शक्तिः
सिध्यति किंतु नदीयसंकेत एव अत एव नयादिसंज्ञा प्राप्नुनि संकेतशालित्वात्पारिभाषिका एव न त्वौपाधि।

सु·वा·

२९

कः अथैवमपि पाणिनिसंकेतसंबंधेन तादृशपदत्वमेव एकत्वादिशक्ततावच्छेदकमस्त्विति चेत् तादृशसंके-
तस्य केनचिद्रूपेण संबंधता संकेतत्वेन चेत्तर्हि कस्यचित्तं सएकवचनपदादौ जसादिर्बोद्धव्य इत्याकारकसंकेतस्या-
पि संभवादतिप्रसक्तिरुर्वरैव पाणिनिसंकेतत्वेन तथेति चेत्तर्हि व्याकरणप्रणेतः पुरुषांतरस्यापि तादृशसंकेत-
संभवात्तदीयसंकेतसंबंधेन तत्पदत्वस्य ङस्यादिपदानां स्यौजसादिर्बोद्धव्य इत्याकारकपुरुषविशेषसंकेतसंबं-
धेन ङस्यादिपदत्वस्य च विनिगमनाविरहेण शक्ततावच्छेदकताप्रसंगः तथा चागत्यानुपूर्वीविशेषस्यैव शक्त-
तावच्छेदका इति यत्तु संख्यापि प्रकृतेरर्थः एकवचनादिकं च एकत्वाद्यर्थे तात्पर्यग्राहकमेव नचैवमेकप्रकृत्य- २९
यस्याप्यनयोरर्थयोः परस्परमन्वये आकांक्षाविरहात् घटादावेकत्वाद्यन्वयानुपपत्तिः अन्यथा हर्यादिपदाद्युपस्थि-

तयोरेव स्वार्थयोराधाराधेयभावेनान्वयबोधापत्तेः घटादिपदस्यैकत्वादिविशिष्टघटादौ च न शक्तिसंभ
वः घटत्वरूपंपधर्मेपेत्मादैसंख्यानवच्छिन्नघटादेरेव बोधादिति वाच्यं आकाङ्क्षावैचित्र्यादेकप्रकृत्युपस्थाप्ययो
रपि चैकत्वाद्योः परस्परमन्वयसंभवात् अत एव त्वेउपात्तयाप्रकाराद्युपस्थाप्ययोरप्ययोगव्यवच्छेदाद्योः
परस्परान्वयबोधः नचैवं कर्मत्वादिकमपि प्रकृत्यर्थ एवास्तु किं तत्र द्वितीयादिशक्त्येति वाच्यं नामार्थधात्वर्थ
योः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नतया कर्मत्वादेर्नामार्थत्वेनेन समं धात्वर्थान्वयासंभवात् न च संख्यायाः
प्रातिपदिकार्थत्वे सति तात्पर्यग्राहकं विनैव शक्तिभ्रमं लक्षणाग्रहं वा द्विवचनाद्यं तपदादेकत्वादिबोधसंभवा।
त् एकादितात्पर्येणैकवचनाद्यं तस्यैव द्विवचनाद्यं तस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति वाच्यं अनादिता

मु·वा·

३०

30

त्पर्यस्यैवस्वारसिकप्रयोगमूलत्वात् एकवचनाद्येतत्पदस्यैवैकत्वादावनादितात्पर्योपगमेनातिप्रसंगविरहात् द्वेक
योर्द्विवचनैकवचने इत्याद्यनुशासनेचतात्पर्यग्राहकमेवेतिवैयाकरणमतं तदसत् अनंतानांप्रकृत्यानुपूर्वीणांशक्तता
वच्छेदकत्वापेक्षयात्यल्पतरविभक्त्यानुपूर्वीणामेकत्वादिशक्ततावच्छेदकत्वस्यैवोचितत्वात् नचप्रातिपदिकत्व
मेवतच्छक्ततावच्छेदकंनतुघटपदत्वादिकमितिनशक्त्यानंत्यमितिवाच्यं प्रातिपदिकत्वस्यदुर्वचत्वात् तदज्ञा
नेप्येकत्वादिबोधस्यानुभवसिद्धत्वात् पदत्वेनवर्णत्वेनवाशक्तत्वेविभक्तेरपितद्वाचकतासिद्धेः एकत्वादिशा
ब्दबोधात्पूर्वंवर्णत्वाद्युपस्थितेरप्यनौकत्वात् फलाविरोधेनतत्कल्पनेचगौरवात् एवमानुपूर्वीभिन्नधर्मस्य ३०
वाचकतावच्छेदकत्वेघटपदंचनसंख्यावाचकमितिविपरीतनिश्चयकालेपिताद्दशधर्मावच्छिन्नस्यवाचकता।

वरमु२

यद्रूपसंभवाद्घटइत्यादौसंख्यायाबोधापत्तिः अथविभक्तीनांसंख्यार्थकतामते प्रकृतिविभक्त्योरेकवाक्यताविरह
निश्चयदशायांविभक्त्युपस्थाप्यैकत्वादेः प्रकृत्यर्थेऽन्वयबोधवारणायतयोः समभिव्याहारज्ञानस्यघटादिवि
शेष्यकैकत्वाद्यन्वयबोधंप्रतिकारणत्वमधिकंकल्पनीयं एकपदोपस्थापितयोर्घटैकत्वाद्योरन्वयबोधोप।
गमेचनसमभिव्याहारज्ञानस्यतद्धेतुताककल्प्यतइतिलाघवात् प्रकृत्यानुपूर्वीसंख्यावाचकतावच्छेदा।
कास्वीक्रियतइतिचेन्न आकाङ्क्षाविचारेसमभिव्याहारज्ञानहेतुतायानिराकृतत्वात् अथैवमपिविभक्तेः सं।
ख्यार्थकत्वेविनिगमनाविरहेणप्रकृतिधर्मिकस्यविभक्तिधर्मिकस्यचसंख्याप्रकारकान्वयबोधपरत्वज्ञानस्य
हेतुताकल्पनीयाविभक्तेर्द्योतकत्वमतेतुविभक्तितात्पर्यविरहेणप्रकृतिधर्मिकमेवतात्पर्यज्ञानेनतादृशान्व

सु॰वा॰ यथीहेतुरिति लाघवमिति चेन्न विभक्तेः संख्यावाचकताविरहेपि प्रकृतिविभक्त्यौरानुपूर्वीज्ञानस्य तादृशान्वयबोध
हेतुतायां निर्विभक्तिकादिपदज्ञानादन्वयधीवारणायावश्यकल्पनीयतया संख्यावाचकप्रकृतेरिव तद्वाचकविभ
३१ क्तेरपि संख्यान्वयबोधकत्वप्रकारकेच्छाविषयत्वरूपत्वात् तादृशबोधपरत्वसंभवेन विभक्तिधर्मिकतादृशज्ञानहेतु
31 तायाविनिगमनाविरहेणावश्यकत्वात् अथ स्वादीनां संख्यावाचकत्वकल्पनापेक्षया प्रकृतेस्तत्र लक्षणैवोचिता
शक्यलक्षणयोः परस्परमन्वयोपगमे क्षतिविरहात् प्रथमाविभक्तेः उक्तापि शक्तेरुक्तत्वनयानस्याः शक्यसंबंधरू
पलक्षणानसंभवति द्वितीयादेः कर्मत्वादौ शक्तत्वेपि तादृशविभक्तेस्तत्समभिव्याहृतप्रकृतेर्वा संख्यायां लक्ष ३१
णेत्यत्र विनिगमकं दुर्लभं नचैकत्वाद्यन्वयबोधे पटघटपदादिजन्योपस्थितित्वेनानंतहेतुताकल्पनमपेक्ष्य

स्वादिपदज्ञानजन्यतदुपस्थितित्वेनकतिपयहेतुताकल्पनेलाघवात् कतिपयशक्तिकल्पनागौरवमकिंचि-
त्करं सामान्यतः पदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककारणताकल्पनेतु [illegible]नसम्यक् निर्विभक्तिकपदादितः ।
संख्योपस्थितौ नदगृहीतवृत्तिकघटादिपदे तत्तद्विभक्त्यंतत्वज्ञानवतः पुंसो घटादौ संख्यान्वयबोधप्रसंगात्
घटपदादिज्ञानजन्यैकत्वाद्युपस्थितित्वेनैकत्वादिविषयकशाब्दबोधहेतुतां कल्पयित्वा विभक्तिघटादिपदानु-
पूर्वीज्ञानतादृशोपस्थित्योः परस्परसहकारेण फलजनकतायाद्युपस्थितित्वेनैकत्वादिविषयकशाब्दबोधे
अवश्यमभ्युपेयत्वादिति वाच्यं घटादिपदस्यैकत्वादौ लक्षणाग्रहसत्वे च घटं प्रमेयमित्यादिवाक्यादेकत्वं प्रमेयमित्यन्वा-
यबोधस्य सर्वमतसिद्धतया तदनुरोधेनैकत्वादिविषयकशाब्दे घटादिपदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः स

र्वसंमतत्वात् मेवं घटपदानां लक्षणया एकत्वादिशाब्दधीजनकत्वेनोभयवादिसिद्धत्वात् घटपदेनैतत्पदज्ञानज
मु॰वा॰ न्यैकत्वाद्युपस्थितीनां तच्छाब्दहेतुत्वकल्पनं प्रकृतेः संख्यावाचकतावादिनामधिकं तत्कल्पनापेक्षया चाल्पतर।
३२ त्वादिपदज्ञानजन्यैकत्वाद्युपस्थितिहेतुताकल्पनमेव लाघवं एतेन संख्याविशेषावच्छिन्नघटादिलक्षणया प्रकृ
३४ तेरर्थः न तु संख्या विभक्त्यर्थः शाब्दबोधे विभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात् घटादि
पदस्यैकत्वादिविशिष्टघटादौ लक्षणाग्रहदशायां सर्वमतएव तज्जन्यविशिष्टविषयकशाब्दधीजननात्तथावि
धोपस्थितिहेतुतायाः सर्वानुमतत्वात् पदांतरासमभिव्याहृतघटादिशब्दादेकत्वादिविशिष्टघटादिशाब्दबोध ३२
स्य सिद्धएव तद्विषयकस्मरणस्य तत्रोपगमात् तथा चोक्तं सर्वैर्द्विवाक्यं क्रियायां परिसमाप्यत इत्यपि निरस्तं यो ऽह

शपदानांलक्षणयाज्ञापकत्वादिविशिष्टस्वार्थबोधहेतुत्वंनोभयवादिसिद्धंतादृशानंतपदजन्यविशिष्टोपस्थि-
तीनांशब्दधीहेतुताकल्पनमपेक्ष्यविभक्तिजन्यसंख्योपस्थितीनामस्यानांतकल्पनेलाघवात् इदंपुनरिहा
वधेयं विभक्तेः संख्याबोधकत्वेसमानविषयकानुमित्यादिकंप्रतिशाब्दसामग्रीप्रतिबंधकतायांघातिप
दिकजन्याघटाद्युपस्थितिर्विभक्तिजन्यासंख्योपस्थितिश्चप्रवेशपतयोश्चमिथोविशेष्यविशेषणभावेविनि
गमनाविरहाद्व्यतिबंधकतावाहुल्यं प्रकृतेर्विशिष्टलाक्षणिकत्वेनउभयस्थानीयाविशिष्टविषयकोपस्थि
तिरेकैवसामग्र्यामंतर्भवतीतिलाघवं नवविशिष्टविषयकोपस्थितेरपिपकत्वादिप्रकारतानिरूपितघटा
दिविशेष्यताशालित्वेनघटादिविशेष्यतानिरूपितैकत्वादिविषयताशालित्वेनवाप्रवेशइतिविनिगमनावि

मु॰वा॰
३२
33

रहेणसाम्यमितिवाच्यं भवन्मते यौगपद्यज्ञानघटोपस्थित्येकत्वोपस्थितीनां त्रयाणां विशेषणभावे विनिगमन
विरहेण यत्र प्रतिबध्यप्रतिबंधकभावघट्टं तत्र यौगपद्यज्ञाने विशिष्टविषयकोपस्थितेः प्रत्येकं दर्शितोभय
रूपेण वैशिष्ट्यं निवेश्यत इति द्वयं प्रत्येकं तादृशानुपदयावच्छिन्नायामुपस्थितौ यौगपद्यज्ञानस्य वैशिष्ट्यं नि
वेश्य च द्वयं कल्पनीयमिति तच्च तद्द्वयमिति रीत्या अस्माकमत्यन्तरकल्पने महालाघवं ईदृशारीत्यैव चा
प्रणमतीत्यादौ प्रकर्ष विशिष्टनत्यादिर्धातूनामेवार्थः प्रादयो द्योतकाः एवं च नत्प्रकर्षादेर्वाचकान्यपीति
सर्वानुमतः यथाः परिष्कर्तुं शक्यते अन्यथा नेतथात्वजन्यप्रकर्षादिविशिष्टनत्यर्थोपस्थितीनां शाब्द ३२
जनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षाद्युपस्थितीनां तज्जनकतावच्छेदकत्वकल्पने लाघवात्त्वादीना

मित्वघटादीनामपिवाचकतानिराबाधासिद्धेरिति संख्यायाश्चप्रकृत्यर्थेपर्याप्तिसंबंधेनैवविशेषणत्वेनत-
समवायादिनातथात्वेएकव्यक्तिमात्रपरादाकाशपदादपिद्विवचनवद्बहुवचनाद्यापत्तेः तदर्थयोर्द्वित्वबहु-
त्वयोः समवायादिनाकाशाद्यन्वययोग्यत्वात् नचपर्याप्तेः संसर्गतोपगमेपिनदोषतादवस्थ्यमेवतदाकाशा-
दौद्वित्वादेः पर्याप्तिसत्त्वेप्रत्येकमाकाशादौपर्याप्तिर्नास्तीत्यस्यवक्तुमशक्यत्वात् प्रत्येकस्योभयानतिरि

क्रत्वादित्तिवाच्यं उद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेरेवसंसर्गतोपगमात् आकाशत्वादिव्याप्यतायाश्चद्वित्वादिप-
र्याप्त्यभावसत्वेनातिप्रसंगविरहात् वैशिष्ट्यंचवैजात्यनिकंनत्ववास्तवंतेनयोग्यताभ्रमजन्योपर्ज्ञकाशाविमादिवाक्यजन्यो
द्वि

त्वादिप्रकारकशाब्दबोधस्तत्रविशिष्टसंसर्गाप्रसिद्धावपिनक्षतिः दित्वादिपर्याप्त्यावत्यत्रप्रसिद्धस्याकाशत्वादिव्या
पात्वस्यध्रौव्येनेस्तत्रोपगमात् संबंधतावच्छेदकधर्मत्वस्यानुपपादितत्वात् नचप्रकृतपर्याप्त्यवच्छेदकेएवव्यापकता
संबंधेनद्वित्वान्वयः किंनोपेयतइतिवाच्यं घटाविमौ घटत्वादीनांस्वरूपतएवोपस्थिततयातत्रैतरान्वयबो
धासंबंधात् स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्वरूपपरंपरायाप्रकृतपर्याप्तिद्वित्वादेः संबंधत्वेचव्यापकतारूप
संबंधतावच्छेदकांशेभ्रमत्वस्वीकारस्यावश्यकतयाउद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गतोपेक्ष
यानिर्बीजत्वात् प्रथमव्याप्तिर्व्यापकसामानाधिकरण्यरूपैववाच्या नतुतद्वदन्यावृत्तित्वरूपा केवला
न्वयिधर्मस्यप्रकृतपर्याप्त्यवच्छेदकत्वेपत्रतत्राप्रसिद्धेः एवंचोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्य ॥

मु·वा·
३५

पेक्षयालघोः स्वव्यापकताहशधर्मवत्त्वस्यैव संबंधघटकत्वमुचितमिति चेन्न घटाकाशो नष्टाविनष्टादिवाक्य
जन्यशाब्दबोधदशायामप्याकाशाविनाशादिवाक्यात् द्वित्वबोधापत्तिः तथाहि घटाकाशो नष्टाविनष्टादितो द्वि
त्वावच्छिन्नभेदः प्रतीयते स च न स्वव्यापकाकाशत्ववत्त्वसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकः तादृश
संबंधेन द्वित्ववतोऽप्रसिद्धेः अपि तु पर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकएव तज्ज्ञानेन च पर्याप्तिसंबं
धेन द्वित्वविशिष्टबुद्धिरेव प्रतिबध्यते न तु स्वकपरंपरासंबंधेन तद्विशिष्टबुद्धिरपीति घटाकाशो नष्टाविना
दिस्थले केवलपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकभेदो नत्वाबोध्यते इत्यपि न शक्यते वक्तुं ३५
आकाशे एकत्वयुक्तत्वाद्द्वित्वपर्याप्तेः सत्वेन तत्र तेन संबंधेन तद्भेदस्य वक्तुमशक्यत्वात् आका

शत्वव्याप्यपर्याप्तिसंबंधावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्ध एवेति चेन्न द्वित्वा

दिपर्याप्तेरुभयादिवृत्तिधर्मेणैवावच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्भेदस्य तेन संबंधेन द्वित्वादिमतो

भेदस्य च तद्वृत्तित्वे तौ बाधकाभावात् नैवं घटपटौ न द्वावित्यपि प्रयोगे प्राप्येत घटपटयोरपि प्रत्येकं द्वि

त्वावच्छिन्नभेदसत्वादिति वाच्यं द्विवचनाद्युपस्थाप्यद्वित्वाद्यवच्छेदेन द्वित्वाद्यवच्छिन्नभेदस्य बाधेन तादृशप्र

योगाभावोपपत्तेः नञ्समभिव्याहृतवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदउद्देश्यतावच्छेदकावच्छेदेनैवबोध्यत इतिव्यु

त्पत्तेर्द्वित्वसामानाधिकरण्येन तद्बोधस्याकिंचित्करत्वात् न च घटत्वादेरपि प्रसक्तत्वयाद्वित्वादिपर्याप्तेरनवच्छेद

कत्वात् तदवच्छेदेन द्वित्वव द्भेदस्य भवितामप्यसत्त्वात् प्रकृतमर्थं गतेकत्वाविवक्षयां घटौ न द्वावित्यादिप्रयोगापत्तिरि

मु·वा·
३९

तिकाचं तादृशप्रयोगाभावे घटत्वादेर्द्वित्वादिपर्याप्तेरिव द्वित्वादिमद्भेदस्यावच्छेदकताया अप्रामाणिकत्वात् प्रतियो
गितावच्छेदकतावच्छेदकसंबंधावच्छेदकताया भेदावच्छेदकताया नियमासिद्धेः प्रत्युतातिप्रसक्तोपि घटत्वादि
द्वित्वपर्याप्तेरवच्छेदकः घटाविंत्यादिप्रतीतिबलात् वस्तुतस्तु घटत्वादेः प्रत्येकं द्वित्वपर्याप्त्यनवच्छेदकत्वेपि द्वि
त्वपर्याप्तिमत्त्वावच्छिन्नानतिप्रसक्तपांतदवच्छिन्नावच्छेदकत्वमव्याहतमेव प्रत्युपर्याप्त्याख्यविलक्षणसंबंध
एवाप्रामाणिकः कथं तत्संबंधेना [illegible] आकाशो न द्वाविति प्रतीतिस्तु समवायसंबंधावच्छिन्नप्रतियोगितावच्छे
दकताकभेदविषयैवास्तां आकाशादेर्द्वित्वादिसमवायसत्वेपि द्वित्वादावेव उभयादिवृत्तिधर्ममात्रावच्छिन्न
त्वोपगमात् तदनवच्छेदकाकाशत्वाद्यवच्छेदेन तद्वतो भेदस्य तत्त्वबाधकाभावादिति ॥ ॥ ॥ ३९

39

चेन्न आकाशाविभ्वादिवाक्यजन्यशाब्दबोधस्याऽप्रमात्वानुपपत्त्यैव तादृशसंबंधसिद्धेः तादृशोद्बुद्धेः समवाय
विषयकत्वे प्रमात्वनिराकरणस्याशक्यत्वात् उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य संसर्गतोप
गमे घटादिवाक्यस्याप्यप्रमाणतापत्तिः समवायस्यैक्येन घटादिनिष्ठस्य द्वित्वादिसमवायस्य पटादावपि
सत्वेन घटत्वात् नचोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायत्वेनैव संबंधतास्तु द्वित्वादिसमवायस्य
घटत्वादेस्तद्व्याप्यतया न घटाविभ्वादेरप्रमाणतेति वाच्यं एवं सति द्वित्वादेरेव लाघवेन द्वित्वादिसंबं॰
धतौचित्यात् अथास्त्वेवमेव तावपि पर्याप्तिसंबंधस्य विलयादिति चेन्न द्वित्वादिस्वरूपस्यैव द्वि
त्वादिपर्याप्तिरूपतयाऽभिमतत्वसिद्धेः उक्तं त्वदीधितिकृता पर्याप्तिश्चायमेको घट इमौ द्वौ इत्यादिप्रती

त्तिसात्त्विकः स्वरूपसंबंधविशेषइति समवायस्यनानात्वमतेचद्वित्वादिसमवायएवतत्पर्याप्तिर्नत
मु·वा· स्वरूपमतिरिक्तपदार्थोवेत्यविवादमेव अथाकाशंनद्वेइत्यादिप्रतीतिवदाकाशेनद्वित्ववदितिप्रती
३७ तेः प्रमात्वस्यवारणायद्वित्वादिमद्भेदआकाशत्वावच्छेदेननस्वीकर्त्तव्यः तथाचाकाशंनद्वेइत्यादिप्रती
37 तेरप्यप्रमात्वापत्तिरितिचेन्न आकाशंनद्वित्ववदितिप्रतीतौद्वित्वसमवायावच्छिन्नभेदएवा
विषयः मतद्वयासंबंधतुल्यत्वात् नतद्वित्वाद्यवच्छिन्नभेदः एवंचाकाशत्वाद्यवच्छेदेनद्वित्वाद्यव
च्छिन्नभेदएवस्वीक्रियतेनतुतत्संबंधावच्छिन्नइत्याकाशंनद्वेइतिप्रतीतेरप्रमात्वस्याकाशंनद्वित्वव ३७
दितिप्रतीतेर्वाप्रमात्वस्यनप्रसंगइति अथोद्देश्यतावच्छेदकव्याप्यपर्या ॥ ॥ ॥

मेद्वित्वादिसंबंधेधत्वेधवखदिरौछिन्नत्तीत्यादौउद्देश्यतावच्छेदकीभूतधवत्वखदिरत्वादिव्याप्यद्वित्वा।
दिद्वयमेवप्रत्येतव्यंनतुधवखदिरादिपर्याप्तद्वित्वादिकंतथाचैकैकधवखदिरतात्पर्येणतथाप्रयोगानु।
पपत्तिरिति द्वित्वान्वयितावच्छेदकमपेक्षाबुद्धिविशेषविषयत्वादिरूपमुभयादिनिष्ठसाहित्यंद्वंद्वसमासार्थोवा
च्यस्तथाचमीमांसकमतप्रवेशाइतिचेन्न यत्रैकधर्मस्यद्वित्वाद्युद्देश्यतावच्छेदकतातत्रैवतदवच्छेदकव्याप्तिवि
शिष्टपर्याप्तेःसंसर्गतानियमः यत्रधर्मद्वयादेस्तथात्वंतत्रकेवलपर्याप्तिःसमवायएववासंसर्गइत्युपगमा
त् विनैवसाहित्यस्यान्वयितावच्छेदकतांपैकैकधवखदिरादितात्पर्येणतादृशप्रयोगोपपत्तेःनचैवमेकैक।
तात्पर्येणापिधवौखदिरौविद्यादिप्रयोगापत्तिस्तादृशवाक्यजन्यसमूहालंबनबुद्धेर्नानाधर्मावच्छिन्नोद्देश्यताक

मु॰वा॰ ३८ 38

तयाप्युभयपर्याप्तेरपि संसर्गतयावगाहनसंभवादिति वाच्यं यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपितैकप्रका
द्वित्वादिप्रकारतानैवेवमुभयपर्याप्तेः समवायस्यवासंसर्गतयाभानात् धवौखदिरावित्यादिवाक्यजन्यसमूहालंबने
विशेष्यताभेदेनप्रकारताभेदादुद्देश्यतावच्छेदकधवखदिरत्वादिव्याप्यपर्याप्तेः संसर्गतानियमेनैकैकधवखदिरा
दितात्पर्येणतथाप्रयोगासंभवात् धवखदिरावित्यादौ समासोत्तरद्विवचनाद्धवत्वखदिरत्वावच्छिन्ननानाविशेष्यतानि
रूपितैकद्वित्वादिप्रकारताशालिज्ञानमेवजन्यते तादृशवाक्यजन्यबोधस्यसमूहालंबनात्मकतयाविशेष्यताभेदेन
प्रकारताभेदाभावात् यद्यपि समूहालंबनात्मके खड्गीचैत्रः कुण्डलीत्याकारकनानाविशेषणकैकवि
शेष्यकज्ञानेनानाप्रकारतानिरूपितैकविशेष्यतातथानतथाविधेधवखदिरौ द्वावित्याकारकेनानाविशे ३८

घ्यैकैकविशेषणाकेज्ञानेविशेष्यताभेदेपिग्रभिन्नैवघटित्वादिप्रकारताग्रसम्यासमूहालंबनतत्संदेहलव।
णयानुपपत्तिःसमासघटकयवावदिरादिपदानामेकवाक्यतानुपपत्तिश्च: तत्प्रयोज्यविषयतायासाक्षात्संपरा।
यावन्निरूपितायाविषयतातत्प्रयोजकत्वस्यैवतदेकवाक्यतापदार्थत्वात् नचैतादृशैकवाक्यताविरहेत्नतिविरा
हः तथासतिसमासस्यैवानुपपत्तिः पतिपुत्रोराज्ञः पुरुषोपमार्यतामित्यादौराजपदपुरुषपदादीनांसमासवार।
णायसमर्थपदयोरेवसमासानुशासनात् सामर्थ्यस्यचनिरुक्तैकवाक्यतारूपत्वात् जलपृथिव्योःस्नेहगंधावि
त्यादिनोपिनजलेस्नेहः पृथिव्यांगंधइत्याकारकसमूहालंबनबोधः किंतनघटत्वणोघटित्वादिनिष्ठैकप्रकारता
निरूपितजलत्वपृथिवीत्वाद्यवच्छिन्नविशेष्यतात्मकप्रकारताद्वयनिरूपिताधेयत्वप्रकारतानिरूपितंयघटित्वादि

सु.वा.
३९
39

निष्ठधर्मितावच्छेदकताऽऽपेकप्रकारतानिरूपितत्वस्वेदत्वगंधत्वावच्छिन्नविशेष्यताद्वयंतद्वान्बोधः अतोनतत्रो
ण्येकवाक्यताभंगः चैत्रोमैत्रश्चगच्छतइत्यादावाख्यातार्थद्वित्वादिप्रकारेणभानेचैत्रमैत्रोभयादौगमनाश्रयत्वा
द्यन्वयेननिरुक्तैकवाक्यतासंभवेपिसमासविधेर्विभाषाधिकारीयत्वादसमासः तत्रविशेष्यताभेदभिन्नद्वि
त्वनिष्ठप्रकारताद्वयप्रतियोगीसमूहालंबनबोधइतितन्नसम्यक् तथासत्येकगच्छत्येकैकचैत्रमैत्रतात्पर्ये
णप्रयोगानुपपत्तेः आख्यातोपस्थापितंद्वित्वादिकंचोभयादिरूपान्वयितावच्छेदकावच्छिन्नएवान्वेतीतिव्यु
त्पत्तिः तेनोक्तप्रयोगदर्शनात् क्रियापदस्यविशेष्यवाचकपदसमानवचनत्वादिनियमेपिघटद्वयादितात्पर्ये ३९
णघटस्तिष्ठतइत्यादयोनप्रयोगाः एकवचनांतक्रियापदेचतादृशविशेष्यवाचकपदप्रयोगएवसाधुअतोघटा

ल्लिष्ठतीत्याद्यो न प्रयोगः प्रत्येकघटादिव्यक्तेरेतद्देशावृत्तितायद्दशायामत्र घटौ स्तः घटाः संतीत्यादयः कथं न
प्रयोगाः घटादौ घटत्वादिव्याप्तिविशिष्टपर्याप्तिसंबंधेन द्वित्वसत्त्वरूपादिसंबंधेनैतद्देशावृत्तित्वाश्रयत्वादेश्चाबा
धात् नच द्वित्वेनोपस्थितयोर्द्वयोरेव व्यक्त्योरेवं बहुत्वेनोपस्थितासु व्यक्तिषु विधेयान्वयाद्युक्तं तत्रैवैतद्देशावृ-
त्तित्वाश्रयत्वादिबाधात् न तादृशप्रयोग इति वाच्यं व्यक्तं तत्रैयोग्यतया तादृशविधेयानवगाहिनप्रत्येकघटेतदा-
वगाहिनो बोधस्योत्पत्तौ बाधकाभावात् न तात्पर्येण तथाप्रयोगस्य दुर्वारत्वात् नच व्यासज्यवृत्तिधर्मो यत्र विधेयता
वच्छेदकस्तत्र यावत्स्वत्वविधेयतावच्छेदकस्वपर्याप्तिस्थलावृत्तीनामेव पदार्थान्तरेणान्वय इति व्युत्पत्तिस्तन्निर्वाहाय
च तादृशधर्मावच्छिन्नेतरान्वयबोधजनकसामग्र्या उभयादिविषयकपदार्थान्तरान्वये द्वित्वमेव जन्यतावच्छेदकं

मु॰वा॰ वक्तव्यमितिद्वित्वादिनैकघटादिमात्रविषयकाद्वित्वाद्यन्वयबोधोनसंभवतीतिनतादृशबोधेतात्पर्यं॥
८० तादृशप्रयोगापत्तिरितिवाच्यं योग्यताभ्रमेणाकाशवत्तस्मादिवाक्याद्वित्वादिनैकव्यक्तिमात्रविषयकप
दार्थांतरान्वयबोधात्तादृशानुमितेस्तन्निर्वाहककार्यकारणभावस्यचकल्पनासंभवात् यत्रद्वित्वाद्यवच्छिन्नो
द्देश्यताकत्वञ्चोद्देश्यतावच्छेदकतानियमतोविधेयसंसर्गभासनइतिव्युत्पत्तिः यत्रचोद्देश्यतावच्छेदकवि
शिष्टाधिकरणाप्रसिध्यातद्व्यापकत्वमप्रसिद्धंतत्रापितदंशः प्रसिद्धानांतद्घटकपदार्थानांविशेष्यविशेषणा
भावापन्नानांभानसंभवात्रपीतशंखोस्त्वस्मादौतादृशव्युत्पत्तिभंगप्रसंगःएवचैकघटादिव्यक्तिमात्राधिकरण ८०
परस्मात्तत्रघटोस्त्वस्मादिवाक्यस्यप्रामाण्यंघटघटमेवउद्देश्यतावच्छेदकीभूतघटमात्रवृत्तिद्वित्वादिव्यापकतायास्तादृशवा˅ कांप्रति

पायायाविधेयसंसर्गेबाधादिति तदपितुच्छं प्रचयदोषत्वहत्यादौ द्वित्वसमानाधिकरणान्योन्याभावप्रतियोगिता
नवच्छेदकत्वस्य द्वित्ववद्घटादिनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वस्य च तदधिकरणावृत्तिघटाद्यंतरनि-
ष्ठाभावप्रतियोगितावच्छेदकीभूतेतत्तद्विधेयसंसर्गत्वाबाधात् घटद्वयाद्यधिकरणपरत्वादृष्टवाक्यस्याप्यप्रामा-
ण्यापत्तेः तत्तद्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्योक्तविधेयसंसर्गत्वे मानोपगमस्तु न सं-
भवति तत्तद्वित्वत्वेनानुपस्थितेः न च तदवच्छिन्नत्वस्य संसर्गतयाभानेतेन रूपेणोपस्थितेर्नापेक्षेति वाच्यं तत्संस-
र्गावच्छिन्नतत्प्रकारतानिरूपिततद्विशेष्यताशालिशाब्दबोधपरं इत्याकारकतात्पर्यज्ञाने संसर्गस्य विशेषणतया तज्ज्ञा-
ननिर्वाह्यसंसर्गघटकार्थोपस्थितेरपि शाब्दबोधात् प्रागावश्यकत्वात् प्रकृतसंसर्गेणैकपदार्थविशिष्टापरप-

सु॰वा॰
५२

दार्थत्वज्ञानस्यप्रकृतवाक्यार्थविषकतयाप्रागसंभवेनोपदर्शिततात्पर्यज्ञानस्यैवशाब्दधीहेतुत्वोपगमात् ।
एवंच वाक्यार्थघटकसंसर्गस्यानतुगमेनात्रघटोस्तित्यादौवाक्यभेदप्रसंगाच्च यच्चोच्यते व्यासज्यवृत्तिधर्मा
वच्छिन्नोद्देश्यताकशाब्दबुद्धौस्वव्याप्यतादृशधर्मवत्त्वमपिविधेयस्यसंसर्गतयाभासतइतिभ्रमांतिः व्याप्यत्वं
चतद्वृत्तत्वाहत्तित्वंव्यतिरेकिविधेयकस्थलेतादृशधर्मवत्त्वंचोद्देश्यतावच्छेदकताघटकसंबंधेनबोध्यं अत्रघटोस्ति
त्यादावेतद्देशावर्त्तमानत्वरूपविधेयस्यप्रागुक्तव्याप्तिमत्तदेशास्यैकघटादिव्यक्तिमात्राधिकरणत्वेघटपटादिनिष्ठद्वि ।
त्वमेवघटत्वव्याप्यपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसंबंधावच्छिन्नवृत्तित्वंचघटादौबाधितमितितादृशवाक्यस्या ।
प्रामाण्यं अधिकरणस्यघटद्वयादिमत्त्वेचघटत्वादिव्याप्यद्वित्वमेवतथेतिघटत्वादिव्याप्यपर्याप्तिसंबंधेनतद्वृत्त्वेघटा

वोद्धः केवलान्वयिविधेयकस्थले च द्वित्वत्वाद्यवच्छिन्नव्यापकत्वमेव संसर्गघटकं न च तादृशव्यापकताया अवृत्ति
त्वात् न हि तत्र द्वित्वत्वाद्यवच्छिन्नव्यापकत्वमिति न पूर्वोक्तदोषावकाशः घटावानयति चैत्र इत्यादौ चैत्रकर्तृका
नयनकर्मत्वादिव्याप्यद्वित्वादिमन्निष्ठनिरूपकताकाधेयत्वादिसंबंधेन कर्मतापो घटाघत्वयोभ्रमपन्नस्तेन चै
त्रादेरेकघटादिव्यक्तिमात्रानयनकर्तृत्वेन न तादृशप्रयोगः द्वित्वादिमत्त्वं च प्रकारतावच्छेदकीभूतघटत्वादि।
व्याप्यपर्याप्तिसंबंधेन तेन चैत्रस्य पटादिसद्भिन्नैकघटादिव्यक्त्यानयनकर्तृत्वेपि न तादृशप्रयोगः एवमस्या
पृतं यत्रानेकवृत्तिधर्मो द्वित्वाद्यन्वयितावच्छेदकतया भासते तत्रोभयादिनैव समं पदार्थान्तरान्वयः यत्रैकमा
त्रवृत्तिस्तत्र यथा तत्रैकेनापीति व्युत्पत्तिभेदावलंबनात् कार्यकारणभाववैचित्र्योपगमाच्च सर्वसामंजस्यमित्यपि वदं

मु·वा· ति प्रथघटादिव्यक्तिभेदेनानयनकर्मताभिन्नैवेतिप्रतिसंधानवतः पुंसोघटावानयघतीतिवाक्याद्बोधात्तुप
५२ पत्तिस्तस्यकर्मतात्वावच्छेदेनाधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्यद्वित्वावच्छिन्नघटाद्यभावस्यानिश्चयसंभवा
52 त् तस्यचद्वित्वादिनातादृशसंसर्गकघटादिविशिष्टधीविरोधित्वादितिचेन्न उभयत्वाद्यवच्छिन्नाभाववमाज्ञान
मुभयत्वावच्छिन्ननिरूपितसंसर्गावगाहिज्ञानमेवप्रतिबध्नाति नतुकेवलंविशेष्येविशेषणमितिरीत्याजायमानं
उभयत्वादिनोभयादिविशिष्टज्ञानंप्रतोविशेषदर्शिनांतादृशवाक्यादाधेयत्वांशेउभयत्वाद्यवच्छिन्ननिरूपितत्वाव
गाहिभ्रमात्मकंज्ञानेनभवत्येवापितुनतदंशेतदनवगाहिभ्रमात्मकमितिउभयत्वावच्छिन्ननिरूपिताधेयत्वंचो ५२
भयादिवृत्तावेकस्मिन्न्यर्मेप्यवनतुप्रत्येकमात्रवृत्तावितिकर्मत्वांशेतादृशाधेयत्वावगाहिज्ञान ॥

स्यभ्रमत्वमित्यवधेयम् संख्याश्च प्रकृत्यर्थतावच्छेदकगताः क्वचित्प्रतीयंते यथा संपन्नो व्रीहिरित्यादौ एतनत्वं
च प्रागेवाभिहितं विरुद्धसंख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्या च संख्या प्रकृत्यर्थतावच्छेदक
संख्यायामेवान्वेति यथा शतमेकं द्वे शते इत्यादौ शतत्वादावेकत्वादीनामन्वयः अत एवैकशतद्विशतता
त्पर्येण न शतानीति प्रयोगस्तत्र प्रकृत्यर्थस्य शतस्य बहुत्वान्वययोग्यत्वेपि प्रकृत्यर्थतावच्छेदकशतत्वां।
शे बहुत्वान्वय एव बहुवचनसाधुत्वात् तादृशबहुत्वस्य एकशतादिवृत्तिशतत्वादौ बाधात् न चैकश
तेपि नानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वसंभवात् एकशतनिष्ठशतत्वेपि बहुत्वान्वययोग्यता।
स्तेनैवेति वाच्यं परस्परसमानाधिकरणद्वयावृत्तिबहुत्वस्यैव परस्परसमानाधिकरणद्वयावृत्तिबहुत्व

मु॰ वा॰ ४३ 43

शतादिपदोत्तरबहुवचनार्थत्वान्नाट्शाबहुत्वस्यैकशतादिष्वपि नानाशतत्वादौ बाधात् अथवा बहुत्व
मेव तदर्थः परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिरेवाकाङ्क्षानिरूपकः संबन्धः यत्र द्वेशते इत्यादौ
संख्यैव शतार्थः न तु संख्येयं तदर्थत्वे हि विंशत्याद्याः सदैकत्व इत्याद्यनुशासनविरोधो द्विवचनादि
साधुतानुपपत्तिर्गवांशतमित्यादौ षष्ठ्यनुपपत्तिश्च नचाभेदस्तदर्थः तथा सति ब्राह्मणा दशेत्यत्रैव ब्रा
ह्मणानां दशेत्यपि स्यात् अस्माकं चात्र दशान्तः संख्याः संख्येये वर्तन्ते अतः परं संख्याने संख्येये चेत्यनुशासना
त् दशादिशब्दानां शतादिशब्दवत् संख्यानार्थत्वाभावात् शतादिसंख्यायाः पदार्थतावच्छेदकत्वेन तत्र षष्ठ्य ४३
र्थान्वयासंभवेन न तथा प्रयोग इति तत्र गवांशते शतानीत्यादौ संख्यायाः साधारणेन शतादिशब्दवाच्यत्वे गवांशशं तेरघा

दित्यादौ शतानाद्यर्थसंख्यायादानादिकर्मत्वान्वयायोगात्तथाप्रामाण्यानुपपत्तिः गवां शतं शुक्लमित्यादौ।
शुक्लाद्यभेदान्वययोग्यताविरहान्नदनुपपत्तिश्च तस्माद्दशादिशब्दा इव शतादिशब्दा अपि संख्यावच्छिन्नवा
चका एव न तु धर्मिविशेषणतानापन्नसंख्यावाचकाः स्वार्थैकदेशसंख्यायां स्वप्रकृतिकविभक्त्यर्थसंख्या
न्वयस्वीकारे तत्तया षष्ठ्यर्थवचने तेषां संख्यार्थकताप्रवादः न तु दशादिशब्दानां तथात्वं दशादिब्राह्मणानाम
र्थेण ब्राह्मणानां दशेत्यादिप्रयोगविरहादिति तेषां संख्येयमात्रवाचिताप्रवाद इति विंशत्याद्याः सदैकत्वे
सर्वाः संख्येयसंख्ययोः संख्यार्थे द्विबहुत्वे स्तस्त्वित्यनुशासनमपि दर्शितं स्मृत्यतिग्राहकमित्यवधेयम् एक
द्विबहुशब्दोत्तरस्य योन संख्याबोधकाः उद्देश्यतावच्छेदकविधेययोरैक्येनैकत्वादिविशिष्टैकत्वाय

मु॰वा॰
४४

न्वये आकांक्षाविरहादिति तत्तत्तरविभक्तिः साधुत्वाय नित्यबहुवचनांतेभ्यो भवादिशब्देभ्यः परं बहुव
चनमपि क्वचित्त्रिरर्थकमेव यत्रैकव्यक्तिमात्रतात्पर्येण तादृशशब्दः प्रयुज्यते तत्र बहुवचनान्वये यो॰
ग्यताविरहात् यत्र तत्तद्गुणादिसाधारणबहुत्वस्य तत्रान्वय इति तन्न प्रकृत्यर्थतावच्छेदकव्याप्यप
र्याप्तिसंबंधेनैवानेकसंख्यान्वयस्य व्युत्पन्नतया तादृशसंबंधेन तथाविधबहुत्वान्वये योग्यताविरहात्
अन्यथोदासीनघटपटादिसाधारणबहुत्वस्यान्वयसंभवेन तत्तद्गुणादिसाधारणबहुत्वान्वयस्याकिं
चित्करत्वात् प्रयाजदृष्टस्वार्थलक्षणया गुणादिसाधारणधर्मावच्छिन्नपरप्रकृत्यर्थ इति चेन्न हि बहुत्वे
न भासमाने गुणादिष्वपि पदार्थान्तरान्वयः स्यात्तथा चापो दाराः द्रव्याणि दाराः अत्र गृहे संतीमादिवाक् ४४

ग्रामग्रामाण्यापत्तिः ग्रणादिषु इभ्याभेदग्रहवृत्तित्वादेर्वा यान्मुख्यार्थपरत्वेनाष्टशब्दानां बहुवचनो।
तत्रानुपपत्तिश्चेतिन किंचिदेतत् अवादिपदार्थैकत्वायत्वयोगासत्वेपि असाधुत्वादेव तदुत्तरं नैकव
चनादिप्रयोगइतियोयम् अत्रानैकवचनस्य संख्यार्थत्वे विवदंते निष्कर्षानुसारिणः घटोस्तीत्यादौ
स्वेवचकतादेव संख्यालाभसंभवात् चैत्रेणदृष्टो घटइत्यादिस्थलानुरोधेन तस्य तद्बोधकतायाआव
श्यकत्वात् नचैकवचनत्वेनानुगतेनैकत्वे शक्तिस्तिङेकवचनस्यापि तद्बोधकत्वमस्त्वितिवाच्यं एकव
चनत्वस्यैकत्वशक्ततावच्छेदकतायाः प्रागेवनिरस्तत्वात् अस्तुवानेनरूपेण तिङेकवचनस्याप्येकत्वेश
क्तिस्तथापितजस्यैकत्वोपस्थितेः प्राब्दोपयोगित्वे मानाभावः नहिसामान्यत एकवचनज्ञानजा।

मैकत्वोपस्थितित्वेन तत्त्वाद्धेतुत्वासंभवति तथा सत्येकत्वागृहीतसुपदस्थानिकस्य प्रंसः सुपदप्रकृतिकघ
सु॰वा॰ टादिपदोपस्थाप्यघटादौ पटादिपदोत्तरामादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसंगः किंतु सुपदत्वादिप्रका
८५ रकज्ञानजन्यतदुपस्थितित्वादिनैव तथा सति घटाद्युत्तरस्वादिरूपानुपूर्वीविशेषात्मकाकांक्षाज्ञानघटि
85 तायां घटादावेकत्वान्वयबोधसामग्र्यां सुपदत्वादिप्रकारकज्ञानजन्योपस्थितेरेवांतर्भावान्नाडप्राप्तेर
नवकाशात् एवं च तिवादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेन तत्त्वाद्बोधहेतुत्वे मानाभाव इति यत्तु
तिवादेः संख्यानभिधायकत्वे चैत्रः पचति तंडुलं चैत्रेण पच्यते तंडुल इत्यादौ कर्तृकर्मवाचकपदात्तृतीयाद्वितीययो ८५
रापत्तिः कर्तृकर्मसंख्यायाअनभिधाने कर्तृकरणयोस्तृतीया कर्मणि द्वितीयेति सूत्राभ्यां तयोरनुशासनात् मायमतेल कार

स्वकर्तृकर्मवाचकत्वेन तदनभिधानस्य तृतीयाद्वितीयानियामकत्वासंभवात् नच कर्त्रादिगतसंख्यानभि
धानमेव कथं कर्त्रादिवाचकपदोत्तरं तृतीयादिनियामकं चैत्रेण पच्यते तंडुल इत्यादावपि लकारस्य चैत्रादिगत
संख्याभिधायकत्वात् एकत्वत्वादिनैकत्वसामान्यस्यैकवचनाद्यभिधेयत्वादिति वाच्यं यतस्तत्तत्संख्यान
भिधायकत्वं प्रकृते न तत्तत्संख्यानिष्ठत्वस्य निरूपकत्वं अपितु तन्निष्ठविशेष्यकसंख्याप्रकारकशाब्दबोधान
नुकूलत्वमेव तथाच कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकाख्यातसमभिव्याहृतकर्त्रादिवाचकपदा
त्तृतीयादयो भवंतीत्यत्र तदनुशासनतात्पर्यं चैत्रेण पच्यते तंडुल इत्यादौ च न चैत्रादिविशेष्यकसंख्यान्वयबोध
कत्वमाख्यातस्य आख्यातार्थभावनायामन्वयस्तद्विशेष्यकसंख्यान्वयबोधस्यैवाख्यातेन जननात्तादृशभाव

मु.वा.
४८

नान्वयबोधविशेष्यस्य प्रथमान्तपदोपस्थाप्यत्वमेव चैत्रः पचतीत्यादौ चैत्रस्य साक्षादेव भावनाविशेष्यत्वं चैत्रे।
ण पच्यते तण्डुल इत्यादौ तण्डुलादेस्तु परम्परया चैत्रनिष्ठभावनाजन्यफलशालीतण्डुल इति बोधस्य तत उदयात्. तस्माति
वादेरपि संख्यान्वयबोधकत्वमावश्यकमिति तत्र विचारसहं कर्त्रादिनिष्ठसंख्यान्वयबोधानुकूलत्वं यदि ता
दृशबोधफलोपधायकज्ञानविषयत्वाभाववत्वं तदा याति दृष्टपातिवादि ज्ञानेन सहकार्यन्तरविरहात् तादृश
बोधो न जनित इत्युपयोगे ऽपत्तीयाप्यापत्तिः यदि च तादृशबोधस्वरूपयोग्यज्ञानविषयत्वाभावस्तदाप्यगादिसमभि
व्याहृतात्मनेपदादिज्ञानस्यापि तादृशबोधस्वरूपयोग्यज्ञानाविषयाख्यातत्वेनाप्रसिद्धेः अथ कर्त्रादिविशेष्यकसंख्या
न्वयबोधत्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकत्वमेव तादृशबोधानुकूलत्वं चैत्रः पचती

मुक्तिवाद ४८

तिवादिविषयितावैत्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिकाताद‍ृ
शान्वयबुद्धित्वावच्छिन्नंप्रतिचैत्रादिपदसमभिव्याहृततिवादिज्ञानत्वेनाकांक्षाज्ञानस्यहेतुत्वात् चैत्रेणप
दिवइति च्यतेऽस्मादिवाक्यघटकतद्धितत्वनिरूपिताचनताद‍ृशीचैत्रादिपदसमभिव्याहृतताद‍ृशपदज्ञानत्वेन
ताद‍ृशान्वयबुद्धित्वावच्छिन्नंप्रत्यहेतुत्वात् नचचैत्रःपचतऽस्मादितःचैत्रादिविशेष्यकाख्यातार्थसंख्यावो
धोऽन्यत्वाचैत्रपदसमभिव्याहृततऽादिपदज्ञानत्वेनापिताद‍ृशबुद्धिहेतुताऽस्त्वेवेति चैत्रेणपच्यतऽस्मा
दिवाक्यघटकतयादिविषयतापिताद‍ृशोवेतिवाच्यं चैत्रेणपच्यतेचैत्रःपचतऽस्मादितश्चैत्रादिविशेष्यक
संभावनायाःसंख्यायाश्चबोधस्यानुदयात् तदुभयान्वयबोधेप्रथमांतचैत्रादिपदसमभिव्याहृततशब्दा

सु·वा·
४८
47

दिपदोत्तरतत्तदाख्यातपदज्ञानत्वेनहेतुत्वात् चैत्रेणपच्यतइत्यादिवाक्यघटकतण्डुलादीनांतादृशसमभिव्या
हारादिस्मृतयातद्विषयितायाश्चतादृशत्वात् चैत्रःपच्यतेतंडुलःपच्यतइत्यादिश्चैत्रतंडुलविशेष्यक।
संख्यान्वयबोधोत्पत्त्याचैत्रःपचतितंडुलइत्यत्रउभयविशेष्यकसंख्यान्वयबोधौपयिकतादृशसमभिव्याहा।
रज्ञानविषयितायाः पचतइत्यादिपदसत्वेनकर्तृकर्मणोस्तृतीयाद्वितीययोरप्रसक्तत्वेपिनतादृशवाक्यंप्रा
ज्ञाःप्रयुंजते कर्तरिसाद्यात्मकर्मणिदर्शितपरंपरयायुगपद्भावनाविशेषणकबोधजनकतायाआख्यातस्याव्यु
त्पन्नतयातादृशवाक्यादुभयविशेष्यकान्वयबोधासंभवात् आकांक्षादिसत्वात्कथंनतादृशबोधइतिचेत् अग ४८
त्यैकविधान्वयबोधेऽन्यविधान्वयबोधसामग्र्यास्तद्घटकतात्पर्यज्ञानस्यवाप्रतिबंधकत्वोपगमात् नचतंडुलंपच्यते

चैत्रश्चैत्रेणपच्यतेतंडुलइत्यादिवाक्यद्वयविषयकसमूहालंबनदशायामप्युभयविधान्वयबोधानुपपत्तिः
तादृशविधान्वयबोधेतादृशान्यविधान्वयबोधपरत्वेनागृह्यमाणतथाविधाख्यातधर्मिकप्रकृतान्वयबो
धपरत्वज्ञानस्यहेतुतयाचैत्रः पच्यतेतंडुलइत्येतादृशैकवाक्यात्तादृशद्विविधान्वयबोधवारणस्यदर्शि
तवाक्यद्वयात्तदुपपादस्यचशक्यत्वात् नचनिरुक्तसंख्यानभिधानस्यतृतीयादिनियामकत्वेचैत्रेणस्व
द्यपच्यतेचैत्रः स्वंपच्यतीत्यादौतृतीयाद्यनुपपत्तिः कर्त्रादिविशेष्यकान्वयबोधोपयिकाकांक्षादिज्ञानीय
विषयितानिरूपकत्वस्यतत्राख्यातेऽसत्त्वादितिवाच्यं कर्त्रादिपरयत्पराख्यातपदयोःसमभिव्याहारःसंख्या
न्वयबुद्धित्वावच्छिन्नप्रयोजकविषयितानिरूपकस्तत्पदेतरंतृतीयादिविभक्तिरितिनियमोपगमेनप्रथमस्य

मु·वा·
४८
48

लेचैत्रपरस्वपराख्यातपदयोर्द्वितीयेचतत्परचैत्रपदाख्यातपदयोः समभिव्याहारस्यैवतद्विशेष्यकसंख्यान्वय
बोधप्रयोजकतयाक्रमेणचैत्रपदस्वपदाभ्यांतृतीयाद्वितीययोरनुपपत्त्यनवकाशादितिचेन्न अनभिहिताधि।
कारेतृतीयाद्यनुशासनस्यकिंप्रयोजनमितिवक्तव्यं चैत्रः पचतितंडुलः पच्यतेइत्यादौचैत्रतंडुलपदाभ्यांतृती।
याद्वितीययोरप्रयोगइतिचेन् किंमणिमंत्रादिन्यायेनतादृशानुशासनस्यतयाविविधप्रयोगविरोधितायेनत
दभावस्तत्प्रयुक्तः स्यात् नचैवंसंभवति पचतिपच्यतइत्यादिक्रियायोगेकर्तृकर्मवाचकपदानंतरंतृतीयादेरसाधु
त्वस्यतत्कर्तृकत्वतत्कर्मत्वादिबोधौपयिकाकांक्षारहितत्वादिरूपस्यप्रतिपत्तिः प्रयोजनतस्येतिचेत्तर्हिउक्तेति ४८
यमपरतयापिनतत्त्वलाभः प्रथमांतचैत्रतंडुलादिपदाभ्यांतत्तदाख्यातपदयोः परस्परसमभिव्याहारा।

स्यैवं चैत्रतंडुलादिविशेष्यकत्वतदाख्यातार्थसंख्यान्वयबोधप्रयोजकतया चैत्रेण पचति तंडुलं पच्यते इति।
क वाक्यद्वये चैत्रतंडुलादिपदतिबादिपदयोः समभिव्याहारस्यातथात्वेन तद्घटकद्वितीयातृतीययोः साधुत्व।
स्योक्तनियमाव्यवच्छेद्यत्वात् तस्मात् मुख्यभाक्साधारकर्तृत्वकर्मत्वयोः कर्तृकर्मवाचकपदसमभिव्याहृ
तत्वकृतद्धितसमासैरनभिधानमेव तृतीयादिनियामकं लादीनां तदनभिधायकत्वं च न तद्वाचकत्वेन
ह्निष्ठत्वनिरूपकत्वं चात्मनेपदस्याप्याख्यातत्वेन तेत्वादिना वा कृत्यादिनिष्ठशक्तिलक्षणादिनिरूपक
त्वात् कर्त्रर्थानभिधायकाख्यातस्याप्रसिद्धेः तच्छब्दार्थोपयिकाकांक्षाशून्यत्वमेव तत् चैत्रेण पच्यते इत्या
दौप्याख्यातस्य कृत्यादिवाचकत्वेपि तच्छाब्दबोधप्रयोजकाकांक्षाराहित्येन तत्राकांक्षत्वमेव चैत्रादिपदोत्तरतृती।

व्यु॰वा॰ यद्येवं कृत्यादिबोधसंभवात् तत्तत्तादृशाकाङ्क्षायाश्च कल्पनादित्यपि न चैत्रेण पच्यत इत्यादौ तृतीयानुपपत्तेः

चैत्रः पच्यत इत्यादितश्चैत्रादौ पाककृते केवलात् पच्यतीत्यादिनस्यार्थस्य कृतिविशेष्यतया बोधात् तादृशाख्या। त

४९ धात्वोरानुपूर्वीविशेषरूपाकाङ्क्षायाः कृतिबोधौपयिकत्वात् न च समभिव्याहाररूपाकाङ्क्षा विवक्षणीया प्र

कृतिप्रत्यययोरानुपूर्वीरूपाकाङ्क्षा न समभिव्याहार इति न दोष इति वाच्यं चैत्रेण पचतीत्यादावपि तृतीयायाः।

साधुत्वापत्ते तत्समभिव्याहारस्य कृतिबोधानौपयिकत्वात् चैत्रेण विजेष्यते मैत्र इत्यादौ तृतीयानुपपत्तेश्च

विजेष्यते मैत्र इत्यादितः कृतिबोधात्तादृशसमभिव्याहारस्य कृतिबोधौपयिकत्वात् किंतु तत्तात्पर्यग्राहकत्वमेव ४९

तयाच चैत्रेण पच्यत इत्यादौ आख्यातस्य कर्तृत्वादितात्पर्यकत्वे तृतीयायाः साधुरेव चैत्रेण पचतीत्यादौ आख्यातार्था विवक्षा

यांस्तृतीयायाः साधुत्वेपि परस्मैपदस्यासाधुत्वान्नतादृशप्रयोगः परस्मैपदस्यासाधुत्वे च यथा त्वर्थविशे॰
षस्य प्रत्ययेनाविवक्षणे भावकर्मणोरिति सूत्रेणात्मनेपदनियमात् आख्यातार्थविवक्षायां न चैत्रेण प
च्यत इत्यादिप्रयोगः शबादेरसाधुत्वात् कर्तृत्वनामर्थकस्य सार्वधातुकयोग एव तत्साधुत्वात् कर्तृकर्म
त्वोभयतात्पर्येण चैत्रः पच्यते तण्डुल इत्यादयो न प्रयोगः न ह्येकतरबोधेऽन्यपरत्वेनाग्रहसमाप्ताख्यातय
र्मिकप्रकृतान्वयबोधपरत्वज्ञानस्य हेतुत्वात् चैत्रेण पच्यते तण्डुल इत्यादौ कर्मतादावाख्यातस्य तात्पर्ये प्र
हे कर्मत्वाद्यन्वयबोधोपि न भवति अथ पक्वानि भुंक्ते चैत्रः ओदनपक्त्वा भुज्यत इत्यादौ क्तान्तकर्मणः कर्तृकर्म
त्वानभिधानाच्चैत्रपदौदनपदयोस्तृतीयाद्वितीये न कथं स्यातां न च क्तेनानभिधानेपि आख्यातेन तदभिधा

सु·वा·
५०
50

नाज्ञानमभिहितं त्वेतत्समभिव्याहृतपदाभिहितत्वसामान्याभावस्यैव विवक्षणात्समभिव्याहृतेति करणचैत्रेण गम्यते
ग्रामः तेमैत्रोपि गच्छतीत्यादौ न तृतीयाद्वितीययोरनुपपत्तिः गम्यत इत्यादावाख्यातस्य तत्पदार्थसमभिव्याहृतत्वे
द्वितीयापत्तेः तथा सति भुंजाने न चैत्रेण पच्यते भोक्तव्यमोदनं पचतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कृतानयो
रभिधानात् कृताभुंजिनिरूपितयोरभिधानेपि पाकीययोरनभिधानमेवेति चेन्नहि प्रकृते तदनभिहितमेव प्रध
प्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधाने तृतीयादेः साधुतेति तदुक्तं प्रधानशक्त्यभिधाने गुणशक्तिरभिहितेव
त्प्रकाशत इति चेन्न तथापि चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ ज्ञानभेदेन विषयताभेदाभावात् चैत्रमैत्रदर्शनो। ५०
भयनिरूपितविषयित्वरूपकर्मतायाः कृताभिधानात् द्वितीयानुपपत्तिरिति चेन्न तत्प्रातिपदिकार्थविशेषणत्वमात्रेण कर्मत्वकर्तृत्वाद्यविव
क्षाया एव तदनभिधानपदार्थ

त्वात् तत्तत्प्रातिपदिकार्थविशेष्यतया कर्मत्वकर्तृत्वादिविवक्षायां द्वितीयादेः साधुत्वमित्यर्थे तात्पर्यस्य प
र्यवसितत्वात् शेषमाख्यातार्थविचारे विचारयिष्यते ऽत्यलम् आख्याते कद्विवचनादेरेकद्वित्वादिसंख्याबोध
कत्वमावश्यकं चैत्रो मैत्रश्च गच्छतः इत्यादौ द्वित्वादिबोधकस्य तस्याऽभावात् न च तत्र स्वैकवचनस्येव द्वित्वादौ
लक्षणास्त्विति वाच्यं अनुशासनिकार्यातिरिक्तेऽर्थे सुब्विभक्तेर्लक्षणाया अनभ्युपगमात् अन्यथा चैत्रो मैत्रश्च
गच्छतः इत्यादावविवक्षेदसि लक्षणयैव स्वादिना द्वित्वादिबोधनसंभवादौजसादिरूपादेशिस्मृतिद्वारा द्वित्वादि
बोधनिर्वाहाय सुपां सुलुगित्यादिसूत्रेणौजसादिस्थाने स्वाद्यादेशस्य वैयर्थ्यात् चैत्रादिपदोत्तरैकवचनस्य द्वि।
त्वादिलाक्षणिकत्वेन तदप्रकृत्यर्थमैत्रादिसाधारणद्वित्वादिबोधस्याकव्युत्पत्तिविरोधेनाप्यनुपपत्तेश्च आख्या।

मु॰वा॰ तार्थसंख्यान्वयबोधे च स्वसमानविशेष्यकतदर्थभावनान्वयबोधसामग्री अपेक्षिता भावनायावाधात्वादिग्रहकाले
५१ तमात्यर्थग्रहशून्यकाले बोधस्थले द्वित्वाद्यबोधात् भावनायाश्च विशेष्ये धात्वर्थादौ द्वित्वानन्वयाच्च तादृशसामग्र्याश्च
51 संख्यान्वयबुद्धित्वावच्छिन्नंप्रतिनिरूपकत्वे श्येणादेस्तत्तात्तदर्थकत्वेप्याख्यातजन्यसंख्योपस्थितियोग्यताज्ञानविशेषादिघ
टितसामग्र्या भावनानवगाहिसंख्यान्वयबोधस्य कदाप्यजननात् संख्यान्वयबोधसाधारणभावनान्वयबोधत्वावच्छिन्नंप्रत्
नामपि तत्सामग्रीघटकत्वेनापेक्षाभावात् न च तेषां भावनान्वयबुद्धित्वे संख्यान्वयबुद्धित्वे वा जन्यतावच्छेदकमिति तत्र विनि
गमकाभावः संख्यामविषयीकृत्यापि भावनान्वयबोधस्यानुभवसिद्धत्वात् द्वितीयस्य जन्यतावच्छेदकत्वासंभवादि ५१
ति दिक् गुणादिपदोत्तरद्विवचनादपेक्षाबुद्धिविषयत्वरूपमेव द्वित्वादिर्बोध्यते न तु संख्या गुणो गुणानंगीकारा

त् द्रव्यगतद्वित्वादेश्चस्वाश्रयसमवेतत्वादिनैकव्यक्तावपिसत्वात् तद्वैकमात्रवृत्तिधर्मस्यप्रकृत्यर्थताव
च्छेदकत्वेनव्याप्यत्वविशिष्टपर्याप्तिसंबंधेनप्रकृत्यर्थत्वेति अन्यत्रतुशुद्धपर्याप्तिसंबंधेनेतिनद्वंद्वादिस्थलो
क्तदोषइतिविडपंपरामर्षः कर्मणिद्वितीयेत्यनुशासनात्कर्मत्वेद्वितीयार्थः तत्रकर्मपदस्यधर्मपरत्वात्स
मस्याश्रवाचकतार्थकत्वात् कर्मणश्चनतथात्वेकर्मणिनामार्थस्यग्रामादेरभेदान्वयसंभवेपिधात्वर्थग
मनादिनातदन्वयासंभवात् गौरवाच्च कर्मत्वेव क्रियाजन्यफलशालित्वं तत्रच क्रियाधातुतएवलभ्यते ज
न्यत्वादिकंतुविनैवपदार्थत्वेसंसर्गतयेतिफलमात्रंकर्मप्रत्ययार्थः नचसंयोगविभागरूपफलमपिधातु
लभ्यमेवगमित्यज्यादीनांतदवच्छिन्नस्पंदादिरूपव्यापारवाचित्वादितिवाच्यंव्यापारमात्रस्यतदर्थत्वात् फलवि।

मु॰वा॰ ५२ 52

शेऽन्वयबोधे च यथा न विशेषजन्यव्यापारोपस्थितेर्दैन्तनयाग्रामं त्यजतीत्यादौ धात्वर्थस्पंदे ग्रामनिष्ठविभागजनकत्व

मेव प्रतीयते गच्छतीत्यादौ च संयोगजनकत्वेन न तु विपरीते ग्रामं गच्छतीत्यादिवच्च ग्रामे स्पंदते इत्यादयो न प्रयोगाः

द्वितीयादेर्गम्याद्युपस्थापितस्पदादावेव फलान्वयबोधकत्वात् स्पंदिप्रभृत्युपस्थापिते तस्मिन्न तथा फलान्वयबो

धजननासंभवात् न हि येन केन विदुपस्थापितयोरेवार्थयोः परस्परमन्वयः तथा सति घटकर्मत्वादिपदोपस्थापित

योरपि घटकर्मत्वयोः परस्परमन्वयप्रसंगात् कृञादिसमानार्थकयततधातूपस्थाप्ययत्ने विषयतात्मकद्वितीयार्थान्वयसं

भवेऽपि न घटं करोतीत्यादिवत् घटं यतते इत्यादिप्रयोगप्रसंगः अपि तु ययोर्यादृशोऽन्वयबोधे आकांक्षा तदुपस्थापितयोरे ५२

व तादृशबोधः आकांक्षा च द्वितीयादेर्गम्यादिना कृञादिना च कल्प्यते न तु तत्समानार्थस्पंदयतिप्रभृतिनेति न च समभिव्याहाररूपाकांक्षा

गम्यादिनेव संबंधादिनापि समानैवेति वाच्यं यतो द्वितीयादेर्गम्यादिसमभिव्याहारस्यैव फलवलेनान्वयवोधौ
पयिकत्वमुपगम्यते न तु स्पंद्यादिसमभिव्याहारस्येति न तस्याकाङ्क्षातं अन्वयवोधौपयिकसमभिव्याहा
रस्यैव तथात्वात् अत एव स्पंद्यादेः सकर्मकत्वव्यवहारः फलान्वितव्यापारवोधकधातुत्वस्यैव तन्नियामकत्वात् अ
न्यथा तयोर्व्यापारमात्रवाचित्वे त्यजति गच्छति त्यागो गमनमित्यादितोऽविलक्षणवोधप्रसंगः न हि शक्तिभ्रमाद्यजन्य
योस्तद्वोधयोर्वैलक्षण्यं कश्चिदभ्युपैति तथा सति त्यागादितात्पर्येण गमनादिपदंबुभुत्सवः प्रयुञ्जीरन् न
च तत्र फलविशेषावच्छिन्ने व्यापारे लक्षणेति नावैलक्षण्यमिति वाच्यं लक्षणया तद्धारणेऽपि शक्त्या तदाप
त्तेर्दुर्वारत्वात् न च गम्यादिशक्तिज्ञानजन्यार्थोपस्थित्या फलाविषयकवोधस्याकृत्वाप्यजननत्वात् तादृशा

स्मृ॰वा॰ शोपस्थितिघटितसामग्रीशरीरे फलविशेषबोधसामग्र्यपि निविशते तथा च त्यागगमनादिपदयोः शक्त्यानाविल
५३ क्षणबोधजनकत्वेति वाच्यम् त्यजिगम्योरेकार्थवाचकतानूपपर्यायतां विपर्ययस्य तो गमनादिपदजन्यबोधसमाना
53 कारबोधस्य सर्वानुभवसिद्धत्वात् त्यागगम्यादिशक्तिज्ञानात् फलाविषयकबोधस्यापि प्रसिद्धेः एवं तादृशस्य पुंसो ग्
ग्रामं गच्छति ग्रामं त्यजतीत्यादितोऽप्यविलक्षणबोधोदयात् फलविशेषबोधेन तत्तद्धातुयोगपदत्वनियामकत्वमपि
न शक्यते वक्तुं तथा चार्थांतस्यापि भवन्मतेन ततोऽविलक्षणबोधसंभवे नैकविधबोधतात्पर्येण प्रयुक्तज्ञानं तादृ
शप्रयोगप्रसंगो दुर्वार इति चेत् मैवं कर्मप्रत्ययासमभिव्याहृतत्यागादिपदस्य तत्तत्फलावच्छिन्नव्यापा ५३
रेणाहितात्पर्यकत्वेन न तु केवलव्यापारे विशिष्टतात्पर्यमेव च स्वारसिकप्रयोगनियामकमित्येकार्थता

त्पर्येण प्रामाणिकानां स्वारसिको न त्यागगमनादिपदप्रयोगः एवं त्यज्यादिसमभिव्याहृतकर्मप्रत्ययस्यापि फल

ग विशेषैव नियन्तेन तादृशतात्पर्यमिति न विभागादिना तात्पर्येण ग्रामं गच्छतीति प्रयोगः तदर्थबोधकतामात्रेण त

तदर्थतात्पर्येण स्वारसिकप्रयोगनियामकं तथा सति शक्तिभ्रमादिना घटादिपदस्यापि पटादिबोधकतया

तत्तात्पर्येण स्वारसिकघटादिपदप्रयोगापत्तेः न च शक्त्याबोधकत्वे तथा निरूढलक्षणयापि स्वारसिकप्रयो

गात् शक्तिभ्रमे लक्षणाज्ञाने वान्तरेण गम्यादेर्विभागादिरूपफलविशेषविशेषितसंदादिबोधकत्वाभाव।

नियमो सिद्ध एवेति तात्पर्यभ्रमसहकृतशक्तिभ्रमया तादृशबोधजननेपि न क्षतिः विनालक्षणाग्रारंभ्रमो

नधीनतादृशबोधोयोगमिप्रभृतितो न संभवतीत्येव नियमः स एव तात्पर्यभ्रमेणैव निर्वहति विभागाद्यर्थे।

सु·वा·
५४
54

पूर्वं पूर्वेषामनादितात्पर्यभ्रमवतो वक्तुस्तत्तात्पर्येण ग्रामं गच्छतीत्यादिप्रयोगो यत्र तत्र श्रोतुस्तात्पर्यभ्रमासंभ
वेऽपि वक्तुस्तात्पर्येनादित्वभ्रम एव प्रयोगसंपादनद्वारा तदर्थबोधप्रयोजक इति न तादृशानियमव्याप्तिरिति प्रा
चीनमतपरिष्कारप्रकारः नवात्मसंयोगादिरूपफलविशेषावच्छिन्नस्पंदो गम्याद्यर्थः तद्धात्वर्थतावच्छेदक
फलशालित्वमेव नडातकर्मत्वेनातो गम्यादिकर्मत्वस्य पूर्वदेशादौ प्रसंगः नवा स्पंदे १ सकर्मकत्वं तत्फलस्य
धात्वर्थतानवच्छेदकत्वात् एवं च धातोरेव फलविशेषलाभात् फलान्वयिनी वृत्तिरेव द्वितीयार्थः नवकर्मणि
द्वितीयेत्यनुशासनविरोधः तस्य कर्मणि फलनिष्ठाधेयत्वान्वयिनि प्रकृतितात्पर्येण तदुत्तरं द्वितीयेत्यर्थात् ५४
न चैवं तस्य शक्तिग्राहकत्वानुपपत्तिः अनादितात्पर्यग्रहसंपादकत्वेन परंपरया शक्तिग्राहकत्वसंभवात् नव

फलस्यपदार्थैकदेशतयातत्रद्वितीयार्थकृतेरन्वयासंभवः कृत्यतिवैचित्र्येणप्रकृतेएकदेशान्वयांगी।
कारात् प्रथगमनेनस्पंदश्यादित्तोधात्वर्थतावच्छेदकफलेस्पंदभेदान्वयबोधसंभवेनैतादृशप्रयोगवा
रणायफलविशेष्यकान्वयबोधेतद्विशेष्यकवृत्तिज्ञानजन्यफलोपस्थितित्वेनहेतुत्वस्यावश्यकत्वात् ता
दृशकारणाभावेनधात्वर्थतावच्छेदकफलेद्वितीयार्थान्वयासंभवात्ः नवतादृशपदसमभिव्याहारज्ञाना
त्फलविशेष्यकस्पंदभेदाद्यन्वयबोधः प्रसिद्धस्मादृशरपदसमभिव्याहारज्ञानेनतादृशरपदजन्यफलोपु
पस्थितिचरिसामग्र्यास्तादृशान्वयबोधोत्पादप्रयोजिकायाअसत्त्वेनोक्तस्थलेतदापत्त्यसंभवश्चनिवाच्यं यत्रग
मनादिपदादेवलक्षणयाशक्तिभ्रमाद्वास्वातंत्र्येणफलोपस्थितिस्तत्रफलविशेष्यकस्पंदभेदाद्यन्वयबोधश्च।

मु॰वा॰ ५५ 55

सिध्यागमनपदसमभिव्याहारजन्यफलोपस्थितिघटितसामग्र्याः फलविशेष्यकसंसर्गभेदान्वयप्रयोजकतायाश्चावश्य
कत्वात्तद्धेतुत्वेन शक्तिभ्रमानधीनबोधेपि फलांशे संसर्गभेदान्वयबोधप्रसंगात् एवंच फलव्यापारयोः पृथक्शक्तिस्वी
कारेपि न निस्तारस्तथापि गमनंनस्पंदइत्यादौ फले शक्तिभ्रमया संसर्गभेदान्वयसंभवेन तादृशप्रयोगापत्तेर्दुर्वारि
त्वादिति चेन्न तद्विशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिजन्यतावच्छेदककोटौ तादृशोपस्थित्यव्यवहितोत्तरत्वनि
वेशनमावश्यकं विशेष्यतत्तत्पदमंतर्भाव्यैव पदार्थोपस्थितेरैकैकविधफलहेतुतायाव्यवस्थापितत्वादेक
पदाधीनतद्विशेष्यकबोधे पदांतरवृत्तिज्ञानजन्यतदुपस्थितेर्व्यभिचारस्य प्रकारांतरेण वारणासंभवात् एवंच ५५
प्रकृत्यर्थतावच्छेदकफले द्वितीयार्थान्वयेपि द्वतिविरहः तत्र तादृशाकारणस्य व्यभिचारप्रसक्तेरितिवदंति प्रबेरंविम नेष्या

पारस्पर्यात्वर्थतायामपिसर्वानुपपत्तीनामुद्धृतत्वात् फलावच्छिन्नस्यगुरुतयातथात्वमनुचितं अथफले

द्वितीयादेः शक्त्यंतरकल्पनामपेक्ष्याधातोर्विशिष्टशक्तिकल्पनमेवोचितं नचभवन्मतेप्याधेयत्वेशक्तिक

ल्पनयासाम्यमितिवाच्यं ग्राममध्यास्तेअधिशेतइत्यादौसर्वमतेप्याधेयत्वबोधकतयातद्वाचकतायास्त

वाप्यावश्यकत्वात् नचद्वितीयाःसंयोगादिफलवाचकत्वमते आधेयत्वेलक्षणानतुशक्तिरितिवाच्यं आ

धेयतात्वस्याखंडतयासंयोगत्वादिसमशरीरत्वात्संयोगत्वाद्यवच्छिन्नेतदवच्छिन्नेवाशक्तिरित्यत्रविनिगम

काभावात् प्रत्युतवाममताप्याधेयत्वेलक्षणैवशक्तिस्तुसंख्यायामेवयदिचद्वितीयादेःफलबोधकतामतेफलेल

क्षणैवशक्तिस्तु संख्यायामेवसंयोगविभागादिरूपप्रत्येकफलापेक्षयासंख्यायांतत्प्रयोगप्राचुर्यस्यविनिगम

कत्वादित्युच्यते तथापि त्वन्मते धात्वजन्यशुद्धव्यापारोपस्थितेः शाब्दबोधहेतुताकल्पनमधिकं द्वितीयायस्समभि
व्याहारस्थलानुरोधेन फलविशेषावच्छिन्नव्यापारे धातोर्लक्षणायाभवतश्चावश्यकत्वाज्ज्ञानजन्यताहशव्यापारोप
स्थितिहेतुतायाउभयसिद्धत्वात् यदि च स्पंदतइत्यादितइवशक्तिभ्रमाद्गच्छतीत्यादितोपिशुद्धव्यापारबोधश्चा
नुभविकइतिमन्मते तथापि त्वन्मतेशाब्दबुद्धौद्वितीयादिजन्यफलोपस्थितिकारणतायाः कल्पनाधिक्यं तज्ज
न्याधेयत्वोपस्थितिहेतुताकल्पनस्यचोक्तस्थलानुरोधेनोभयमतएवावश्यकत्वादितिचेदस्तु मन्मतेताहशका
रणतायाश्चाधिक्यंतव्यमतेत ग्रामंगच्छतीत्यादिवाक्यज्ञानघटितसामग्र्याः समानविषयकानुमित्यादि^ ५६
वेधकतायांफलप्रकारतानिरूपितव्यापारविशेष्यताकधात्वजन्योपस्थितेर्नि ॥ ॥ ॥

वेशनीयतयानस्मात्तादृशाविशेष्यताशालित्वेनव्यापारविशेष्यतानिरूपितफलप्रकारताशालित्वेना।

वानिवेशश्चात्रविनिगमनाविरहात्सामग्रीप्रतिबंधकताधिक्यमवच्छेदकगौरवंचप्राचीनमतेद्वितीया।

जन्यफलोपस्थितेः सामग्र्येनर्निवेशश्चनव्यमतस्तिङतजन्याधेयत्वोपस्थितिनिवेशस्थानीयइति नव्य

मतेतादृशस्थलेशाब्दबोधस्याधिकविषयकतयातात्पर्यज्ञानादिकमप्यधिकविषयकमेवशाब्दधीहे

तर्भविष्यति प्रतिबंधकसामग्र्यामप्येतर्भविष्यतीतिगौरवं अथफलस्यतदर्थत्वेभूमिंगच्छतिनमही

रुहमित्यादौमहीरुहवृत्तिसंयोगादेर्जनकतासंबंधावच्छिन्नाभावएवनञोर्थोवाच्यः सचवृत्तिनिया। म २

मकसंभवस्यप्रभावप्रतियोगितानवच्छेदकतयाऽप्रसिद्धः नव्यमतेना[redacted]नहि

नव्यमतेत्वितिमहीरुहेन्नरुहित्वेतायाधेयत्वप्रतियोगिकोहनि नियामकाधेयत्वीयस्यरूपसंबन्धाव

च्छिन्नप्रतियोगिताकाभाववान्धैसंभव नितियोगः तादृशाकलव्यापारा च्छूलकतिमान्

विशिष्टः इत्यत्र कल्याणयोगात् फलनिष्ठाधेयत्वप्रतियोगितावच्छेदकस्वरूपसंबन्धावच्छिन्नत्वेनितानामपिप्रतीतेः

मु॰वा॰
५७
57

तीयार्थाधेयत्वस्य फलनिष्ठोऽभावप्रकारतयेतिनानुपपत्तिः नच भूमिकर्मकगमनकर्त्रारो महीरुहकर्मक।
गमनकर्त्तृत्वाद्यभावः प्रतीयत इति वाच्यं कर्त्तृकवाचकपदाश्रवणस्थले तदसंभवात् नच तत्राख्यातार्थान्व
यबोधानुरोधेन कर्त्तृवाचकपदाध्याहारस्यावश्यकतयाऽध्याहृतपदोपस्थाप्यकर्त्तर्येव तादृशाभावोन।
न्वाबोध इति वाच्यं आख्यातार्थविशेष्यकस्यान्वयबोधस्यासंभवेनाध्याहारस्यानावश्यकत्वात् भूमेर्गम
नेन महीरुहस्येत्यादौ द्वितीयासमानार्थकर्थषष्ठ्यार्थाभावबोधकताया आवश्यकत्वाच्च नहि तत्रा।
प्याश्रयतासंबंधावच्छिन्नप्रतियोगिताकगमनाभावप्रकारप्रतीयत इति सम्यक् अनुयोग्यनुपस्थि ५७
तेर्नभोऽनुयोगिकविनिर्मोकेनाभावबोधकताया अनुपपन्नत्वादितिचेन्न वृत्त्यनियामकसंबंध।

स्याभावप्रतियोगितावच्छेदकत्वे को दोषः अथ जनकतादिसंबंधावच्छिन्नप्रतियोगिताकसंयोगाभावस्याति
रिक्तस्य कल्पने गौरवमिति चेन्न तादृशाभावस्य संयोगजनकत्वाभावसमनियतत्वेन तत्स्वरूपत्वात् तस्य चो
भयवादिसिद्धत्वात् प्रतिरिक्तप्रतियोगिताकल्पने गौरवमिति चेदस्त्वेतद्गौरवं उपदर्शितबहुविधफलाच्च
त्वेन तादृशगौरवस्याकिंचित्करत्वात् अथ फलस्य द्वितीयार्थत्वे वृत्तिनियामकसंबंधस्याभावप्रतियो
गितावच्छेदकत्वेऽपि द्रव्यं गच्छति न गुणमित्यादौ गुणादिनिष्ठसंयोगादिरूपफलस्याप्रसिद्ध्यानन्वर्था।
न्वयबोधानुपपत्तिरिति चेन्न तत्राधेयतासंबंधावच्छिन्नप्रतियोगिकप्रकृतधात्वर्थाभावस्यैव द्वितीयार्थे
नत्राबोधनोपगमात् गुणो न गुणं गच्छतीत्यादिवाक्यस्योभयमतएवाप्रमाणता अस्तु वा तत्राभावस्य

सु·वा·
५८

द्विधाभानोपगमेनगुणाभाववत्फलानुकूलसंदाश्रयत्वाभाववानगुणाइत्याकारकएवबोधः परेतुवृत्त्यनिया
मसंबंधस्याभावप्रतियोगितानवछेदकत्वेनध्वंसमतेपिध्वंसंगछतिनाभावमित्यादौगतिविरहः तथाहिस
मवायसंबंधावछिन्नाधेयत्वैनैवद्वितीयार्थोवाच्यः अन्यथाकालिकादिनाग्रामादिवृत्तिसंयोगादिकमा
दायातिप्रसंगात् तथाचाभावादिनिरूपिततादृशाधेयत्वाप्रसिध्या तथाविधबोधासंभवः निरू
पितत्वसंबंधस्यचवृत्त्यनियामकतयासमवायाद्यवछिन्नाधेयतायांनतत्संबंधावछिन्नप्रतियोगिताक
प्रकृत्यर्थाभावबोधोनसंभवत्येवेत्याहुरिति प्राचोच्यते वृत्त्यनियामकसंबंधस्याभावप्रतियोगि ५८
तावछेदकत्वेप्याधेयत्वेसंसर्गः विभक्तेः संख्यामात्रमर्थः फलावछिन्नव्यापारोधा ॥

त्वर्थइत्येवोचितं अस्तुवस्तुत्वनिवेशेविशेषणानामार्थधात्वर्थयोरपिसाक्षादन्वयबोधस्तथासत्यतिप्रसंग।
स्यप्रागुपदर्शितप्रकारेणवारणसंभवात् नवात्रकल्पेलाघवानवकाशः फलेस्वत्वंतत्रशक्त्यकल्पने
नसामग्रीप्रतिबंधकतायांद्वितीयादिजन्यफलोपस्थितिधात्वर्थजन्यव्यापारोपस्थित्युभयनिवेशस्था
नेधात्वर्थजन्यविशिष्टविषयकोपस्थितेरेकस्यानिवेशेनलाघवात् वस्तुतः शाब्दबुद्धेरधिकविष
यकत्वेरान्तः पुरुषइत्यादौस्वत्वादेः संसर्गतानिराकरणावसरेसामग्रीप्रतिबंधकतायांलाघवस्यद
र्शितत्वात् द्वितीयादेराधेयत्वमर्थः फलावच्छिन्नव्यापारश्चधातोरित्येवयुक्तं कर्माख्यातेसफ
लमर्थः अन्यथाग्रामोगम्यतइत्यादौग्रामादेर्व्यापारजन्यफलाश्रयत्वरूपकर्मत्वप्रतीत्यनुपपत्तेः

यादृशविशेष्यविशेषणभावापन्नयोः पदशक्यतातादृशविशेषणविशेष्यभावापन्नयोरेव शा-
मुवा० ब्दबोधे भानसंभवात् न तु विपरीतविशेषणविशेष्यभावापन्नयोः यत्र फले धातोः पृथक्शक्त्यभ्यु-
५९ पगमात् व्युत्पत्तिवैचित्र्येण कर्त्राख्यातसमभिव्याहारस्थले व्यापारविशेषणतया भासमानस्य कर्मा-
59 ख्यातस्थले तद्विशेष्यतया भानमिति न च पृथक्शक्तिस्वीकारे शाब्दसामग्रीप्रतिबंधकतायां वि-
शिष्टविषयकोपस्थितिस्थले उपस्थितिद्वयनिवेशेन गौरवात् गम्यादेः संपूर्वयुजप्रभृतिसमानार्थक-
ताभ्रमवतामिव विशेषदर्शिनामपि गमनेन संदश्मादिवाक्यात्संयोगादौ संदेहाद्यन्वयबोधापत्तेर्द- ५९
र्शिताया दुर्वारत्वाच्च संयोगादिविशेष्यकवृत्तिज्ञानजन्यतदुपस्थितिघटितायास्तथाविधबोधसामग्र्या

प्रसक्तत्वात् तत्तद्धात्वुपस्थाप्यव्यापारांशे तत्तद्विशेषणबोधतात्पर्यज्ञानस्य तादृशबोधप्रतिबंधकता
कल्पने गौरवादिति फलस्य द्वितीयाभावे नैवेदनुभवविरुद्धं तदापुनरनापत्त्या फलव्यापारयोः खंडशः
क्तिद्वयमेव यातोः स्वीकरणीयं आख्यातस्याश्रयत्वमेव तदर्थः अधिकमग्रे वक्ष्यते अथ द्वितीयाया
आधेयत्वार्थकत्वे व्यापारेण तदन्वयतात्पर्येण सप्तम्याइव द्वितीयाया अपि प्रयोगापत्तिः नहि गेहे पच
तीत्यादिवत् गृहं पचतीत्यादिकश्चित्प्रयुंक्ते मैवं धात्वर्थतावच्छेदकफलांशे आधेयत्वान्वयप्रवक्ता
दृशद्वितीयायाः साकांक्षत्वकल्पनात् व्यापारे तदुपस्थापिताधेयत्वान्वयबोधासंभवात्सप्तम्यर्थी
ताधेयत्वोपस्थितिसप्तमीसमभिव्याहारज्ञानघटितायाएव सामग्र्यास्तादृशान्वयबोधनियामकः

सु·वा·
९०
60

त्वात् द्वितीयासप्तम्योः समानार्थकत्वेपिव्युत्पत्तिभेदज्ञापनायैवपृथकपृथकसूत्रेणतयोर्विधानात् प्र
घाथः संयोगावच्छिन्नस्पंदस्ययत्धात्वर्थत्वात् धात्वर्थतावच्छेदकीभूतफलेआधेयत्वान्वयबोधतात्पर्येण
भूमिंपततीत्यादिप्रयोगापत्तिः नचद्वितीयोपस्थापिताधेयत्वप्रकारकफलविशेष्यकान्वयबोधेगम्या।
दिजन्यफलोपस्थितित्प्रकारकसमभिव्याहारज्ञानसामग्र्येवप्रयोजिकानतुयत्धातुजन्योपस्थितिघटि
तसामग्रीतितिनातिप्रसंगइतिवाच्यं यतधातुनैवयत्रसंयोगावच्छिन्नगमनेलक्षणादिनोपस्थापितेनत्र।
संयोगेद्वितीयार्थाधेयत्वान्वयात् प्रभाकः धातुजन्यशुद्धसंयोगावच्छिन्नस्पंदोपस्थितेः प्राक्। ९०
बोधकारणतायामवच्छेदकघटकसंयोगविषयतायांअधिकरणानवच्छिन्नत्वेविशेष ॥ ॥

णोदेयम् तथाच तादृशविषयताशालिसंयोगोपस्थित्यादिघटिसामग्र्यापवसंयोगविशेष्यकद्वि
तीयोपस्थाप्याधेयत्वान्वयप्रयोजकत्वोपगमात् नातिप्रसंगः नचैवमपिफलावच्छिन्नव्यापारबोधकत
यापत्तेः सकर्मकत्वव्यवहारापत्तिर्दुर्वारैवेतिवाच्यम् आश्रयानवच्छिन्नफलावच्छिन्नव्यापारबोधकत्व
स्यैवतादृशव्यवहारनियामकत्वात् उत्तरदेशानवच्छिन्नमेवफलंगम्यार्थतावच्छेदकमितिनानुपप
त्तिः अतएववाग्निसंयोगावच्छिन्नक्रियानुकूलव्यापारस्यजुहोत्यर्थतयाधात्वर्थतावच्छेदसंयोगाश्रय
स्याग्नेर्नतत्कर्मता आश्रयानवच्छिन्नावच्छेदकताश्रयफलत्वविरहात्संयोगनिष्ठायाधात्वर्थतावच्छे-
दकतायाआश्रयेणाग्निनावच्छिन्नत्वात् नचाग्निविशेषितसंयोगस्यतदवच्छेदकत्वेऽग्नौहुतंजुहोतीत्यत्रा

सु॰वा॰ नन्वयप्रसंगः उद्देश्यतावच्छेदकविधेययोरैक्यादिति वाच्यम् तत्र संयोगनिष्ठायामुद्देश्यतायां वा।
६१ च्छेदाधेयत्वसंसर्गेणावच्छेदकतया समवायसंसर्गावच्छिन्नाग्नित्वस्य विधेयतया उद्देश्यतावच्छेदकविधेययोरै-
61 क्यानवकाशात् वस्तुतस्तु आग्नेरन्वयेऽपि न क्षतिः भ्रमज्ञानानां तादृशप्रयोगस्याप्रामाणिकत्वात् संस्कृते
वह्नौ जुहुयादित्यादौ च विधेयांशे पृथिकावगाहनात्रासमेवानुपपत्तिः घृतादेश्चाश्रयानवच्छिन्नधात्वर्थतावा।
च्छेदकक्रियारूपफलाश्रयत्वात् कर्मतोपपत्तिः यत्र धात्वर्थतावच्छेदकत्वं यथा तद्वृत्तिग्रहः विशेषांशे साक्षात्प्र-
कारत्वं तत्र क्रियायामेव न संयोगांशेऽपीति नाग्नेर्जुहोति कर्मतापत्तिरिति तदसत् अजां ग्रामं नयतीत्यादौ सं- ६१
योगावच्छिन्नक्रियानुकूलव्यापारादिरूपधात्वर्थसंयोगादेः साक्षात्प्रकारतानतदाश्रयीभूततया मादे नै।

कर्मतानुपपत्त्यानीवह्यादेर्द्विकर्मकत्वव्याघातात् अथ तत्र ग्रामादौ प्रधानकर्मत्वं नास्त्येवापितु गौणकर्म
त्वमेव अत एव तादृशकर्मत्वमाख्यातेन नाभिधीयते प्रधानकर्मण्यभिधेये लादीनाहुर्द्विकर्मणां इत्य
नुशासनादित्यजां ग्रामो नीयत इत्यादिको न प्रयोग इति चेन्न हि तत्र ग्रामादेरिवाजापि द्वयधात्वर्थतावच्छे॰
दकतावच्छेदकफलशालित्वेन गौणकर्मत्वापत्त्या [illegible]व द्विहृतं जहातीति प्रयोगापत्तिर्दुर्वारैव अस्मन्मते
वाश्रयानवच्छिन्नसंयोगविधेयतानाशालिधात्वजन्योपस्थितिघटितसामग्र्या एव संयोगे द्वितीयार्थान्वयबो
धप्रयोजकतया नैतादृशप्रयोगापत्तिरिति यत्तु अथः संयोगावच्छिन्नस्पन्दो नयत्यर्थः अपितु गुरुत्व
जन्यतावच्छेदकजातिविशेषावच्छिन्न एवाऽत एव फलावच्छिन्नव्यापाराबोधकत्वात् न तस्य सकर्म

ब्यु.वा.
६२

कर्तृत्वमिति तत्र फलस्य धात्वर्थघटकत्वे स्पंद एव सप्तम्यर्थान्वयस्योपगंतव्यतया पर्णादिवृत्तेस्तस्य भूतलाद्यवृ
त्तितया भूतले पततीति प्रयोगानुपपत्तेः पर्णादिगतस्पंदस्य परंपरया भूतलवृत्तित्वमिति चेत्तर्हि हस्तात्पतती
तिवत् वृक्षे पततीत्यपि स्यात् अस्मन्मते चान्यत्र व्यापारे सप्तम्यर्थान्वयेप्यत्र व्युत्पत्तिवैचित्र्यादयः संयोगत्वस्य धा
त्वर्थतावच्छेदकएव तदन्वयश्चेद्दोषः अन्येतु भूम्यादेः कर्मत्वविवक्षायां भूमिं पततीत्यपि प्रयोगश्चेष्टएव।
अतएव द्वितीयाश्रितेति सूत्रेण नरकं पतित इत्युदाहरणे द्वितीयासमासविधिरुपपद्यते धात्वर्थतावच्छेदक
तावच्छेदकफले द्वितीयार्थान्वय एवाश्रयानवच्छिन्नफलोपस्थितेरपेक्षा वृक्षं जहातीति प्रयोगवारणाय ६२
स्वीक्रियत इति वदंति तदपि न भूम्यादेः कदाचित्सप्तमी कदाचिद्द्वितीयेत्यत्र नियामकाभावप्रसंगात्।

उक्तयुक्त्याफलांशएवसप्तम्यर्थान्वयस्यावश्यंस्वीकरणीयतयाव्यापारांशेऽऽधेयत्वविवक्षायांसप्तमी
फलांशेतत्वविवक्षायांद्वितीयेत्यस्यवक्तुमशक्यत्वादिति ब्राह्मणायधनंददातीत्यादौस्वस्वत्वध्वंसविशि
ष्टपरस्वत्वानुकूलेच्छाधात्वर्थः तादृशस्वत्वरूपेधात्वर्थतावच्छेदकफलएवद्वितीयार्थान्वयः उपेक्षाया
मतिप्रसंगवारणायस्वत्वनिवेशः दानेनसंप्रदानस्वत्वजनकंअपितुस्वीकारइतिमतेतुस्वस्वत्वध्वंसानु
कूलपरस्वत्वप्रकारकेच्छाददात्यर्थः तत्रस्वस्वत्वध्वंसरूपफलाश्रयत्वाद्धनस्यकर्मताथनेशतिगच्छती
त्यादौस्वस्वत्वजनकेच्छारूपस्वीकारविशेषोधातोरर्थः स्वस्वत्वरूपफलेचद्वितीयार्थाधेयत्वान्वयः तंडु
लेपचतीत्यादौरूपादिपरावृत्तिजनकाग्निसंयोगोधात्वर्थः रूपादिपरावृत्तिरूपेफलेतंडुलादिवृत्तित्वा

सु·वा·
६३
ग
67

त्वः ओदनंपचतीत्यादौओदनादिपदस्यतन्निष्पादकतण्डुलादौलक्षणा अवयवविनिपाकानभ्युपगमेचतण्

डुलंपचतीत्यादौतण्डुलादिपदस्यतदारम्भकपरमाणुषुलक्षणा ओदनंभुङ्क्तेइत्यादौगलाधोनयनंधात्वर्थः

तच्चगलावच्छिन्नसंयोगावच्छिन्नक्रियानुकूलव्यापारः तादृशक्रियाजन्यफलमप्योदनादिवृत्तित्वान्वयः उक्तयुक्त्या

गलाधोदेशस्यनकर्मता एवमन्यसकर्मकधातूनामप्यर्थाः स्वयमूह्याः गांदोग्धिपयइत्यादौद्विकर्मक-

धातुसमभिव्याहृतगवादिपदोत्तरद्वितीयाक्रियाजन्यफलशालित्वादन्यदेवकर्मत्वंबोधयति कारका-

धिकारीयेणाकथितंचेत्यनेनापादानत्वादिभिन्नधातुप्रतिपाद्यान्वयिधर्मान्तरावच्छिन्नस्यापिकर्मसंज्ञा- ६३

विधानात् गवापयोदोग्धीत्यादौधातुप्रतिपाद्यान्वयीगवादिसम्बन्धोनविवक्षितः अपितुक्षीरान्वयीसम्ब

त्तिद्वितीयानवकाशः किंतु पक्षेवैशेषिकीअत्रधात्वर्थप्रतिपाद्यत्वेनतदर्थतावच्छेदककोटिप्रविष्टस्याधारतां
गांदोग्धीत्यादौतत्कोटिप्रविष्टपयद्वितीयार्थान्वयात् तथाहि तरणानुकूलव्यापाराश्रयोर्थः द्वितीयार्थो
जनकतयात्तरणान्वयीविभागः विभागेवाधेयतयाप्रकृत्यर्थगवादेरन्वयः एवंच धात्वर्थतावच्छेदका।
त्तरणरूपफलेप्रधानकर्मत्वीराद्यन्वितद्वितीयार्थेत्यन्वयइतिगोनिष्ठविभागानुकूलपयोनिष्ठत्तरणा
नुकूलव्यापारकर्त्रीमैत्रइतिगांदोग्धिपयोमैत्रइतिवाक्यार्थीनोबोधः नचविभागोऽपादानत्वमेवेतितद्वि। वक्षात्पांदि
तीयानवकाशइतिवाच्यं धात्वर्थेतिग्रहविशेषान्वयिनोविभागस्यैवापादानत्वरूपत्वात् वृक्षात्पर्णंपत।
तीत्यादौस्पंदनरूपविशेष्यांशएवपंचम्यर्थविभागान्वयात् वस्तुतोविभागावच्छिन्नत्तरणानुकूलव्यापारोऽ

व्यु.वा.
९४

तीयार्थस्य विभागान्वयिनीत्युक्तिरेव नैवं धात्वर्थतावच्छेदकफलशालित्वरूपं कर्मत्वमेवात्रापि प्रतीयत
इति नाकथितं चेत्यस्य विषय इति वाच्यं धात्वर्थतावच्छेदकस्य धातूपात्तविशेष्यांशे साक्षाद्विशेषणत्वरूपत्वा
त् यत्र च तरणानुकूलव्यापारमात्रं धात्वर्थस्तया विवक्षितं तरणान्वयी विभागश्च विभक्त्यर्थतया न तत्रापादा
नत्वबोधिका पंचमी एवं च द्वितीयापंचम्योर्नानियमः अथवा गोभ्यो दोग्धीत्यत्रापि विभागो धात्वर्थताव-
च्छेदककोटिप्रविष्ट एव दुग्धादि भजते इत्यत्रेवावधित्वरूपापादनत्वविवक्षायां पंचमी आश्रयत्वविवक्षायां च
द्वितीया अवधित्वं चाश्रयत्वादन्य एव संबंधविशेषः अत एव तरणाद्यन्वयिनः परसमवेतत्वस्य द्वितीया ९७
र्थत्वात् पयोनिष्ठतरणस्य तन्निष्ठविभागजनकत्वेपि न पयः संदोग्धीति प्रयोगः ॥

परत्वे च विभागान्वयितावच्छेदकापेक्षया बोध्यम् दुह्यते गौः क्षीरमित्यादौ क्षरणजन्यविभागाश्र
यत्वं तूपगवादिनिष्ठमप्रधानकर्मत्वमाख्यातार्थः अप्रधाने दुहादीनामित्युक्तेः क्षीरक्षरतीत्यस्य धात्व
र्थः क्षरणमेवान्वयः आख्यातार्थः क्षरणे धात्वर्थव्यापारान्वयः तथा च विभागावच्छिन्नक्षीरनिष्ठक्षरणा
नुकूलव्यापारजन्यक्षरणजन्यविभागाश्रयो गौरिति बोधः अथवा विभागक्षरणव्यापारेषु विशकलितेष्वर्थ
ताः शक्तित्रयं विशिष्टलाभोऽन्वयबलात् कर्माख्यातस्थले वाकांक्षावैचित्र्येण तेषां विशेषणविशेष्यभा
ववैपरीत्यात् व्यापारजन्यक्षरणजन्यविभागपर्यन्तस्य धातुत एव लाभः आश्रयत्वमेवाख्याता
र्थः एवं च क्षरणविभागयोर्न द्विधानं गौणकर्मसमभिव्याहृते दुह्यंते क्षीराणीत्यादौ आत्मनेपदे
ना

मु.वा.
९५
65

नकेवलेनधात्वसहितेनवाविभागावच्छिन्नदानग्रपयत्वरूपप्रधानकर्मत्वस्यबोधनेपिपकदोभयवि
षयकर्मताबोधत्वस्याभ्युपगन्तव्यतयाऽवश्यंतेनदीराणिगोरित्यादयोनप्रयोगाः पौरवंगांयाचतइत्यादौस्वोदे
श्यकदानेच्छायाचेत्यर्थः प्रधानकर्मगवाद्यन्वितंहितीयार्थविषयित्वंधात्वर्थतावच्छेदकदानेन्वेति
स्वविषयकज्ञानादिरूपविषयोपहितेच्छाबोधकधातुस्थलेइच्छाविषयविषयत्वमेवप्रधानकर्म
त्वे भवतपववदोतिज्ञास्यतइत्यादौच्चदादेःसन्नंतकर्मता ग्रथैवंयइच्छाविषयकंदानमप्रसिद्धंतत्
इच्छारूपकर्मसमभिव्याहृतधातुघटितवाक्यागतिरितिचेत् गगनंदित्सतइत्यादिकस्याभ्रांतप्रक
षीयगगनादिविषयकदर्शनेच्छाबोधकविशेषदर्शिवचसः समेति विवेचनीयंचेदमग्रे पौरवपदोत्तर ९५

वचसः

द्वितीयायास्तद्वृत्तिरेवार्थः तस्याश्च दानेऽन्वयः पौरवस्य तादृशदानाश्रयत्वमेवाप्रधानकर्मत्वं नैवेदमिच्छा
विशेषणरूपदानस्याश्रयत्वं कर्तृत्वमेवेति वाच्यं यादृशजन्यप्रतिपत्तिविशेष्यीभूतदानाश्रयत्वस्यैव तत्क
र्तृत्वरूपत्वात् अत्र च दानस्य तादृशप्रतिपत्त्या विच्छिन्नरूपधात्वर्थविशेषणत्वात् चैत्रेण पौरवो गां याच्यते।
इत्यादावप्युक्तक्रमेण चैत्रवृत्तीच्छाविषयगोकर्मकदानाश्रयः पौरव इत्यन्वयबोधः यद्यपि निरुक्तयो
र्वृत्त्याभिर्दैव एवं वण्डद्विपाविरुध्यिप्रवृद्धिभिर्दिविद्याभिमत्यादौ भिक्षुपादानेनैव सिद्धेर्याचेरुपादानमन।
र्थकम् तथापि याचमानः शिवं सुरानित्यादौ याचतेर्न निरुक्तमितार्थकतेति तदुपादानं तत्र हि।
व्यापारजन्यत्वप्रकारकेच्छायाधात्वर्थः इच्छायाप्रधानकर्मकर्तृणान्वितद्वितीयार्थविषयितायाञ्चान्वयः

शु·वा·
६६
66

व्यापारेचस्वरवृत्तित्वस्यस्वरानितिद्वितीयान्तार्थस्यान्वयः तथाचस्वरव्यापारजन्यत्वप्रकारककल्या
णेछाश्रयइत्यन्वयबोधः गांव्रजेकृष्णइत्यादौदेशान्तरसंचारविशेषिव्यापारोधात्वर्थः संचारवि
शेषितत्वंचसंचारानुत्पादप्रयोजकत्वं अनुत्पादेप्रधानकर्मगोवृत्तित्वान्वयः देशविशेषणेभेदेचव्र
जमितिद्वितीयान्तार्थव्रजप्रतियोगिकत्वान्वयः कृष्णेनगांव्रजइत्यादावन्वयबोधः स्वयमूहनीयः
गुरुंधर्मंपृच्छतीत्यादौजिज्ञासाबोधकव्यापारोधात्वर्थः बोधेगुरुवृत्तित्वस्यजिज्ञासायांधर्मविषय
कत्वस्यान्वयःशिष्यंधर्मंब्रूतेइत्यत्रज्ञानानुकूलःशब्दप्रयोगोधात्वर्थःज्ञानेधर्मविषयकत्वस्यशिष्यवृ ६६
त्तित्वस्याप्यन्वयःइतिनवाच्यंतथासतियत्रजिज्ञासाविषयकचैत्रज्ञानेछयाप्रश्नःतादृशशब्दाद्वसामग्रीबले नैमे

त्रस्यापि प्रच्छकजिज्ञासाज्ञानेनत्वमैत्रं पृच्छतीति प्रयोगस्यापवंयत्रचैत्रज्ञानेच्छयाभूतेदैववशाच्चैत्रमैत्रस्या
पिज्ञानेनत्वमैत्रंज्ञातइति प्रयोगस्यचापत्तेः साक्षाज्ज्ञानत्वर्थविशेषणज्ञानजन्यफलाश्रयतयानत्रगुर्वादी
नांप्रधानकर्मतयाप्रधानेडुहादीनामित्यनुशासनविरोधेन पृच्छतेर्गुरुधर्ममदृष्टत्वेनकल्पनभोः।
शिष्यउच्यतेधर्ममित्यादिस्थलेचलकारादिनातत्कर्मत्वाभिधानानुपपत्तेश्चपरंतुजिज्ञासाज्ञानोद्देश्य
कत्वसम्बन्धीनः शब्दः पृच्छतेरर्थः ज्ञानेगुरुवृत्तित्वस्यान्वयः शाब्देचधर्मविषयकत्वस्यशब्दस्यचविषयता
व्यापारानुबंधिनीज्ञानस्यपरंपरयाशब्दरूपधात्वर्थविशेषणत्वात् तदाश्रयीभूतगुरोर्गौणकर्मतायर्मस्यच
धात्वर्थविषयतयाप्रधानकर्मतान्नत्रज्ञानोद्देश्यकत्वसम्बन्धीनशाब्दोऽर्थः ज्ञानेशिष्यवृत्तित्वस्यशाब्देचधर्म

सु॰वा॰
९७
67

विषयकत्वस्यान्वयः अजां ग्रामं नयतीत्यादौ ग्रामं भारं वहतीत्यादौ च उत्तरसंयोगावच्छिन्नक्रियानुकूलव्यापा
ररूपं प्रापणं धात्वर्थः तत्र क्रियारूपफले अजाभारादिवृत्तित्वान्वयः संयोगरूपफले च ग्रामादिवृत्तित्वस्या
न्वयः नीयते अजा ग्रामं उह्यते भारो ग्रामं चैत्रेणेत्यादौ उत्तरसंयोगावच्छिन्नक्रियारूपे फले आख्यातार्थः तत्र
धात्वर्थस्य तादृशव्यापारस्य जन्यतासंबंधेन तस्य वाश्रयतासंबंधेन अजाभारादिरूपप्रधानकर्मण्यन्वयः
ग्रामादिवृत्तित्वस्यान्वयस्तु संयोग एव एवं च चैत्रीयकृतिजन्यो यः संयोगावच्छिन्नक्रियानुकूलव्यापारस्तज्जन्यग्रामवृ
त्तिसंयोगानुकूलकर्मवान् अजादिरित्यन्वयबोधः नच कारकविभक्त्यर्थस्य धात्वर्थ एवान्वयनियमात् प्रत्ययोपस्था ९७
प्यसंयोगे कथं ग्रामादिवृत्तित्वान्वय इति वाच्यं भूतले घट इत्यादौ घटादिपदार्थेऽपि अधिकरणसप्तम्यर्थान्वयात् तादृशनियमा सिद्धेः अस्तु

वाधात्वर्थतावच्छेदकतावच्छेदकतयाभासमानसंयोग एव तदन्वयः फलव्यापारयोः पृथक्शक्तिमते
चाश्रयत्वमात्मनेपदार्थः उत्तरसंयोगावच्छिन्नक्रियानुरूपधात्वर्थ एव व्यापारानुरूपधात्वर्थविशेष्यतयाश्राश्रय
त्वविशेषणतयाचान्वेतितदेके [illegible] देशसंयोग एव च ग्रामादिवृत्तित्वान्वयः चैत्रीयकृतिजन्यव्यापारजन्यग्राम
वृत्तिसंयोगानुकूलक्रियावान्प्रजादिरित्यादिकारकोबोधः ज्ञानानुकूलशब्दस्य ब्रह्मंनिरूपयतीत्यादौधा
तोरर्थः तादृशविशिष्टस्यैकदेशेज्ञानांशेऽन्वयेयत्वान्वयबोधेचनद्वितीयायाः साकांक्षतास्तीक्रियते अपित
विषयतयान्वयबोध एवेतिशिष्यंब्रह्मंनिरूपयतीत्यादिर्नप्रयोगः यत्र धात्वर्थोज्ञानमेवतदनुकूलव्यापा
रश्चणिजर्थइति तदसत् धातोश्चुराद्यंतर्गततयास्वार्थ एव णिचोविधानात् अन्यथानिरूपयतीत्यस्यज्ञाप

वु·वा·
९८

यतीत्यादिसमशीलतया शिष्यं ज्ञापयतीत्यादिवत् शिष्यं निरूपयतीत्यादिप्रयोगस्य दुर्वारत्वात् अजां ग्रामं नाययति ।
शिष्यं शास्त्रं ज्ञापयति ब्राह्मणान् अन्नं भोजयति यजमानं मंत्रं पाठयति चैत्रं जनयति नायतीत्यादौ णिच्प्रत्ययप्रकृतिभू
तधात्वर्थकर्तृवाचकाजादिपदोत्तरद्वितीयाया मुख्यभाक्साधारणं कर्तृत्वमेवार्थः गतिबुद्धीत्यादिसूत्रेण कर्तुः कर्म
संज्ञाविधानात् गतिज्ञानोत्पत्त्यादिनिरूपितं कर्तृत्वं वाश्रयत्वमेव गलाधःसंयोगानुकूलक्रियानुरूपभोजनकर्तृता ।
ल्वाद्यभिधानरूपपाठनिरूपितं च तदनुकूलकृतिमत्त्वं नाशनिरूपितं च तत्प्रयोगित्वं तस्य च निरूपकतासंबंधेन ।
धात्वर्थान्वयः नव्यमते च प्रयोज्याश्रयत्वं कर्तृत्वं तत्राधेयत्वं द्वितीयार्थः यत्र चानुकूलकृतिमत्त्वं तत्र कृतिजन्यत्वं यत्र प्र । ९८
तियोगित्वं तत्रानुयोगित्वं तेषां चाश्रयतासंबंधेनैव धात्वर्थे अन्वयः गम्यर्थादिभ्यो अन्यत्र णिच्प्रत्ययप्रकृतिधात्वर्थकर्तृ

वाचकपदान्नद्वितीयातादृशाकर्त्तुः कर्मत्वातिदेशाविषयत्वात् तेनयाचयत्यन्नंसहायेनेत्यादयएवप्रयोगाः नतु
याचयत्योदनंसहायमित्यादयः केचित्तु पाकादिकर्त्तुः पाकादिकर्मत्वविरहेपिएवं तत्समुदायस्यापिधातुत्वेनत
त्कर्मतयासहायादेर्याचयत्योदनंसहायमित्यादयः प्रयोगाअपिसाधवः। अतएवाजिमदन्तंजनकोयतुस्त्वदि
त्यादयोभट्टिप्रयोगाः गतिबुद्धीत्यादिसूत्रंत्वउक्तनियमपरतयागत्याद्यर्थकधातुयोगेकर्त्तुःप्रत्ययासाधुत्वज्ञा।
पकं तेनपाचयत्योदनंसहायेनेत्यादिवत् अजपायामंयाययत्स्वनीत्यादिनप्रयोगाइत्याहुः एषामयमाशयः
हेतुमतिचेत्यनुशासनाणिजर्थोहेतुकर्त्तृत्वंनचस्वतंत्रकर्त्तृप्रेरणाअन्यनिष्ठकर्त्तृत्वनिर्वाहकव्यापारत्वपा।
कर्त्तृत्वेचवक्तविन्प्रयत्नः कविदाश्रयत्वादिकंयादृशधात्वर्थात्रनाख्यातेनयादृशाकर्त्तृत्वंबोध्यतेतदुत्तरणि

मु॰वा॰ चप्रत्ययेनचतादृशकर्तृत्वनिर्वाहकव्यापारोबोध्यते अतएवपाचयतीत्यादौपाककृतिनिर्वाहकः ज्ञापयतीत्यादौ
६९ ज्ञानाश्रयत्वनिर्वाहकः नाशयतीत्यादौनाशप्रतियोगिकत्वनिर्वाहकोव्यापारः प्रतीयते निर्वाहकत्वंचस्वरूप-
69 संबंधविशेषरूपं नतुजनकत्वमतोनज्ञापयतीत्यादावनुपपत्तिः एवंच एवंतथात्वप्रतिपादनावच्छेदकंफलं
कर्तृत्वमेवनिर्वाह्यस्यैवफलत्वात् तदाश्रयतयास्वतंत्रस्यकर्तृः कर्मतातादृशफलविशेषणतयास्वतं-
त्रकर्तृत्वमितिविवक्षायांपाचयत्योदनंसहायमित्यादयः प्रयोगाः यदातु पाकादिविशेषणतयासहाया-
दिकर्तृत्वंविवक्षितंतदापाचयत्योदनंसहायेनेत्यादयः अथयत्रचैत्रमैत्रोभयकर्तृकः एकएव ६९
पाकस्तत्रचैत्रमात्रंप्रयोजयतियज्ञदत्तेमैत्रेणामत्रयंपाचयतीतिप्रयोगा ॥ ॥ ।

पत्तिरितितत्रापिएपर्थैकतावैवन्तृतीयोतार्थमेत्रादिहृतित्वस्यान्वयोबोधः एवंचमेत्रंपाचयतीत्यादिवाक्यज
न्यबोधावैलक्षण्यात्तृतीयाद्वितीययोस्तात्पर्यभेदेनव्यवस्थायाप्रसंगतिरितिचेन्न अगत्यातत्रपाकादि
विशेषणत्वकृतेः पारतंत्र्येणव्यापारविशेषणीभूतणिजर्थकृतावभेदान्वयमभ्युपगम्यउक्तातिप्रसंगस्य
वारणीयत्वात् पदार्थैकदेशेकृतौपाकादेरिवकृतेरपिअन्वयोनुपपत्तिवैचित्र्यात् वस्तुतः कर्तृत्वंव्यापार
स्वेष्टयोगेवणिजर्थोविशिष्टलाभोऽन्वयबलादितिकेचित् अनुकूलव्यापारएवणिजर्थः तदन्वयिनीगम
नस्नानभोजनादिक्रियैवधात्वर्थतावच्छेदकंफलंतत्संबंधिनस्तादृशाक्रियाकर्तृत्वेणिपतकर्मतानादृशक्रिया
संबंधश्चाश्रयत्वकृतिमत्त्वायन्यतरोग्राह्यः अतोगमनादिसंबंधिकालादेर्नातिप्रसंगइत्याहुः अन्येवा

स्मु·वा· तादृशकर्मवाचकपदात् कदाचित् द्वितीया कदाचित् तृतीया इत्यत्र विनिगमकाभावः तादृशपदोत्तरयोस्तयो
८० स्तत्स्वार्थकतया विवक्षाभेदरूपनियामकासंभवात् इति तु चिंतनीयं अजाग्रामंयाच्यते चैत्रेणेत्यादौ चैत्रकर्तृ २
वल कव्यापारनिर्वाह्यग्रामवृत्तिसंयोगानुकूलक्रियाश्रयत्वं अजाया आकारकः शाब्दबोधः तत्र संयोगावच्छिन्नक्रि
यायाः तत्र लभ्या संयोगे ग्राममित्यादि द्वितीयांतार्थग्रामादिवृत्तित्वान्वयबलात् ग्रामादिवृत्तिसंयोगावच्छिन्न
क्रियालभ्यते तादृशाश्च णिजर्थकर्तृत्वेऽन्वयः कर्माख्यातादिसमभिव्याहारनियंत्रितव्युत्पत्तिवशाच्च
तादृशक्रियान्विताश्रयत्वरूपकर्तृत्वं तृतीयांतार्थचैत्रादिकर्तृकत्वविशेषणव्यापाररूपापरणिजर्थे नति ८०
र्वाह्यत्वसंबंधेन विशेषितमजादिरूपकर्मीभूतकर्तरि केवलव्यापारस्य णिजर्थतायां तद्विशेषणीभवदा॥

ख्यातार्थाश्रयत्वेनिर्वाह्यत्वसंबंधेनव्यापारोवाविशेषणतयाभासतइति येनगतिबुद्धित्यादिसूत्रस्यसंज्ञा
विषयकत्वेवर्णयंतितेषांमयमाशयः व्यापारएवणिजर्थः तत्रचधात्वर्थक्रियायाः स्वकर्तृतानिर्वाहकत्वसं
सर्गः अतोनकर्तुः कर्मत्वंस्त्रग्रोतरग्रामं व्यापयतेग्राममजाइत्यादौचस्वनिर्वाह्यकर्तृतानिरूपकत्वसंबंधे।
त्व नव्यापारविशेषितोधात्वर्थः कर्तृत्वेअन्वेतितच्चाश्रयेसंबंधेनाजादौविशेषणतयाभासतेनेतादृशव्यापारेत्व
तीयांतार्थस्यचैत्रादिकर्तृकत्वस्यधात्वर्थैकदेशसंयोगादिरूपफलेवद्वितीयांतार्थस्यग्रामवृत्तित्वस्यविशेष
णतयाभानंएवंतोनराख्यातस्यापिकर्तृत्वमेवार्थः तत्रचवृत्तिः लकारैवतद्बोधकस्यधात्वर्थस्यविशेष्यतयाप्र
थमांतपदार्थस्यचविशेषणतयाभासते तच्चयकसमभिव्याहृतताख्यातोपस्थाप्यकर्तृत्वस्यान्वयबोधोपगमे

सु·बा·
७२
71

गम्यते चैत्र इत्यतोऽपि गमनकर्त्ता चैत्र इत्यन्वयबोधः स्यादिति वाच्यं एपं तोत्तरं यक्समभिव्याहृतस्यैवाख्यातस्य।
कर्तृत्वान्वयबोधनियामकत्वात् अथैवं मयपजायाप्यते इत्यादौ कर्तृत्वस्याख्यातबोध्यत्वे कर्त्तरिशविषयैवाद
विषयतयायकोऽसाधुतापत्तिः नत्वयादृशधातूत्तरं यत्सार्वधातुकं विहितं तादृशधात्वर्थनिरूपितकर्तृ।
त्वस्यतेन विवक्षायामेव कर्त्तरिशवित्यादेः शपादिविधायकत्वात् प्रकृते एपं तत्समुदायोत्तरमेवाख्याते
तदर्थनिरूपितकर्तृत्वं न तेन बोध्यते अपितु एपर्थविशेषितधात्वर्थान्विते कर्तृत्वमेवेति न तादृशापवा
दविषयतेति वाच्यं कर्माख्यातस्थले विशेष्यविशेषणभाववैपरीत्येन व्यापारविशेषितक्रियायामपि एपं त। ७२
धात्वर्थत्वात् मैवं लकारसामान्यमहत्यायत्र कर्तृत्वं प्रतीयते तत्रैव कर्त्तरिशविम्पस्य शविधायकता अत्र कर्मत्वशीले क

र्तृत्वे आत्मनेपदत्वेन शक्तिः वस्तुतः फलव्यापारयोः पृथग्धात्वर्थतामते गच्छतीत्यादाविवगम्यते इत्यवा
पि लकारेणाश्रयत्वरूपकर्तृत्वाभिधाने यकोऽनुपपत्तिरिति परस्मैपदसमभिव्याहृततथान्वनायादृशो वि
शिष्टार्थः प्रत्याय्यते तादृशविशिष्टार्थान्वितकर्तृत्वबोधनमेव शाब्दविषयः एवं च प्रकृते नानुपपत्तिरिति मि
ध्येयं ग्रामो याप्यते अर्थो बोध्यते इत्यादौ व्याख्यातार्थविशेष्यतया ग्रामादेर्भाने पि गम्यादिकर्तुः कर्मत्वविवक्षा
यां तस्यैव व्याख्यातार्थविशेष्यतया बोधो युसम्पन्नः एवं ते कर्तृस्थकर्मण इत्यनुशासनादतोऽजो ग्रामोऽर्थ्यते शि
ष्यमर्थो बोध्यते इत्यादयो न प्रयोगाः ग्रामो याप्यते अर्थो बोध्यते इत्यादौ फलं विषयत्वादिरूपं मुख्यभाक्तसाधा
रणो कर्मत्वमेव व्याख्यातार्थः फलव्यापारयोः पृथग्धात्वर्थतामते प्रथमे आश्रयत्वमेव व्याख्यातार्थः धात्वर्थव्यापा

सु·वा·
७२

रेविशेष्यतयातादृशाश्रयत्वविशेषणतया च धात्वर्थफलस्याभानेप्यर्थव्यापारस्य जन्यतासंबंधेन धात्वर्थक्रि
याज्ञानादिविशेषणत्वं पूर्ववदेव ग्रजायायाप्यते इत्यादिस्तु न प्रयोगः द्वितीयया कर्मत्वबोधने धात्वर्थविशेष्यतया
एवार्थबोधसामग्र्याः प्रयोजकत्वात् यगादिसमभिव्याहारस्थले च धात्वर्थविशेषणतयैवार्थस्य बोधात् एवं
तथा तोः सकर्मकत्वेन उक्तरभावाख्यातस्य भावे वाकर्मके इत्यनुशासनबलेनासाधुत्वाच्च न तादृशप्रयोगः ग्रा
मे याप्यते इति भावाख्यातप्रयोगस्तु चैत्र एव एवं तु सकर्मासमभिव्याहारात् एकदा कर्तृत्वकर्मत्वोभयबोधकता
यो ग्राख्यातार्थस्यासम्भवतया ग्रजा ग्रामो याप्यते इत्यादयो न प्रयोगाः एवं तंडुलः सहायेन पाच्यते चैत्रेणेत्यादौ ७२
धात्वर्थसहायादिकं कर्तृकत्वस्यान्ततविशेषणमप्यर्थव्यापारे चैत्रादिकर्तृकत्वस्यान्तनीयांतार्थस्य बोधः शेषं पूर्ववत्

दितिदिकग्रामेगच्छतीत्यादिवत्स्वंगच्छतीतिप्रयोगवारणायपरसमवेतत्वमपिद्वितीयार्थइष्यतेतस्यचथा
त्वर्थान्वयः परत्वेकदेशेपिग्रामकाद्यावेविशात् प्रकृत्यर्थस्यप्रतियोगितयाश्रन्वयः एवंचग्रामंगच्छतिचै
त्रइत्यादौग्रामभिन्नसमवेतायाग्रामनिष्ठसंयोगजनिकाक्रियातदाश्रयतायांश्चैत्रइत्याकारकोऽन्वयबोधः
स्वनिष्ठसंयोगजनकक्रियायांस्वभिन्नसमवेतत्वस्यबाधात् स्वमात्मनेगच्छतीतिनप्रयोगः यत्रचउभयक
र्मण्योमल्लयोः संयोगस्तत्रमल्लांतरासमवेतक्रियायाः स्वनिष्ठसंयोगजनिकायाः स्वभिन्नसमवेतत्वेपि
तादृश्याः क्रियाश्रयतायाः स्वस्मिन्बाधात् मल्लः स्वंगच्छतीतिनप्रयोगः नचस्वनिष्ठसंयोगजनकस्व
समवेतक्रियायांस्वभिन्नसमवेतत्वस्यायोग्यतयातदभानेपिग्रबाधितेस्वनिष्ठसंयोगजनकत्वंविषयीकृ

मु॰वा॰ त्पशाब्दबोधसंभवात् तदर्थमात्रतात्पर्येण स्वं गच्छतीति प्रयोगोऽर्वारणचेति वाच्यं परसमवेतत्वांशविषयकस्य
७३ द्वितीयाधीनफलजनकत्वबोधस्य कुत्राप्यनभ्युपगमेन तादृशबोधेन तद्भासकसामग्र्या अप्यपेक्षणीयत्वात्।
73 प्रथमस्यापि द्वित्वावच्छिन्नस्वभेदवत्त्वात् स्वं गच्छतीति प्रयोगस्यऽवारतया द्वितीयाप्रकृत्यर्थस्य प्रकृत्यर्थ
तावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेनैव भेदेनान्वयो वाच्यः तथा च चैत्रोऽस्वं गच्छति मल्लो मल्लं
गच्छतीत्यादिवाक्यस्याप्रमाणतापत्तिः चैत्रमल्लादिनिष्ठक्रियायाः प्रकृत्यर्थतावच्छेदकीभूतद्रव्यत्व।
मल्लत्वाद्यवच्छिन्नभिन्नासमवेतत्वात् तद्व्यक्तित्वानुपस्थितावपि शाब्दबोधोदयेन तत्तद्व्यक्तित्वावच्छिन्न। ७३
प्रतियोगितासंबंधेनान्वयोपगमासंभवात् उक्तयुक्त्या संबंधघटपदार्थोपस्थितेरपि शाब्दबोधेऽपेक्षितत्वात् पर व

र्मावच्छिन्नप्रतियोगिताया अन्यधर्मावच्छिन्नसंसर्गत्वेमानाभावात् प्रतियोगिविशेषिताभाववद्धेर्विशिष्टवैशि
ष्ट्यावगाहित्वनियमात् प्रत्वयितावच्छेदकानवच्छिन्नप्रतियोगितायाः संबंधत्वासंभवाच्चेति चेत्तर्हि क्रिया
न्वयिभेदप्रतियोगितावच्छेदकत्वमेव द्वितीयार्थोस्तु भेदश्च कृत्यर्थस्याधेयतयान्वय इति न काचिदनुपप
त्तिः नैवमपि विहगो भूमिं प्रयातीत्यत्रैव विहगो विहगं गच्छतीति प्रयोगोऽदुर्वारः विहगनिष्ठभूमिसंयोग
जनकतत्क्रियाया विहगान्तरनिष्ठभेदप्रतियोगितावच्छेदकतया विहगे विहगनिष्ठभेदप्रतियोगितावच्छेदा
कविहगवृत्तिसंयोगजनकक्रियाश्रयत्वस्य बाधादिति वाच्यं विहगो विहगं गच्छतीत्यादौ विहगादिवृत्तित्ववि
शिष्टसंयोगस्य स्वजनकत्वस्वाश्रयनिष्ठभेदप्रयोगितावच्छेदकत्वोभयसंबंधेनान्वयोपगमात् विहगनिष्ठक्रि

मु·वा·
७४
74

यायास्तद्विहगनिष्ठसंयोगजनकत्वेनशुद्धजनकतासंबंधेनतत्संयोगवत्त्वेपिविहगवृत्तित्वविशिष्टतत्संयोगा।
श्रयतद्विहगनिष्ठभेदप्रतियोगितावच्छेदकत्वाभावात्त्रोक्तोभयसंबंधेनविशिष्टसंयोगवत्त्वंइत्यनतिप्रसंगात्
एवंसतिपरसमवेतत्वंसंबंधघटकमेवनतद्वितीयायाअर्थइतिचेत् काद्मतिः विहगोविहगेनगम्यतेइत्यादाव
पिस्वजन्यत्वस्वावच्छिन्नभेदसामानाधिकरण्योभयसंबंधेनक्रियायाः संयोगेनान्वयइष्यतेतेनतत्क्रियावच्छि
न्नभेदवतिभूम्यादावेवतादृशभेदसामानाधिकरण्यसंबंधेनतत्तत्क्रियाविशिष्टसंयोगादिमत्त्वोपगमात् तत्तत्
क्रियाश्रयविहगेतद्बाधेननातिप्रसंगइतिध्येयं ज्ञानादिरूपसविषयकवस्त्वभिधायिधातुसमभिव्याहृतद्वितीया। ७४
प्राचीननयेनिरूपकतासंबंधेनधात्वर्थान्वयिविषयत्वमर्थः नव्यमतेत्वर्थस्याधेयतासंबंधेनान्वयः वृत्तिनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतयाच

ष्ठं ज्ञानामिपदं नेत्यादावनुपपत्तेः विषयितार्थकतामेवनवीनास्तत्रोपवर्णयंति तत्रचप्रकृत्यर्थस्यनिरूपकत्व
संबंधेनतस्यचधात्वर्थेप्राश्रयतासंबंधेनान्वयः घटादिष्टज्ञानादिकर्मत्वंचज्ञानादिविषयत्वमेवविषयत्वा।
दौचद्वितीयालक्षणैवनत्वशक्तिरितिसांप्रदायिकाः वस्तुतस्तु विषयितात्वस्यसंयोगत्वाद्यपेक्षयाचागुरु
तयाकिंधर्मावछिन्नेशक्तिः कल्प्यतेइत्यत्रविनिगमकंडर्लभंएकस्मिन्प्रयोगेभूयस्त्वमशक्यनिर्णयमि
तितत्रापिशक्तिः सिद्ध्यतीत्यवधेयं चैत्रेणज्ञायतेघटः इत्यादौचकर्माख्यातेनघटादौधात्वर्थनिरूपितंवि
षयत्वंबोध्यते वाच्छ्यत्वाद्यवच्छिन्नवाचकदृश्यादिपदसमभिव्याहृतद्वितीयायाश्चलौकिकविषयित्वं।
तादृशकर्माख्यातस्यलौकिकविषयत्वमर्थः उपनीतसौरभादिविषयकसुरभिचंदनमित्याकारकचाक्षु

मु.का. घादिदशायांसौरभंपश्यतिसौरभंद्रष्टमित्यादिप्रयोगात् अथैवं पुष्पंजिघ्रतीतिप्रयोगानुपपत्तिः घ्राणज॰
७५ प्रत्यक्षस्य पुष्पाद्यंशेलौकिकत्वविरहात् तादृशधात्वर्थयोगेविषयित्वादिसामान्यस्यकर्मप्रत्ययार्थत्वेगंधसाक्षात्
75 कारेऽपनयमर्यादयाआकाशादिभानेआकाशंजिघ्रतीतिप्रयोगप्रसंगेनतत्रापिलौकिकविषयतायाएव
कर्मप्रत्ययार्थतयाउपगंतव्यत्वात्इतिचेन्न घ्राधातोर्हिगंधलौकिकप्रत्यक्षत्वंशक्यतावच्छेदकं घ्रागंधोपा॰
दानेइत्यनुशासनात् तत्समभिव्याहृतद्वितीयायाश्चाधेयत्वमर्थः तस्यचघुत्यनिवैविशेषेणगंधादिरूपधात्वर्थै
कदेशेनापिसमन्वयः एवंच पुष्पंजिघ्रतीत्यादितः पुष्पंवृत्तिगंधलौकिकप्रत्यक्षाश्रयइत्याकारकएवशाब्द ७५
बोधः नतुपुष्पनिरूपितलौकिकविषयताशालिप्रत्यक्षाश्रयइत्याकारकइतिनानुपपत्तिरितिवै ॥ ॥

वेंसविषयार्थबोधकधातुसमभिव्याहृतकर्मप्रत्ययस्यविषयतार्थकत्वनियमभंगइतिवाच्यं विषयानवछिन्नता
दृशावस्त्वभिधायकधातुसमभिव्याहृतकर्मप्रत्ययस्यैवतदर्थकत्वनियमात् अस्यचगंधात्मकविषयावछिन्नप्र
त्यक्षवाचकतयातादृशनियमस्याबाधितत्वात् नवघ्राधातुसमभिव्याहृतद्वितीयायागंधान्विताधेयतार्थ
कत्वेआमोदमुपजिघ्रतीत्यादेरनुपपत्तिः गंधविशेषरूपामोदपदार्थाधेयत्वस्यगंधेबाधादितिवाच्यं विषा
यावछिन्नप्रत्यक्षात्मकज्ञाधातुसमभिव्याहृतद्वितीयायाएवाधेयतार्थकत्वनियमात् तत्रचविषयानवछिन्न
स्यैवप्रत्यक्षस्यलक्षणयाघ्राधात्वर्थतयोपगमेनविषयतायाएवद्वितीयार्थत्वात् वस्तुतस्तु पुष्पंजिघ्रतीत्या
दौसमवायसंबंधावछिन्नाधेयत्वीयसांसर्गिकविषयतानिरूपितप्रकारतैवद्वितीयार्थः तस्याश्चगंधनिरू

मु॰बा॰ पितलौकिकविषयिताशालिप्रत्यक्षात्मकधात्वर्थैकदेशोविषयितायांनिरूपितत्वसंबंधेनान्वयः तेनइदानींनन
७९ घ्रष्येगंधइत्यादिप्रयोगस्याधेयतासंसर्गेणकालादिप्रकारत्वेपिनतादृशप्रत्ययदशायांकालेजिघ्रतीतिप्रयोगःता
76 दृशज्ञानीयगंधादिविषयितायांकालादिप्रकारतानिरूपितत्वविरहात् अतएवतदाननंसेवितस्मृतिकालतेत्व
पः समाघ्रायनत्स्मिमायेयोरित्यादौघ्राघ्रातवान्गंधवद्दंस्रगंधिमिमादौचउपाधिनिष्ठगंधप्रदत्तात्मैर्येणेव
जिघ्रतेः प्रयोगात्तादृशगंधेचाननगंधवद्घ्रादिवृत्तित्वस्यबाधेपिनक्षतिः तादृशगंधस्याननाद्यवृत्तित्वेपिघ्रा
ननेगंधइत्याकारकबोधीयगंधविषयतायांघ्राननादिप्रकारतानिरूपितत्वेनवाक्यार्थबोधात् बाधानीतवेप्य ७९
कगंधस्यघ्रवाघ्रादिवृत्तित्वेनैवग्रहस्तत्रचैपकेजिघ्रतीतिप्रयोगस्तनेस्मतएव यत्त आधेयत्वमात्रेद्वितीयार्थःत

त्वसमवायावच्छिन्नत्वविशेषितमाधेयत्वं तथा च घटत्वादिसंसृष्टस्य तत्कालादिगतयेपरंपरासंबंधेन घटत्वादि
वृत्तित्वस्य सत्वान्नोक्तस्थले अनुपपत्तिरिति तदसत् तथासति कालेजिघ्रतीति प्रत्ययस्य दुर्वारत्वात् प्रथ
माद्यायनेऽस्मादौ च निरुक्तप्रकारत्वमाख्यातार्थः आश्रयतासंबंधेन घ्राणाद्यन्विते तस्मिन् धात्वर्थप्रत्यक्ष
स्य निरूपितत्वसंबंधेन तद्विशेषणतापन्नगंधविषयितायाश्चैतादृशसंबंधेनान्वयः एकधर्मिविशेषण
तयोपस्थितस्य स्वातंत्र्येणान्यविशेषणतयान्वयबुद्धेरेवाव्युत्पन्नत्वात् अत्र च प्रत्यक्षत्वपारतंत्र्येणैव गंधवि
षयिताया आख्यातार्थेऽन्वयोपगमेन व्युत्पत्तिविरोधविरहात् प्रत्यक्षवागंधो विषयिता प्रत्यक्षं च विशकलि
व तमेधातोरर्थः कर्त्राख्यातादिसमभिव्याहारे गंधविषयितायाः प्रत्यक्षविशेषणतया कर्माख्यातसमभिव्या

बु·वा·
७७

द्वारस्यलेच प्रत्यक्षविशेष्यतयेति न कश्चिद्दोषः जिघ्रसमर्थगंधविषयितानिरूपितनिरुक्तप्रकारितानिरूपक
त्वमेव पुष्पादिनिष्ठजिघ्रतिकर्मत्वमिति दिक् प्रयत्नपुष्पादिसमभिव्याहृतद्वितीयाया लौकिकविषयतार्थक
त्वे सौरभं न पश्यतीत्यादौ सौरभादिनिरूपितलौकिकविषयिताशालित्वाद्यबाधप्रसिद्ध्या आकाशं न पश्यती
त्यादौ वाकाशादिनिरूपितलौकिकविषयतायाप्यप्रसिद्ध्या तादृशविषयताशालित्वाद्यबाधाश्रयत्वाभावरूपक
क्रार्थाप्रसिद्धिः नच सौरभं न पश्यतीत्यादौ सौरभादिनिरूपितलौकिकविषयत्वाभावस्याद्यबाधादौ प्रतीयत इति वाच्यं
एवमपि आकाशादिनिरूपितलौकिकविषयत्वाप्रसिद्ध्या आकाशं न पश्यतीत्यादावप्रतीकारात् नच लौकिकवि ७८
षयितायां निरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकाकाद्यभावः प्रतीयत इति वाच्यं तस्य नियामकसंबंधस्य संसर्गाभावप्रतियो गिता

नवच्छेदकतयातादृशाभावस्याप्रसिद्धेः एतेननिरूपकतासंबंधेनचाक्षुषादिनिष्ठलौकिकविषयितायाअभा-
वस्तत्राकाशादौप्रतीयतइतिनिरस्तं अन्वयबोधस्यप्रथमांतार्थमुख्यविशेष्यकतायाः सर्वानुभवसिद्धायाभंगप्र
संगाच्च चाक्षुषादिलौकिकविषयितात्वावच्छिन्नस्यपदार्थाकांक्षाद्यनुपस्थितेस्तदभावस्याकाशादौभानासंभवा
च्च भावान्वयबोधेचलौकिकविषयताप्रकारेणचाक्षुषादेर्भानात्रचाक्षुषप्रकारेणतस्याः भवतुवाच्चस्यनियाम
कोपिसंबंधोऽभावप्रतियोगितावच्छेदकस्तथापिनिरूपितत्वसंबंधावच्छिन्नप्रतियोगिताकस्यविषयिताविशे-
षनिष्ठाकाशाद्यभावस्यभानोपगमोनसंभवति तथासति आकाशंपश्यतिचैत्रइत्याकारकवाक्याद्योग्यताभ्रमा
धीनशाब्दबोधदशायांआकाशंनपश्यतिचैत्रइत्यादिवाक्यात्शाब्दबोधप्रसंगात् आकाशंपश्यतिमैत्रइत्यादिभ्रम

मु.वा.
७८
78

दशायामाकाशंनपश्यचैत्रइत्यादिवाक्याद्बोधोत्पत्तेर्ईदृपकवतयालौकिकविषयितात्वसामानाधिकरण्येनैव।
तादृशाभावबोधकंतद्वाक्यंउपगंतव्यं तादृशबोधश्चलौकिकविषयितात्वसामानाधिकरण्येनैवाकाशादिनिरूपि
तत्वाभावावगाहिदर्शितयोग्यताज्ञानाप्रतिबध्यएवेति नचचैत्रीयवाक्यघटादिनिरूपितलौकिकविषयताह्यवच्छेदेनै
वतादृशाभावोदर्शितवाक्येनप्रत्याय्यतइतिचैत्रीयवाक्यघटादिनिरूपितलौकिकविषयितायांआकाशीयत्वाद्यवगा
हिचैत्रआकाशंपश्यतीतिवाक्यजन्यज्ञानेनतादृशवाक्यजन्यधियंप्रतिबध्नातीतिवाच्यं तादृशविषयितात्वेनविषयिता
याअनुपस्थितेस्तदवच्छेदेनाभावप्रत्याय्यमानासंभवात् चैत्रआकाशंपश्यतीत्यादिवाक्यजन्यबोधेचैत्रांशेदर्शना ७८
श्रयत्वेविशेषणंदर्शनांशेलौकिकविषतावैशेषणमितिरीत्येवपदार्थानांभानात् चैत्रीयचाक्ष ॥ ॥

षादिलौकिकविषयितात्वेनाकाशादिधर्मितावच्छेदकं किंतु शुद्धलौकिकविषयितात्वमेवेति तस्य शुद्धलौकि
कविषयतात्वावच्छेदेनाकाशाद्यभावावगाहिज्ञानं प्रत्येव प्रतिबंधकतया निरुक्तधर्मावच्छि[illegible]घवच्छेदेनाकाशा
द्यभावावगाहिज्ञानस्य तदप्रतिबध्यत्वात् एतेन तथाकाशादिपदस्याकाशादिनिरूपितत्वार्थकत्वं द्वितीयाया ।
एवत्वेऽंशो निरूपितत्वलौकिकविषयत्वोभयार्थकत्वं वा स्वीकृत्य लौकिकविषयतायां प्राथम्यत्वसंबंधावच्छि
न्नप्रतियोगिताकाकाशादिनिरूपितत्वाभाववोधोपगमेपि न निस्तारः घटश्चाकाशं न पश्यतीत्यादौ च नितरामे
वागतिः यत्र नञर्थस्य द्विधाभानोपगमेनाकाशानिरूपितलौकिकविषयताशालिचाक्षुषप्राथम्यत्वाभाववान् ।
घटश्चाकारकस्तत्रान्वबोधः इति तदपि न चैत्रो घटं न पश्यति चैत्र आकाशं न पश्यतीत्यादिवाक्यजन्यशाब्दबो

मु॰वा॰
७९

यादविलक्षणबोधस्यानुभवसिद्धस्य तत्तादृशवाक्यादनुपपत्तेः नहि तत्रापीदृशशाब्दबोधः तथा सति यदा घटादिकं न पश्य
ति चैत्रोऽपि तद्घटादिकमेव न तदा घटाद्यनिरूपितलौकिकविषयताशालिचाक्षुषाश्रयत्वाभावस्य तत्र बाधाच्चैत्रो घटं न पश्य
तीति प्रयोगानुपपत्तेः यदा च भावमात्रं पश्यति तदा भावानिरूपितलौकिकविषयिताशालिचाक्षुषाश्रयत्वाभावसत्त्वा
त् भावं न पश्यति चैत्र इत्यादिप्रयोगापत्तेश्च एवमाकाशं न पश्यति घट इत्यादेरप्याकाशाद्यनिरूपितलौकिकविषयताशा
लिचाक्षुषाश्रयत्वाभावस्य वाक्यार्थत्वे यदा आकाशाद्यतिरिक्तपदार्थविषयकचाक्षुषाश्रयत्वभ्रमो घटादेस्तदाकाशाद्यनिरू
पितलौकिकविषयताशालिचाक्षुषाश्रयत्वनिश्चयप्रतिबंधकसत्त्वेन तादृशवाक्यजन्यशाब्दबोधानुपपत्तिः यथा चैत्रो घटं पश्यति इत्यादिनिश्चयद। ७९
शायां पटं न पश्यति चैत्र इत्यादिवाक्यजन्यशाब्दबोधोत्पादोऽनुभवसिद्धः तथैवोक्तभ्रमदशायां आकाशं न पश्यति घट इत्यादिवाक्यजन्यबोधोत्पादोऽपीति न तत्रेष्टा पत्तिसंभवति यथालौ

किकविषयताशून्यत्वाद्वषत्वाद्यवच्छेदेनाकाशादिविषयकत्वघटादिवृत्तित्वोभयाभावप्रत्वाकाशंनपश्यतीतिवा
क्यात्प्रतीयतेउपनीतश्चाकाशादिविषयकवाद्वषेआकाशादिविषयकत्वैवघटादिवृत्तित्वोभयसत्वेनाकाशंनप
श्यतीतिप्रयोगानुपपत्तिः घटादौताहशवाद्वषाश्रयत्वभ्रमदशायांघटआकाशंनपश्यतीतिवाक्यात् शाब्दबो।
धानुपपत्तिश्चेत्यतोलौकिकविषयिताशून्यत्वेनवाद्वषादिकंविशेषितं आकाशादिविषयकवाद्वषाद्युपनी
तमानस्यापिइतरांशेलौकिकत्वात्ताहशानुपपत्ति तादवस्थ्यमतोलौकिकत्वविशेषणमुपेक्षितं अत्रालौ।
किकविषयताशून्यत्वाद्वषत्वाद्यवच्छिन्नस्यघटआकाशंनपश्यतीत्यादौशाब्दयाथार्थ्यत्वासंभवेपिप्रकृते।
तस्यैवलक्ष्यतयायाथार्थ्यत्वमुपेयते विषयितासामान्यमेवचद्वितीयार्थः आश्रयत्वमिवनिरूपकत्वेहि

सु·वा·
८०
80

त्वमप्याख्यातार्थः आश्रयत्वेनुत्पत्तिर्वैविध्यात् प्रथमांतपदार्थघटादेस्तस्य च निरूपकत्वे विशेषणतयान्वया-
त्तादृशनिरूपकत्वतद्द्वितीयांतार्थाकाशादिविषयकत्वयोस्तु प्रकारतया द्वित्वान्वयः द्वित्वावच्छिन्नप्रतियोगिताक-
त्वसंबंधेन तादृशोभयस्मान्नञर्थाभावेन तस्य चान्वयितावच्छेदकधर्मावच्छेदेन धात्वर्थान्वयः तादृशधात्वर्थस्य
प्रकृते मुख्यविशेष्यतयैव भासते अथवा स्वनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वरूपव्यापकतासंबंधेन
धात्वर्थस्य तादृशोभयाभावेऽन्वयः तस्य चाख्यातार्थनिरूपकत्वे तस्य च प्रथमांतपदार्थघटादौ घटादेः प्र-
तियोगितावच्छेदकघटकतया तादृशाभावनिरूपकत्वात् एवं चान्वयबोधस्य प्रथमांतार्थमुख्यविशेष्या- ८०
कत्वनियमस्यापि न क्षतिरिति तदपि न सम्यक् घटादिविषयकत्वात्तथा ॥ ॥ ॥

देः कालिकादिसंबंधेन घटादिवृत्तितया घटो घटं न पश्यतीति प्रयोगानुपपत्तेः आकाशादिविषयकत्वावच्छिन्न
चाक्षुषे कालिकादिसंबंधेन घटादिवृत्तित्वनिष्ठदशायां घट आकाशं न पश्यतीति वाक्याद्बोधानुपपत्तेश्च
समवायेन घटादिवृत्तित्वगगनविषयकत्वोभयाभावभानस्यैव स्वीकरणीयतया अभाव आकाशं न पश्यती
त्यादावभावसमवेतत्वाप्रसिद्धा वाक्यार्थाप्रसिद्धेर्दुरुद्धरत्वात् चैत्रादेरतीतचाक्षुषस्य घटादिविषयकत्वेपि
समयविशेषे चैत्रो घटं न पश्यतीति प्रयोगाद्वर्त्तमानेन तादृशचाक्षुषत्वावच्छेदेन उभयाभावभानस्य प्रतियो
गिकोटौ वर्त्तमानत्वमंतर्भाव्य चित्त्वावच्छिन्नाभावभानस्यैव वा स्वीकरयतया यदा किंचिदंशेऽलौकिकमेव घ।
टादिचाक्षुषं तस्य वर्त्तनेन तदा चैत्रो घटं न पश्यतीत्यादिप्रयोगस्य दुर्वारत्वाच्च वर्त्तमानालौकिकविषयताश्च।

मु॰वा॰ मवच्छत्वाद्यवच्छेदेनचैतद्वृत्तित्वघटविषयकत्वोभयाभावसत्त्वात् समानेंद्रियजन्योपनीतभानादौलौकिक

८१ प्रत्यक्षसामग्र्याविरोधित्वस्यनिष्प्रमाणकतयाऽलौकिकविषयतानियामकउपनायकज्ञानादिसमवहितलौकिक

81 सन्निकर्षात्घटादिनिरूपितलौकिकालौकिकोभयविषयतालालिचाक्षुषादेरप्युत्पत्त्यातादृशचाक्षुषादिदशा

यांउक्तप्रयोगापत्तेराकाशादिनिरूपितालौकिकविषयितानाशालिवर्तमानचाक्षुषांशेघटादिवृत्तित्वस्याकाशी

यत्वादिनालौकिकविषयतायाश्चमदशायांआकाशंनपश्यतीतिवाक्यात् शाब्दबोधापत्तेर्दुर्वारत्वात् घटादि

निरूपितालौकिकविषयिताप्रत्यक्षचाक्षुषत्वाद्यवच्छेदेनघटादिविषयित्वघटितोभयाभावभानोपगमेप्या ८१

निस्तारात् एतेनाख्यातार्थवर्तमानकालावच्छिन्नसमवायावच्छिन्नाश्रयतात्वावच्छि ॥ ॥ ॥

त्वे आकाशविषयकप्रतियोगिकत्वलौकिकाभावविषयताशून्यत्वात्स्वप्रतियोगिकत्वघटानुयोगिकत्वेन
च्छित्वावच्छिन्नाभावो भाषते प्रतीतो ऽभावो आकाशं न पश्यतीत्यादौ नानुपपत्तिः तत्र विषयतावत्प्रतियोगित्वं
द्वितीयार्थः निरुक्तत्वात्स्वप्रतियोगिकत्वेवित्वं च धातोरर्थः घटाद्यनुयोगिकत्वं च प्रथमान्तार्थ इत्यपि निरा
स्तमिति चेन्न अगत्या घटआकाशं न पश्यतीत्यादिवाक्यानामप्रामाण्यमेवोपगन्तव्यमिति १ अनुमित्यर्थक
धात्वयोगे विधेयत्वं विधेयित्वं वा द्वितीयार्थः तेन बाष्पादिपक्षकानुमितिपरस्य वह्निमनुमिनोमीत्यादिवा
क्यस्य न प्रामाण्यं यदि च वह्निसाध्यकपर्वतपक्षकानुमितिपरस्य वह्निमत्वे पर्वतमनुमिनोतीत्यादिवाक्यस्या
पि प्रामाण्यमनुमन्यते तेन तादृशधात्वयोगे उद्देश्यत्वमुद्देश्यित्वं वा द्वितीयार्थः तस्य च तृतीयान्तोपस्थाप्यसा

व्यु॰वा॰ ध्यविधेयकत्वविशिष्टेऽन्वयः अतो वह्निमत्त्वेनेत्यादेरसमभिव्याहारे अत्र पर्वतमनुमिनोमीत्यादयो न प्रयोगाः वि
८२ धेयत्वाद्यर्थे तृतीयानुशासनविरहात् तृतीयान्तेन वह्न्यादिविधेयकत्वं कथमुपस्थापनीयमिति न शक्यं वैशिष्ट्य
8 रूपार्थे तृतीया

